Acc No. 143282 ZZ e. 33/2.

Upaniṣadsamuccaya

	Name	I F.
१)	कौषीतकी	22
२)	महानारायण	56.
३)	योगचूडामणि	12.
४)	मल	5
५)	मुंड	8
६)	~~अ~~ स्कंद	2
७)	अद्वयतारक	5
८)	शरीरक	3
९)	नृसिंहोत्तरतापिनीय	15
१०)	दक्षिणामूर्ति	4
११)	अक्षि	6
१२)	अध्यात्मोपनिषद्	8
१३)	मैत्रायणीय	12
१४)	मंडलब्राह्मण	10
१५)	वेदयोगशिखा	1
१६)	पाशुपतब्रह्म	9.
१७)	त्रिपुरातपन	22
१८)	संहितोपनिषद्	6
१९	शरभ	5 + (2 blank pg.)
२०)	मुक्तिकोपनिषद्	15
२१)	अमृतनाद	4.
२२)	तेजो	39.
२३)	सुंदरीतापनी	27
२४)	देवी	4
२५)	पैंगल	2
२६)	भिक्षुक	2
२७)	लांगूल	7
२८)	ब्रह्मण	7
२९)	अद्वैतारक	4
		323

		323
30)	सर्वोपनिषत्	4 + पुढील ~~आर्टेपात~~.
31)	ब्रह्म	7 —॥—
32)	ब्रह्मचिद्रूप	2
33)	निरालंब	4
34)	स्वसंवेद्य	2
35)	ऐतरेय	5.
36)	आत्मबोध	7
		3
		354

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

Upanishads.

14382 3/1970

॥अथकौषीतकीउपनिषत्प्रारंभः॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

part I vol II

ZZ.e.33

कौषीत श्रीगणेशायनमः ॐ वाङ्मेमनसीतिशांतिः चित्रोहवैगा कौउ॰
१ र्ग्यायणिर्यक्ष्यमाण आरुणिंवव्रे सहपुत्रंश्वेतकेतुंप्रजिघाय
याजयेतितंहासीनंपप्रच्छ गौतमस्यपुत्रास्तिसंवृतंलोकेय
स्मिंनाधास्यस्यमहाबोध्वालोकेयास्यसीतिसहोवाच~~नेह~~
नाहमेतद्वेदहंताचार्यंपृच्छानीतिसहपितरमासाद्यपप्रच्छे
तिमाप्राक्षीत् कथंब्रुवाणीतिसहोवाचाहमप्येतन्नवेदस
स्येदयंस्वाध्यायमधीत्यहरामहेयंनःपरेददत्येह्युभौगमि
ष्यावइति॥ १ ॥सहसमित्पाणिश्चित्रंगार्ग्यायणिंप्रति १
चक्रामोपायानीतितंहोवाचब्रह्मार्घोसिगौतमयोमाउ

पागादेहीत्वावैज्ञापयिष्यामीतिसहोवाचयेकेचास्माल्लोका
त्प्रयंतिचंद्रमसमेवतेसर्वेगच्छंतीतेषांप्राणैःपूर्वपक्षआप्या
यतेथापरपक्षेनप्रजनयत्येतद्वैस्वर्गस्यलोकस्यद्वारंयश्चंद्रमा
स्तंयत्प्रत्याहतमतिसृजतेएनंप्रत्याहतमिहवृष्टिर्भूत्वावर्षति
तइहकीटोवापतंगोवाशकुनिर्वाशार्दूलोवासिंहोवामत्स्योवा
परश्वापुरुषोवान्योवैतेषुस्थानेषुप्रत्याजायते यथाकर्मयथा
विद्यंतमागतंपृच्छतिकोसीतितंप्रतिब्रूयात्॥ २ ॥विचक्षणा
दृतवोरेतआभृतंपंचदशात्प्रसूतात्पित्र्यावतस्तन्मापुं
सिकर्तर्येरयध्वंपुंसाकर्त्रामातरिमासिषिक्तसजायमानउप

5/1970

कौषीत जायमानेद्वादशत्रयोदशउपमासाद्वादशत्रयोदशेनपित्रासंतद्विदे कौउ॰
२ हंतवऋतवोमर्त्यव आभरध्वंतेनसत्येनतपसर्तुरस्मार्तवोस्मि
कोसित्वमसीतितमतिसृजतेतमेतंदेवयजनंपंथानमासाद्याग्नि
लोकमागछतिसवायुलोकंसवरुणलोकंसआदित्यसइंद्रलो
कंसप्रजापतिलोकंसब्रह्मलोकंतस्यहएतस्यब्रह्मलोकस्यारो
दोमुहूर्तान्येष्टिहाविजरानल्योवृक्षस्सालज्जंसंस्थानपराजित
मायतनमिंद्रप्रजापतिद्वारगोपौविभुप्रमितंविचक्षणासंध्यमितौ २
जाःपर्यंकःप्रियाचमानसिप्रतिरूपाचचाक्षुषिपुष्पाण्यादायाव
यतौचैवजगन्यंबाश्चांबावयवाश्चाप्सरसोंबयानद्यस्तमित्थंविधा

यगछतितंब्रह्माभिधावतममयशसाविजरांपाल्यंनदींप्रापं 7/
नवायंजिगमिष्यतीति॥ ३ ॥तंपंचशतान्यप्सरसांप्रतिधावंति 1970
शतज्वालाहस्ताःशतमांजनहस्ताःशतचूर्णहस्ताःशतंवासोहस्ताः
शतंफणहस्तास्तंब्रह्मालंकारेणालंकुर्वंतिसब्रह्मालंकृतोब्रह्म
विद्वान्ब्रह्मैवाभिप्रैतिसआगछत्यारंह्रदंतन्मनसात्येतीतम्त्वा
संप्रतिविदोमज्जंतिसआगछतिमुहूर्तान्येष्टिहास्तेस्मादपद्रवं
तिसआगछतिविजरांनदींतांमनसैवात्येतितत्सुकृतदुष्कृतेधू
नुतेतस्यप्रियाज्ञातयःसुकृतमुपयंत्यप्रियादुष्कृतंतद्यथारथे
नधावयन्रथचक्रेपर्यवेक्षतैवमहोरात्रेपर्यवेक्षतएवंसुकृत

कौषीत दुष्कृतेसर्वाणिचद्वंद्वानिसएषविसुकृतोविदुष्कृतोब्रह्मविद्वान् कौउ०
३ ब्रह्मैवाभिप्रैति॥ ४ ॥सआगच्छतील्यंवृक्षंतंब्रह्मगंधःप्रविश
तिसआगच्छतिसालज्ज्यंसंस्थानंतंब्रह्मसप्रविशतिसआगच्छती
त्यपराजितमायतनंतंब्रह्मतेजःप्रविशतिसआगच्छतींद्रप्रजाप
तीद्वारगोपौतावस्मादपद्रवतसआगच्छतिविभुप्रमितंतंब्रह्मय
शःप्रविशतिसआगच्छतिविचक्षणामासंदींसाप्रज्ञाप्रज्ञयाहिप
श्यतिसआगच्छतीत्यमितौजसंपर्यंकंतंसप्राणस्तस्यभूतंचभ
विष्यच्चपूर्वौपादौश्रीश्चेराश्चापरौबृहद्रथंतरेअनुच्येभद्रयज्ञाय २
ज्ञीय्येशीर्षण्यमृचश्चसामानिचप्राचीनागानंयजूंषीतिरश्चीना

गानंयजूंषीतितिरश्चीनानिसोमांशवउपस्तरणमुद्गीथउप
श्रीश्रीरूपबर्हणंतास्मिन्ब्रह्मास्तेतमित्थंवित्पादेनैवाग्रआरोह
तितंब्रह्माहकोसीतितंप्रतिब्रूयादृतुरस्म्यार्तवोस्म्याकाशाद्यो
नेःसंभूतोहवैतत्संवत्सरस्यतेजोभूतस्यभूतस्यात्माभूतस्य
त्वमात्मासियत्त्वमसिसोहमस्मीतितमाहकोहमस्मीति॥ ५
सत्यमितिब्रूयात्किंतत्सत्यमितियदन्यद्देवेभ्यश्चप्राणेभ्य
श्चतत्सिद्धयद्देवाश्चप्राणाश्चतद्यंतदेतयावाचाभिव्याह्रियतेसत्य
मित्येतावदिदंसर्वमिदंसर्वमसित्येवैनंतदाहतमाहकेनपौंसा
निनामान्याप्नोतीतिप्राणेनेतिब्रूयात्केनस्त्रीनामानीतिवाचे

9
1970

तिकेनन पुंसकना मानीति मनसेति केन गंधानीति घ्राणेनेति ब्रू
यात्केन रूपाणीति चक्षुषेति केन शब्दानीति श्रोत्रेणेति केनांन
रसानीति जिह्वयेति केन कर्माणीति हस्ताभ्यामिति केन सुखदुःख
इति शरीरेणेति केनानंदं रतिं प्रजात्यमुपस्थेनेति केनेत्या इति पा
दाभ्यामिति केन धियो विज्ञातव्यं कामानीति ॥ प्रज्ञयेति प्रब्रूयात्त
माहापैवै खलु मेत्यसावयं ते लोक इति सा या ब्रह्मणि चितिर्या व्य
ष्टिस्तां चितिं जयति तां व्यष्टिं व्यश्नुते य एवं वेद य एवं वेद ॥ ६ ॥
प्रथमोध्यायः॥ ॐ ॥ प्राणो ब्रह्मेति ह स्माह कौषीतकीत
स्य ह वा एतस्य प्राणस्य ब्रह्मणो मनो भूतं वाक्य परिवेष्टु चक्षु ४

गोत्रं संश्रावयितृ तस्मै वा एतस्मै प्राणाय ब्रह्मण एताः सर्वा देवता 11 1970
अयाचमायाच बलिं भरंति तथा एवास्मै सर्वाणि भूतान्ययाचमा
नायैव बलिं हरंति य एवं वेद तस्योपनिषन्न याचेदिति तद्यथा ग्रामं
भिक्षित्वालब्ध्वोपविशेंनाहमतो दत्तमाश्नीयामिति य एवैनं पुर
स्तात्प्रत्याचक्षिरंस्त एवैनमुपमंत्रयंते ददाम त इत्येष धर्मो याचि
तो भवत्यन्यतरस्त्वेवैनमुपमंत्रयंते ददाम त इति प्राणो ब्रह्मेति ह
स्माह पैंग्यस्तस्य ह वा एतस्य प्राणस्य ब्रह्मणो वाक् परस्ताच्चक्षु
रारुंधे चक्षुः परस्तात्श्रोत्रमारुंधे श्रोत्रं परस्तात्मन आरुंधे मनः
परस्तात्प्राण आरुंधे तस्मै वा एतस्मै प्राणाय ब्रह्मण एताः सर्वा

कौषीत देवताअयाचमानायबलिंहरंतितथोएवास्मैसर्वाणिभूतान्यया कौउ०
५ चमानायबलिंहरंतियएवंवेदतस्योपनिषंनयाचेदितितद्यथाग्रा
मंभिक्षित्वालब्ध्वोपविशेनाहमतोदत्तमश्नीय्यामितियएवैनंपरस्ता
दभत्याचक्षिरंस्तएवेनमुपमंत्रयंते॥दद्दामतइत्येषधर्मोयाचितो
भवत्यन्यतरस्त्वेवैनमुपमंत्रयतेददामतइति॥ १ ॥अथात
एकधनावरोधनंयदेकधनमभिध्यायात्पौर्णमास्यांवास्या
यांवाशुद्धपक्षेवापुण्येनक्षत्रेग्निमुपसमाधायपरिसमूह्यपरि
स्तीर्यपर्युक्ष्यात्पूर्वंदक्षिणंजान्वाचाच्यस्रुवेणवाचमसेनवा ५
कंसेनचैताआज्याहुतिर्जुहोतिवाङ्नामदेवताविरोधिनीह

सामेमुष्मादिदमवरुंधातस्यैस्वाहाप्राणोनामदेवतावरो
धिनीसामेमुष्मादिदमवरुंधातस्यैस्वाहा॥चक्षुर्नामदेवता
वरोधिनीसामेतस्मादिदमवरुंधातस्यैस्वाहाश्रोत्रंनामदे
वतावरोधिनीसामेमुष्माछ्मादिदमवरुंधातस्यैस्वाहाम
नोनामदेवतावरोधिनीसामेतस्मादिदमवरुंधातस्यैस्वाहेप्र
त्यथधूमगंधंप्रजिघ्रायाज्यलेपेनांगान्यनुविमृज्यवाचंयमोभि
प्रमृज्यार्थंब्रवीतदूतंवाप्रहिणुयाल्लभेतेहैव॥ २ ॥अथातो
दैवस्मरोयस्यप्रियोबभूषेयस्यैवाएषांवैतषामेवैतस्मिन्पर्
वण्यग्निमुपसमाधायेतयैवावृतेताज्याहुतिर्जुहोतिवाचेतम

13
1970

यिजुहोम्यसौ स्वाहा प्राणंते मयिजुहोम्यसौ स्वाहा चक्षुस्ते मयिजु
होम्यसौ स्वाहा श्रोत्रं ते मयिजुहोम्यसौ स्वाहा मनस्ते मयिजुहोम्य
सौ स्वाहा प्रज्ञानं ते मयिजुहोम्यसौ स्वाहा इत्यथ धूमगंधं प्रजिघ्राया
ज्येलपनींगान्यनुविमृज्य वाचंयमोभिप्रमृज्य संस्पर्श्युं जिगमिषे
दपिवाताद्वा संभाषणास्तिष्ठेत् प्रियोहैव भवंति स्मरंतिहैव भवतिस्म
रंतिहैवास्मात् ॥ ३ ॥ अथातः सायमंनं प्रातर्दर्शन मंतरग्निहो
त्रमितिवाचक्षते यावद्वै पुरुषो भासते न तावत् प्राणितुं शक्नोति
प्राणं तदा वाचि जुहोति यावद्वै पुरुषः प्राणिति न तावद्भाषितुं श ६
क्नोति वाचं तदा प्राणेन जुहोत्येतेनं ते मृताहुतिर्जाग्रच्च स्वप्न

पंच सततमद्य वच्छिन्नं जुहोत्यथ या अन्या आहुतयो ऽंतवत्यस्ता:
कर्ममय्यो भवंत्येतद्धवै पूर्वे विद्वांसो ग्निहोत्रं जिह्वांचक्रुरथ कथं ब्र
ह्मेतिह स्माह शुष्कभृंगार मृगीत्यकपासीत सर्वाणि हास्मै भूतानि श्रै
ष्ठ्यायाभ्यर्चंतेन यजुरित्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय यु
ज्यंते न त्सामेत्यकपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय संनमंते तत
श्रीत्युपासीत तद्यश इत्यकपासीत तद्यथैतच्छास्त्राणां श्रीमत्तमं यश
स्वितमं तेजस्वितमं भवति यथैवैवं विद्वान्सर्वेषां भूतानां श्रीमत्तमो य
शस्वितमस्तेजस्वितमो भवति ॥ तमेतं मेष्टकं कर्ममयमात्मानमध्वर्यु:
संस्करोति तस्मिन्यद्धर्ममयं प्रवयति तद्धर्ममयत्वमयं होतर्मयं साम

15/1990

कौषीत
७

मथसुक्तातास एषसर्वस्यैत्रयीविद्ययाआत्मैषउतएवास्यात्मैतदा कौउ०
त्माभवतियएवंवेद॥ ४ ॥अथातःसर्वजितःकौषीतकीस्त्रीण्यु
पासनानिभवंतियज्ञोपवीतंकृत्वापआचम्यत्रीरुदपात्रंप्रसिच्योद्यं
तमादित्यमुपतिष्ठेघद्वर्गोसिपाप्मानंमेवृङ्धिद्वंधिवात्स्यैवैता म
ध्यसंतयद्वर्गोसिपाप्मानमंतर्द्धीवात्यैतैवावृतास्यंयंतंयद्वर्गोसिपा
प्मानमेसंवृत्तात्येतियदहोरात्राभ्यांपापंकरोतिसंतद्वृङ्क्तेथमासि
मास्यमावास्यायांपश्चाच्चंद्रमसंदृश्यमानमुपतिष्ठेतैतयैवावृताहृ
रिततृणाभ्यांवावृतस्यांवावृतस्याघलेस्वसीमंत्दद्यमसिचंद्रमसि ७
श्रितंतेनामृतत्वस्येशानंमावांपौत्रमघंरूहमितिसहास्मात्

पूर्वप्रजाःप्रयंतीतिनजातपुत्रस्याहृयमनमेनातु॥संनेपयांसिस्व 17
स्वयंतुराजायमादित्याअंशुमाप्याययंति॥तेतास्त्रिऋचोजपित्वा 1920
नास्माकंप्राणेनप्रजयापशुभिराप्यायथिष्ठायोस्मान्द्वेष्टियंच
वयंद्विष्मः तस्यप्राणेनप्रजयाप्रजयापशुभिराप्यायस्वेतिदैवीमा
वृतमावर्तआदित्यस्यावृतमन्वावर्तयतिदक्षिणंबाहुमन्वावर्त
ते॥ ५ ॥अथपूर्णमास्यांपुरस्ताच्चंद्रमसंदृश्यमानमुपतिष्ठेत
तयैवावृतासोमोराजासिविचक्षणःपंचमसुखोसिप्रजापतिःब्रा
ह्मणस्तएकंमुखंतेनमुखेनराज्ञोद्धीतिनमुखेनमामन्नादंकुरु
राजातएकंमुखंतेनमुखेनमामन्नादंकुरुश्येनयस्तएकं

कौषीत मुखंतेनमुखेनपक्षिणोद्धितिनमुखेनमामन्ववादंकुर्वग्निस्त कौ॰उ॰
८ एकंमुखंतेनमुखेनेमंलोकमधीत्तिनमुखेनमामन्ववादंकुरु
सर्वाणिभूतानि त्वेवपंचममुखंतेनमुखेनसर्वाणिभूतान्युद्धी
तेनमुखेनमामन्ववादंकुरूमास्माकंप्राणेनप्रजयापशुभिर
रक्षिष्टयोस्मान्द्वेष्टियंचवयंद्विष्मः तस्यप्राणेनप्रजयापशुभि
रपक्षीय्येवस्थितिर्दैवीमावृतमावृतमावर्त आदित्यस्यावृतम
न्वावर्तंतइतिदक्षिणंबाहुमन्वावर्ततेथसंवेश्यनुजायायेल्ह
दयमभिमृशेत् यत्तेस्वसीमेत्हृदयंहितमंतः प्रजापतौ॥म ८
न्येहंमांतद्विद्वान् संमाहंपौत्रमघंरुदामितिनहास्मात्पू

वोःप्रजाःप्रैति॥ ६ ॥अथप्रोष्यायनपुत्रस्यमूर्धानमभि 19
मृशेत्॥अंगादंगात्संभवसित्हृदयादधिजायसे॥आत्मानं 1970
पुत्रमाबाधसजीवशरदःशतं॥असावितिनामास्यगृह्णाति
माश्च्छित्था माव्यधिष्ठाशतंशरदआयुषोजीवपुत्रेतेनाम्नामूर्धा
नमभिजिघ्राम्यासावितित्रिभिर्मूर्धानमभिजिघ्रेगन्गवाला
हिंकारेणाभिहिंकरोमीतित्रिभिर्मूर्धानमभिहिंकुर्यात्॥७॥
अथातोदैवःपरिसरएतद्वैब्रह्मदीप्यते॥यदग्निर्ज्वलत्यथैतन्मृ
यतेयंनज्वलतितस्यादित्यमेवतेजोगच्छतिवायुंप्राणएतद्वैब्र
ह्मादित्येतयथामर्त्योदृश्यतेथैतन्मृयतेतयंनदृश्यतेतस्यचंद्रम

समेवतेजोगच्छतिवायुंप्राणएतद्वैब्रह्मदीप्यतेयद्विद्युद्विद्योततेथैत
न्म्रियतेयंनविद्योततेतस्यवायुमेवतेजोगच्छति॥वायुंप्राणस्तावा
एताःसर्वादेवतावायुमेवप्रविश्यवायौसृप्तानमूर्छंतेतस्माद्वैवपुनरु
दीरतइत्यधिदैवतमथाध्यात्ममेतद्वैब्रह्मदीप्यतेयद्वाचावदत्यथैत
न्म्रीयतेयंनवदतितस्यचक्षुरेवतस्यतेजोगच्छतिप्राणंप्राणएतद्वैब्र
ह्मदीप्यतेयच्चक्षुषापश्यत्यथैतन्म्रियतेयंनपश्यतितस्यश्रोत्रमेवते
जोगच्छतिप्राणंप्राणएतद्वैब्रह्मदीप्यतेयन्मनसाध्यायत्यथैतन्म्रियते
यंनध्यायतितस्यप्राणमेवतेजोगच्छतिप्राणंप्राणस्तावाएतास्सर्वा ९
देवताप्राणमेवप्रविश्यकृत्तानमूर्छंतेतस्माद्वैवपुनरूदीरतेतद्यदि

हवाएवंविद्वांसउभौपर्वतावभिप्रवर्तयातांतस्तृणममाणौदक्षि
णश्चोत्तरश्चनहैवेनस्तृण्वियातामथयएनंद्विषंतियांचस्वयंद्वेष्टि
तएनंसर्वपरितोमृयंते॥ ८ ॥अथातोनिश्रेयसाधानंसर्वाहवै
देवताहंश्रेयसेविवदमानादस्माच्छरीरादुच्चक्रमुस्तद्दारुभूतंशिष्य
अथैनंवाक्प्रविवेशतद्वाचावदच्छिष्यएवाथैनंचक्षुःप्रविवेशतद्वा
चावदच्चक्षुषापश्यच्छिष्यएवाथहैनंछ्रोत्रंप्रविवेशतद्वाचावदच्च
क्षुषापश्यच्छ्रोत्रेणाशृण्वच्छिष्यएवाथहैनंमनःप्रविवेशतद्वा
चावदच्चक्षुषापश्यच्छ्रोत्रेणाशृण्वन्मनसाध्यायच्छिष्यएवाथ
हैनंप्राणंप्रविवेशतत्तएवसमुत्तस्थौतद्देवाःप्राणेनिश्रेयसंविजि

21/1970

त्यप्राणमेवप्रज्ञानमभिस्त्रय: सहैतै: सर्वैरस्माल्लोकादुच्चक्रमुस्ते
वायुप्रतिष्ठाकाशात्मानस्वर्जयस्तथो एवैवंविद्वान् सर्वेषांभूतानां
प्राणमेवप्रज्ञात्मानमभिसंस्तूयसहैतै: सर्वैरस्माच्छरीरादुत्क्राम
तिसवायुमेवप्रतिष्ठाकाशात्मास्वरेतिसतद्भवतियत्रैतेदेवास्तत्
प्राप्यतदमृतोभवतियदमृताभवति॥ ९ ॥अथात: पितापुत्रीयं
संप्रदानमितिचाचक्षतेपितापुत्रंप्रेष्याह्वयतिनवैस्तृणैरागारंसं
स्तीर्याग्निमुपसमाधायोथकुंभंसपात्रमुपनिधायाहतेनवाससासं
प्रछन्नंत्यततत्पत्यपुत्रउपरिष्टदभिनिपद्यतइंद्रियैरस्येंद्रियाणि
संस्पृश्यापिवास्याभिमुखतएवासीताथास्मैसंप्रयछतिवाचंमे

त्वयिदधानीतिपितावाचंमेमयिदधइतिपुत्रश्चक्षुस्तेत्वयिदधा
नीतिपिताचक्षुस्तेमयिदधइतिपुत्र: श्रोत्रंतेत्वयिदधानीतिपिता
श्रोत्रंतेमयीदधइतिपुत्रो मनस्तेत्वयिदधानीतिपितामनस्तेत्वयि
दधइतिपुत्रअंनरसांस्तेत्वयिदधानीतिपिताअंनरसांस्तेमयिदध
इतिपुत्र: कर्माणितेत्वयिदधानीतिपिताकर्माणिस्तेमयिदधइति
पुत्र: सुखदु:खेमेत्वयिदधानीतिपितासुखदु:खेतेमयीदधइति
पुत्रआनंदंरतिंप्रजातिंमेत्वयिदधानीतिपिताआनंदंरतिंप्रजातिं
तेमयिदधइतिपुत्रइत्यामेत्वयिदधानीतिपिताइत्यास्तेमयिदध
इतिपुत्रोधियोविज्ञातव्यंकामान्मेत्वयिदधानीतिपिताधियोवि

23/1900

ज्ञातव्यं कामांस्त्ममयि दधइति पुत्रोथ दक्षिणाप्राक् परिक्रामति तं
पितानमंत्रयति यशो ब्रह्मवर्चसमन्नाद्यं कीर्तिस्त्वाजुषतामित्यथे
तरः सव्यमंसमन्ववेक्षते पाणिनांतर्द्धाय वसनांतेनु वाप्रच्छाद्य स्वर्गा
ल्लोकान् कामानवाप्नोति सयत्थेकतस्म्यात् पुत्रस्यैश्वर्ये पितावसे
कपरिवाप्रजेयुर्यद्युवे प्रियाज्यदेवैनं समापयति तथा स्मापयितव्यो
भवति॥ १० ॥इति ऋग्वेदांतर्गत कौषीतकी ब्राह्मणोपनिषद्द्वि
तीयोध्यायः॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७
श्रीगणेशाय नमः॥ अथ ऋग्वेदांतर्गत कौषीतकी उपनिषदारं ११
भः॥ भद्रंनो अपिवातय मनः॥ हरिः ॐ शांतिः शांतिः॥ ३ ॥

प्रतर्द्दनो ह वै दैवोदासिरिंद्रस्य प्रियं धामोपजगाम युध्धेन च पौरुषे
णाच॥ तं हेंद्र उवाच प्रतर्द्दन वरं ते ददामीति स होवाच प्रतर्द्दनस्त्वमे
वमेवरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति तं हेंद्र उवाच
नवैवरं परः परस्मै वृणीते त्वमेव वृणीष्वेत्य वरो वै तर्हि किल म इति
होवाच प्रतर्द्दनोथ खल्विंद्रः सत्यादेव नेयाय सत्यं हींद्रः स होवाच
मामेव विजानीह्येतदेवाहं मनुष्याय हिततमं मन्ये यन्मां विजानी
यास्त्रिशीर्षाणं त्वाष्ट्रमहन्मरुन्मुखान्यतीन्सालावृकेभ्यः प्रायच्छं
बह्वीः संधा अतिक्रम्य दिवि प्रल्हादादीनतृणमहमंतरिक्षे पौलोमा
न्पृथिव्यां कालकाश्यांस्तस्य मे तत्र न लोम च मीयते स यो मां विजानी 25/1970

कौषीत यांन्मास्यकेनचकर्मणालोकोमीयत्ते नमात्रवधेननपित्रवधेन कौउ०
१२ नस्तेयेननभ्रूणाहत्ययानास्यपापंचकृषोमुखंनीलंवेत्तीति सहो
वाचप्राणोस्मिन्प्रज्ञात्मातम्मामायुरमृतमित्युपास्व आयुःप्रा
णः प्राणोवाआयुः प्राणोवाआमृतं सयावत्यास्मिछरीरेप्राणोव
सतितावदायुः प्राणेनत्येवाः मुष्मिंल्लोकेमृतत्वमाप्नोति॥ १ ॥
प्रज्ञयासत्यसंकल्पंसयोमायुरमृतमित्युपास्तेसर्वमायुरस्मिंल्लो
कएत्याप्नोत्यमृतत्वमक्षितिंस्वर्गेलोकेतद्धैकआहुरेकभूयंवैप्राणा
गछंतीति नकश्चनशक्नुयात्सकृद्वाचानामप्रज्ञापयितुंचक्षुषारू १२
पंश्रोत्रेणशब्दंमनसाध्यातंमित्येकभूयंप्राणाएकैकंसर्वाण्येवैतानि

प्रज्ञापयंत्तिवाचंवदंतींसर्वेप्राणाअनुवदंतिचक्षुःपश्यत्सर्वेप्राणा 27/1970
आनुपश्यंतिश्रोत्रंशृण्वन्त्सर्वेप्राणाअनुशृण्वंति मनोध्यायन्त्स
र्वेप्राणाअनुध्यायंतिप्राणंप्राणंतिसर्वेप्राणाअनुप्राणतीत्येवमु
हैतदितिहेंद्रउवाच अस्तित्वेवप्राणानांनिःश्रेयसमितिजीवति॥
वागपेतोमूकान्हिपश्यामोजीवति चक्षुरपेतोंधान्हिपश्यामो
जीवतिबाकुछिन्नोजीवत्पुरुछिन्नइत्येवंहिपश्यामइत्यथखलुप्रा
णएवप्रज्ञात्मेदंपरिगृह्योत्थापयति॥ २ ॥तस्मादेतदेवोक्थमु
पासितयोवैप्राणःसाप्रज्ञायावाप्रज्ञासप्राणः सहत्येतावस्मिन्छ
रीरेवसतःसहोत्क्रामतःस्मेसैवदृष्टिरेतद्विज्ञानंयत्रैतत्पुरुषःसु

कोषीत त: स्वप्नं न कंचन पश्यति अथास्मिन्प्राण एवैकधा भवति तदेनं वाक् कौ०
१२ सर्वैर्नामभि: सहाप्येति चक्षु: सर्वै रूपै: सहाप्येति श्रोत्रं सर्वै: शब्दै: स
हाप्येति मन: सर्वैर्ध्यानै: सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्वि
स्फुलिंगा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मन: सर्वे प्राणा यथायतनं
विप्रतिष्ठंते प्राणेभ्यो देवा देवेभ्यो लोका: तस्यैषैव सिद्धिरेतद्विज्ञा
नं यत्रैतत्पुरुष आर्तो मरिष्यन्नबल्यं न्येति असंमोहमिवन्येति
तदाहुरुदक्रमीच्चित्तं न शृणोति न पश्यति न वाचा वदति अथास्मि
न्प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभि: सहाप्येति चक्षु: स १२
र्वै रूपै: सहाप्येति श्रोत्रं सर्वै: शब्दै: सहाप्येति मन: सर्वैर्ध्यानै: स

हाप्येति स यदा प्रतिबुध्यते यथाग्नेर्विस्फुलिंगा विप्रतिष्ठेरन्नेव
मेवैतस्मादात्मन: सर्वे प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो
देवा देवेभ्यो लोका: ॥ ३ ॥ स यदास्माच्छरीरादुत्क्रामति वाग
स्मात्सर्वाणि नामान्यभिविसृजते वाचा सर्वाणि नामान्याप्नो
ति स यदास्माच्छरीरादुत्क्रामति चक्षुरस्मात्सर्वाणि रूपाण्य
भिविसृजते चक्षुषा सर्वाणि रूपाण्याप्नोति प्राणोऽस्मात्सर्वा
न्गंधानभिविसृजते प्राणेन सर्वान्गंधानाप्नोति श्रोत्रमस्मात्स
र्वान्छब्दानभिविसृजते श्रोत्रेण सर्वाञ्छब्दानाप्नोति मनो
ऽस्मात्सर्वाणि ध्यानान्यभिविसृजते मनसा सर्वाणि ध्यानान्या

29/1970

 न्नोति सैषा प्राणे सर्वाप्तिः यो ह वै प्राणः सा प्रज्ञा या वा प्रज्ञा सः
प्राणः सह ह्येतावस्मिन्छरीरे वसतः सहोत्क्रामत
इत्यथ खलु यथास्यै प्रज्ञायै सर्वाणि भूतान्येकी भवंति तद्व्याख्या
स्यामः॥ ४ ॥वागेवास्या एकमंगमदूदुहत्तस्यै नाम परस्तात्प्र
तिविहिता भूतमात्रा प्राण एवास्या एकमंगमदूदुहत्तस्य गंधः प
रस्तात्प्रतिविहिता भूतमात्रा श्रोत्रमेवास्यां० तस्य शब्दः परस्तात्प्र
तिविहिता भूतमात्रा जिह्वैवास्या० तस्य रसः परस्तात्प्रतिविहिता
भूतमात्रा हस्तावेवास्या एक० तयोः कर्म परस्तात्प्रतिविहिता भू
तमात्रा शरीरमेवास्या ए० तस्य सुखदुःखे परस्तात्प्रतिविहिता भू १४

तमात्रा उपस्थमेवास्या एकमंगमदूदुहत्तस्यानंदो रतिः प्रजातिः 31
परस्तात्प्रतिविहिता भूतमात्रा पादावेवास्या ए० तयोरित्या परस्ता 1970
त्प्रतिविहिता भूतमात्रा प्रज्ञैवास्या ए० तस्यै धियो विज्ञातव्यं का
माः परस्तात्प्रतिविहिता भूतमात्रा॥ ५ ॥प्रज्ञया वाचं समारुह्य
वाचा सर्वाणि नामान्याप्नोति॥ प्रज्ञया घ्राणं समारुह्य घ्राणेन स
र्वान्गंधानाप्नोति॥ प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपा
ण्याप्नोति॥ प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वान्छब्दानाप्नोति॥
प्रज्ञया जिह्वां समारुह्य जिह्वया सर्वान्नन्नरसानाप्नोति॥ प्रज्ञया
हस्तौ समारुह्य हस्ताभ्यां सर्वाणि कर्माण्याप्नोति प्रज्ञया शरीरं समा

कौषीत रुत्यशरीरेणसुखदुःखेआप्नोति॥ प्रज्ञयाउपस्थंसमारुत्योपस्थे कौउ०
१५ नानंदंरतिंप्रजातिमाप्नोति॥ प्रज्ञयापादौसमारुत्यपादाभ्यांसर्वाइ
त्याआप्नोति॥ प्रज्ञयैवधीयंसमारुत्य प्रज्ञयैवधियाविज्ञातव्यं
कामानाप्नोति॥ ६ ॥प्रज्ञापेतावाङ्नामकिंचनप्रज्ञपयेदन्यत्रमे
मनोभूदित्याहनाहमेतन्नामप्रज्ञासिषमिति॥ नहिप्रज्ञापेतः प्रा
णोगंधंकंचनप्रज्ञपयेदन्यत्रमेमनोभूदित्याहनाहमेतंगंधंप्रज्ञा
सिषमिति॥ नहिप्रज्ञापेतंचक्षुरूपंकिंचनप्रज्ञपयेदन्यत्रमेमनो
भूदित्याहनाहमेतद्रूपंप्रज्ञासिषमिति॥ नहिप्रज्ञापेतंश्रोत्रंशब्दंकंच १५
नंप्रज्ञपयेदन्यत्रमेमनोभूदित्याहनाहमेतंशब्दंप्रज्ञासिषमिति॥

नहिप्रज्ञापेताजिह्वानरसंकंचनप्रज्ञपये० नाहमेतमन्नरसंप्रज्ञा
सिषमिति॥ नहिप्रज्ञापेतौहस्तौकर्मकिंचन प्रज्ञपयेदन्य० नाहमे
तत्कर्मप्रज्ञासिषमिति॥ नहिप्रज्ञापेतमुपस्थं आनंदंरतिंप्रजातिं
कांचनप्रज्ञपये० नाहमेतं आनंदंरतिंप्रजातिंप्रज्ञासिषमिति॥ न
हिप्रज्ञापेतौपादावित्यांकांचनप्रज्ञपयेदन्यत्र० नाहमेताविल्यांप्र
ज्ञासिषमिति॥ नहिप्रज्ञापेताधीः कांचनसिध्येत्॥ ७ ॥नप्रज्ञा
तव्यंविजिज्ञासीतप्रज्ञातारंविद्यात् नगंधंविजिज्ञासीतप्रातारंविद्या
त् नरूपंविजिज्ञासीतरूपविदंविद्यात् नशब्दंविजिज्ञासीतश्रोता
रंविद्यात् नान्नरसंविज्ञातारंविद्यात् नकर्मविजिज्ञासीतकर्तारं
~न्नरसंविजिज्ञासीता~

33/1970

कौषीत विद्यात् न सुखदुःखे विजिज्ञासीत सुखदुःखयोर्विज्ञातारं विद्यात् कौउ॰
१६ नानंदं न रतिं न प्रजातिं विजिज्ञासीत आनंदस्य रतेः प्रजातेर्विज्ञातारं
विद्यात् नेत्यां विजिज्ञासीतेतारं विद्यान्न मनो विजिज्ञासीत मंतारं
विज्ञाता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं
यदि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युर्यदि प्रज्ञामात्रा न स्युर्न भूत
मात्राः स्युर्नत्यन्यंतरेतो रूपं किंचन सिध्येन्नो एतन्नाना तद्यथा रथ
स्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्राणे
र्पिताः स एष प्राण एव प्रज्ञात्मा ऽनंदो ऽजरो ऽमृतो न साधुना कर्मणा भू १६
यान्नो एवासाधुना कनीयान्नेष ह्येवैनं साधु कर्म कारयति तं यमे

भ्यो लोकेभ्य उन्निनीषत्येष उ एवैनमसाधु कर्म कारयति तं यमे 35/1970
भ्यो लोकेभ्यो ऽधो निनीषत्येष लोकपाल एष लोकाधिपतिरेष लो
केशः स म आत्मेति विद्यात् स म आत्मेति विद्यात् ॥ ८ ॥ इति कौ
षीतकि ब्राह्मणोपनिषदि तृतीयो ऽध्यायः ॥ ॥ इति ऋग्वेदांतर्गत
कौषीतकि उपनिषद् समाप्तः ॥ भद्रं नो अपि वातय मनः ॐ शां
तिः शांतिः शांतिः ३ श्रीगणेशाय नमः ॥ ॥ ॐ गार्ग्यो
ह वै बालाकिरनूचानः संस्पष्ट आस सो ऽवसदुशीनरेषु सत्व
मत्सेषु कुरुपांचालेषु काशीविदेहेष्विति स हाजातशत्रुं काश्य
मेत्योवाच ब्रह्म ते ब्रवाणीति तं होवाचाजातशत्रुः सहस्रं दद्म ए

तस्यांवाचिजनकोजनकइतिवाउजनाधावंतीतिसहोवाचबाला
किर्यएवैषआदित्यपुरुषस्तमेवाहमुपासइति तंहोवाचाजातशत्रु
र्मामैतस्मिन्समवादयिष्ठाबृवन्पांडरवासाधिष्ठाः सर्वेषांभूता
नांमूर्ध्नेतिवाअहमेतमुपासतइतियोहेतमेवमुपास्तेधिष्ठास्सर्वे
षांभूतानांमूर्ध्नाभवतिसवाएषबालाकिर्यएवैषचंद्रमसिपुरुषंत
मेवाहंब्रह्मउपासइतितंहोवाचाजातशत्रुर्मामैतस्मिन्संदिष्ठास्सो
मोराजांनमस्यात्मेतिवाअहमेतमुपासइतिसयोहेतमेवमुपास्तेन
स्यात्माभवति।।सहोवाचबालाकिर्यएवैषविद्युतिपुरुषस्तमेवाहं
ब्रह्मोपासइतितंहोवाचाजातशत्रुर्मामेवैतस्मिन्समवादइष्ठास्तेज १७

स्यात्मेतिवाअहमेतमुपासइति सयोहेतमेवमुपास्तेतेजस्यात्माभव
ति।।सहोवाचबालाकिर्यएवैषस्तनयित्नौपुरुषंतमेवाहंब्रह्मोपास
इतितंहोवाचाजातशत्रुर्मामैतस्मिन्संवरिष्ठाःशब्दस्यात्मेतिवाअ
हमेतमुपासइतिसयोहेतमेवमुपास्तेशब्दस्यात्माभवति।। १ ।।
सहोवाचबालाकिर्यएवैषआकाशेपुरुषस्तमेवाहमुपासइतितं
तंहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठाःपूर्णमप्रवर्तिब्रह्मेति
वाअहमेतमुपासइतियोहेतमेवमेवमुपास्तेपूर्यतेप्रजयापशुभि
र्नैएवस्वयंनास्यप्रजापुराकालात्प्रवर्ततेसहोवाचबालाकिर्य
एवैषवायौपुरुषस्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामैत

37
1970

स्मिन् संवदिष्ठा इंद्रो वैकुंठो पराजितानेनेति वा अहमेतमुपास इति
सयो हैतमेवमुपास्ते जिष्णुर्हवैपराजिष्णुर्भवत्यन्यतस्त्यजायास्व
ति सहोवाच बालाकिर्य एवैषोग्नौ पुरुषस्तमेवाहमुपास इतितं
होवाचाजातशत्रुर्मामैतस्मिन्त्संवदिष्ठा एषासहिरिति वा अहमेत
मुपास इति स यो हैतमेवमुपास्ते एषासहिर्वा एष भवति॥ सहोवाच
बालाकिर्य एषोप्सु पुरुषस्तमेवाहमुपास इति तं होवाचाजातश
त्रुर्मामैतस्मिन्त्सुवदिष्ठा नाम्नस्यात्मेति वा अहमेतमुपास इति सयो
हैतमेवमुपास्ते नाम्नस्यात्मा भवतीत्यधिदैवतमथाध्यात्मं॥ २॥
सहोवाच बालाकिर्य एवैष आदर्शे पुरुषस्तमेवाहमुपास इति तं

होवाचाजातशत्रुर्मामैतस्मिन्त्संवदिष्ठाः प्रतिरूप इति वा अहमे 39/1970
तमुपास इति सयो हैतमेवमुपास्ते प्रतिरूपा हैवास्य प्रजायामाजा
यते नाप्रतिरूपः॥ सहोवाच बालाकिर्य एवैष प्रातिश्रुत्कायां
पुरुषस्तमेवाहमुपास इतितं होवाचाजातशत्रुर्मामैतस्मिन्त्सं
वदिष्ठा द्वितीयोनपग इति वा अहमेतमुपास इति सयो हैतमेवमु
पास्ते विंदते द्वितीयं द्वितीयवान् भवति॥ सहोवाच बालाकिर्य ए
वैष शब्दः पुरुषमन्वेति तमेवाहमुपास इति तं होवाचाजातशत्रु
र्मामैतस्मिन्त्संवदिष्ठा आयुरिति वा अहमेवतमुपास इति स
यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात्संमोहमेति॥

कौषीत॰ सहोवाचबालाकिर्यएवैषछायायांपुरुषस्तमेवाहमुपासइति कौउ०
१९ तंहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठामृत्युरितिवाअहमे
तमुपासइतिसयोहैतमेवमुपास्तेनोएवस्वयंनास्यप्रजापुरा
कालात्प्रमीय्यते॥ ३ ॥सहोवाचबालाकिर्यएवैषशारी
रःपुरुषस्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामैवैत
स्मिन्त्संवदिष्ठाःप्रजापतिरितिवाअहमेतमुपासइतिसयो
हैतमेवमुपास्तेप्रजायतेप्रजयापशुभिः॥सहोवाचबाला
किर्यएवैषप्राज्ञआत्माएनेतत्सुप्तःस्वप्न्याचरतितमेवाहम् १९
मुपासइतितंहोवाचाजातशत्रुर्मामैतस्मिन्संवदिष्ठायमो

राजेतिवाअहमेवतमुपासइति सयोहवैतमेवमुपास्तेसर्वंह्यस्माइ
दंश्रैष्ठ्याययम्यते॥सहोवाचबालाकिर्यएवैषदक्षिणेक्षिन्पुरुष
स्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामैवैतस्मिन्वदिष्ठाना
म्नआत्माग्नेरात्माज्योतिषआत्मेवाअहमेतमुपासइतिसयोहैतमे
वमुपास्तएतेषांसर्वेषामात्माभवति॥सहोवाचबालाकिर्यएवैषस
व्यक्षन्पुरुषस्तमेवाहमुपासइतितंहोवाचाजातशत्रुर्मामैवैतस्मि
न्संवदिष्ठास्सत्यस्यात्माविद्युतआत्मातेजसआत्मेतिवाअहमेतमु
पासइतिसयोहैतमेवमुपास्तेएतेषांसर्वेषांआत्माभवति॥ ४ ॥न
तइहबालाकिस्तूष्णीमासतंहोवाचाजातशत्रुःएतावन्नूबालाकाइ

41/1970

कौषीत तिएतावद्धीतिहोवाचबालाकिस्तंहोवाचाजातशत्रुर्मृषावैकिलमा कौ०उ०
२० संवदिष्ठाब्रह्मतेब्रवाणीतिसहोवाचयोवैबालाकएतेषांपुरुषाणांक
र्तायस्यवैतत्कर्मसवैवेदितव्यतइतिततउहबालाकिःसमित्पा
णिःप्रतिचक्रामोपइत्यायानीतितंहोवाचाजातशत्रुःप्रतिलोमरू
पमेवस्याद्यत्क्षत्रियोब्राह्मणमुपनयेदेहिव्येवत्वाज्ञपयि
ष्यामीतितंहपाणावभिपद्यप्रवव्राजतौहसुप्तंपुरुषमीयतुस्तंहाजा
तशत्रुरामंत्रयांचक्रेबृहत्पांडरवासःसोमराजन्नितिसहतूष्णी
मेवशिश्ययततउहैनंयष्ट्याविचिक्षेपसततएवसमुत्तस्थौतंहोवाचा २०
जातशत्रुःक्वैषएतद्बालाकेपुरुषोशयिष्टयत्रैतदभूद्यतएतदगा

दितितदुहबालाकिर्नविजिज्ञौ॥ ५ ॥तंहोवाचाजातशत्रुःयत्रै 43
वैषएतद्बालाकेपुरुषोशयिष्टयत्रैतदभूद्यतएतदगाद्धितानाम 1970
हृदयस्यनाड्योहृदयात्पुरीततमभिप्रतन्वंयथासहस्रधाके
शविनिपतितस्तावदण्व्यःपिंगलस्याणिम्नातिष्ठंतेशुक्लस्यकृष्ण
स्यपीतस्यलोहितस्येतितासुतदाभवतियदासुप्तःस्वप्नंनकंचनप
श्यत्यथास्मिन्प्राणएवैकधाभवतितथैनंवाक्सर्वैर्नामभिःस
हाप्येतिचक्षुःसर्वैरूपैःसहाप्येतिश्रोत्रंसर्वैःशब्दैःसहाप्येतिमनः
सर्वैर्ध्यातैःसहाप्येतिसयदाप्रतिबुध्यतेयथाग्नेर्विस्फुलिंगाविप्र
तिष्ठेरन्नेवमेवैतस्मादात्मनःप्राणायथायतनंविप्रतिष्ठंतेप्रा

कौषीत पोभ्योदेवा देवेभ्यो लोकास्तद्यथाक्षुरः क्षुरधाने वलं हितः स्याद्वि कौउ०
२१ श्वंभरोवाविश्वंभरकुलाय एवमेवैषप्राज्ञ आत्मेदंशरीरमनुप्र
विष्ट आलोमभ्य आनखेभ्यः॥ ६ ॥तमेतमात्मानमेतमात्मनो
न्वपश्यंतियथाश्रेष्ठिनं स्वास्तद्यथाश्रेष्ठीस्वैः भुंक्तेयथावाश्रेष्ठि
नंस्वाभुंजत एव इंद्र एतमात्मानंनवजिज्ञौ तावदेनमसुरा अभिव
भूवुः सयदाविजिज्ञावदहन्यत्वासुरान्विजित्य सर्वेषांदेवानांश्रे
ष्ठ्यं स्वाराज्यमाधिपत्यंपरिय्यायतथा एवैवंविद्वान् सर्वान्पाप्म
नोपहत्य सर्वेषांश्रेष्ठ्यंराज्यमाधिपत्यंभूतानांपर्येतियएवंवे २१
द॥ ७ ॥इतिऋग्वेदांतर्गत कौषीतकीब्राह्मणोपनिषद

कौषीत चतुर्थोध्यायः॥ ॥इति कौषीतक्युपनिषत्समाप्तः॥ ७२४ कौउ०
२२ शके१७ ५५ विजयनामसंवत्सरे अधीकभाद्रपदशु०५ पुस्तकं
145/1970

२२

॥इतिकौषीतकीउपनिषत्समाप्तः॥

47
1970

अथत्रिपाद्विभूतिमहानारायणोपनिषत्

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

श्रीगणेशायनमः ॐभद्रंकर्णेभिरितिशांतिः अथपर
मतत्वरहस्यंजिज्ञासुःपरमेष्ठीदेवमानेनसहस्रसंवत्सरंतप
श्चचारसहस्रवर्षेतितेत्सुग्रतिव्रतपसाप्रसंनंभगवंतंमहावि
ष्णुंब्रह्मापरिपृछति भगवन्परमतत्वरहस्यंमेब्रूहीति परम
तत्वरहस्यवक्तात्वमेवनान्यःकश्चिदस्तितत्कथमितितंदेवोव्य
तेत्वमेवसर्वज्ञस्त्वमेवसर्वशक्तिस्त्वमेवसर्वाधारस्त्वमेवसर्वस्वरूप
स्त्वमेवसर्वेश्वरस्त्वमेवसर्वप्रवर्तकस्त्वमेवसर्वपालकस्त्वमेवसर्व। १
निवर्तकस्त्वमेवसर्वनिर्वर्तकस्त्वमेवसदसदात्मकस्त्वमेवसदस

द्विलक्षणस्त्वमेवांतर्बहिर्व्यापकस्त्वमेवातिसूक्ष्मतरस्त्वमेवाति 49/1970
महतोमहीयान्स्त्वमेवमहामूलाविद्याविवर्तकस्त्वमेवसर्वमू
लाविद्यानिवर्तकस्त्वमेवाविद्याविहारस्त्वमेवाविद्याधारस्त्वमेव
विद्यावेद्यस्त्वमेवविद्यास्वरूपस्त्वमेवविद्यातीतस्त्वमेवसर्वकारण
हेतुस्त्वमेवसर्वकारणसमष्टिस्त्वमेवसर्वकारणव्यष्टिस्त्वमेवाखं
डासनस्त्वमेवपरिपूर्णानंदस्त्वमेवनिरतिशयानंदस्त्वमेवतुर्यतु
र्यस्त्वमेवतुर्यातीतस्त्वमेवानंतोपनिषद्विमृग्यस्त्वमेवाखिलशास्त्रैर्वि
मृग्यस्त्वमेवब्रह्मेशानपुरंदरपुरोगमैरखिलामरैरखिलागमैर्वि

त्रिपा.

मृग्यस्त्वमेव सर्वमुमुक्षुभिर्विमृग्यस्त्वमेवामृतमयैर्विमृग्यस्त्वमेवा उप.
मृतमयस्त्वमेवामृतमयस्त्वमेवामृतमयस्त्वमेव सर्वत्वमेव सर्वत्व
मेव सर्वं त्वमेव मोक्षः त्वमेव मोक्षदः त्वमेवाखिलमोक्षसाधनं
न किंचिदस्ति त्वद्व्यतिरिक्तं त्वद्व्यतिरिक्तं यत्किंचित् प्रतीयते तत्स
र्वं भाधितमिति निश्चितं तस्मात्त्वमेव वक्ता त्वमेव गुरुः त्वमेव पि
ता त्वमेव सर्वनियंता त्वमेव सर्वं त्वमेव सदा ध्येय इति सुनिश्चितः प
रमतत्त्वज्ञस्तमुवाच महाविष्णुरतिप्रसन्नो भूत्वा साधु साध्विति ॥ २
साधुप्रशंसापूर्वकं सर्वपरमतत्त्वरहस्यं ते कथयामि सावधानेन

श्रुणु ब्रह्मन् देवदर्शीत्याख्याथर्ववशाखायां परमतत्त्वरहस्याख्या
थर्वणमहानारायणोपनिषदि गुरुशिष्यसंवादः पुरातनः प्रसि
द्धतया जागर्ति पुरातनतत्स्वरूपज्ञानेन महांतस्सर्वे ब्रह्मभावं गताः
यस्य श्रवणेन सर्वबंधाः प्रविनश्यंति यस्य ज्ञानेन सर्वरहस्यं विदि
तं भवति तत्स्वरूपं कथमिति शांतो दांतो तिविरक्तस्सुशुद्धो गु
रुभक्तस्तपोनिष्ठशिष्यो ब्रह्मनिष्ठं गुरुमासाद्य प्रदक्षिणपूर्वकं दं
डवत्प्रणम्य प्रांजलिर्भूत्वा विनयेनोपसंगम्य भगवन् गुरो मे पर
मतत्त्वरहस्यं विविच्य वक्तव्यमिति अत्यादरपूर्वकमतिहर्षेण शि

51
1970

ष्यं बहूकृत्य गुरुर्वदति परमतत्त्वरहस्योपनिषत्क्रमः कथ्यते सा
वधानेन श्रूयतां कथंब्रह्मकालत्रयाबाधितं ब्रह्मसर्वकालाबा
धितं ब्रह्मसगुणनिर्गुणस्वरूपंब्रह्म आदिमध्यांतशून्यंब्रह्म
सर्वंखल्विदं ब्रह्म मायातीतगुणातीतंब्रह्मअनंताप्रमेयाखंडपरि
पूर्णंब्रह्म अद्वितीयपरमानंदशुद्धबुद्धमुक्तसत्यस्वरूपव्यापका
भिन्नापरिछिन्नंब्रह्म सच्चिदानंदस्वप्रकाशंब्रह्म मनोवाचामगो
चरंब्रह्म अखिलप्रमाणागोचरंब्रह्म अमितवेदांतवेद्यंब्रह्म २
देशतःकालतोवस्तुतःपरिछेदरहितंब्रह्म सर्वपरिपूर्णंब्रह्म तु

रीयं निराकारमेकंब्रह्म अद्वैतमनिर्वाच्यंब्रह्म प्रणवात्मकंब्र
ह्म प्रणवात्मकत्वेनोक्तंब्रह्म प्रणवाद्यखिलमंत्रात्मकंब्रह्म पा
दचतुष्टयात्मकंब्रह्म किंतत्पादचतुष्टयंभवति अविद्यापाद
स्तुविद्यापादश्चानंदपादस्तुरीयपादश्चेति तुरीयपादस्तुरीयतु
रीयतुरीयातीतंच कथंपादचतुष्टयस्यभेदः अविद्यापादःप्रथ
मःपादोविद्यापादोद्वितीयआनंदपादस्तृतीयस्तुरीयपादस्तुरी
यइति मूलाविद्याप्रथमपादेनान्यत्र विद्यानंदतुरीयांशाःस
र्वेषुपादेषुव्याप्यतिष्ठंति एवंतर्हिविद्यादीनांभेदःकथमिति त

53/1970

ततूप्राधान्येनतत्तद्व्यपदेशोवस्तुतस्त्वभेदएव तत्राधस्खनमेकं
पादचतुष्टयात्मकंब्रह्म किंतत्पादचतुष्टयंभवति अविद्या
पादस्तुविद्यापादश्चानंदपादस्तुरीयपादश्चेति तुरीयपादस्तु
रीयतुरीयतुरीयातीतंच कथंपादचतुष्टयस्यभेदः अविद्या
पादःप्रथमःपादोविद्यापादोद्वितीयआनंदपादस्तृतीयस्तुरी
यपादस्तुरीयइति मूलाविद्याप्रथमपादेनान्यत्र विद्यानंदतुरी
यांशाःसर्वेषुपादेषुव्याप्यतिष्ठंति एवंतर्हिविद्यादीनांभेदःक ४
थमिति तत्तत्प्राधान्येनतत्तद्व्यपदेशोस्तुतस्त्वभेदएव तत्राध

स्खनमेकंपादमविद्याशबलंभवति उपरितनपादत्रयंशुद्धबोधा
नंदलक्षणममृतंभवति तच्चलौकिकपरमानंदलक्षणाखंडामि
ततेजोराशिर्ज्वलति तच्चानिर्वाच्यमनिर्देश्यमखंडानंदैकरसा
त्मकंभवति तत्रमध्यमपादंमध्यप्रदेशेअमिततेजःप्रवाहाका
रतयानित्यवैकुंठंविभाति तच्चनिरतिशयानंदाखंडब्रह्मानंदनि
जमूर्त्याकारेणज्वलति अपरिच्छिन्नमंडलानियथादृश्यंते तद
दखंडानंदामितवैष्णवदिव्यतेजोराश्यंतर्गतविलसन्महाविष्णोः
परमपदंविराजते दुग्धोदधिमध्यस्थितामृतामृतकलशादेरमेवं

55/1970

धामपरमंसंदृश्यते सुदर्शनदिव्यतेजोंतर्गतस्सुदर्शनपुरुषोयथा ॥
सूर्यमंडलांतर्गतस्सूर्यनारायण अमितापरिच्छिन्नाद्वैतपरमानंद
लक्षणतेजोराश्यंतर्गतआदिनारायणस्तथासंदृश्यते सएवतुरीयब्र
ह्म सएवतुरीयातीतस्सएवविष्णुस्सएवसमस्तब्रह्मवाचकवाच्यः
सएवपरंज्योतिस्सएवमायातीतस्सएवगुणातीतस्सएवकालाती
तस्सएवाखिलकर्मातीतस्सएवसत्वोपाधिरहितस्सएवपरमेश्व
रस्सएवचिरंतनःपुरुषःप्रणवाद्यखिलमंत्रवाचकवाच्यआद्यंतशू
न्यआदिदेशकालवस्तुतुरीयसंज्ञानित्यपरिपूर्णःसत्यसंकल्पआ

त्मारामःकालत्रयाबाधितनिजस्वरूपस्स्वयंज्योतिःस्वयंप्रकाशमय 57/1970
स्वसमानाधिकरणशून्यःस्वसमानाधिकरणशून्योनदिवारात्रिवि
भागोनसंवत्सरादिकालविभागस्वानंदमयानंताचिंत्यविभवआ
त्मांतरात्मापरमात्माज्ञानात्मातुरीयात्मेत्यादिवाचकवाच्यअद्वैतप
रमानंदोविभुर्नित्योनिष्कळंकोनिर्विकल्पोनिरंजनोनिराख्यातश्शु
द्धोदेवएकोनारायणोनद्वितीयोस्तिकश्चिदितियएवंवेदसपुरुषस्त
दियोपासनयातस्यसायुज्यमेत्यसंशयमित्युपनिषत् इत्यथर्वण
महानारायणोपनिषदिपादचतुष्टयस्वरूपनिरूपणंनामप्रथ॥

त्रिपा. मोध्यायः अथेत्तिहोवाचब्राह्मोगुरुंभगवंतुभगवन्वैकुंठ उप.
स्यनारायणस्यच नित्यत्वमुक्तं सएव तुरीयमित्युक्तमेव वैकुं
ठस्साकारो नारायणस्साकारश्च तुरीयं तु निराकारं साकारः
स्सावयवो निरवयवं निराकारं तस्मात् साकरमनित्यं नित्यं नि
राकारमिति श्रुतेः यद्यत् सावयवं तत्तदनित्यमित्यनुमानाच्चेति
प्रत्यक्षेण दृष्टत्वाच्च अतस्तयोरनित्यत्वमेव वक्तुमुचितं भवः
ति अथमुक्तं नित्यत्वमिति तुरीयमक्षरमिति श्रुतेः तुरीय ६
स्य नित्यत्वं प्रसिद्धं नित्यत्वानित्यत्वे परस्परविरुद्धधर्मौ तः

योरेकस्मिन् ब्रह्मण्यत्यंतविरुद्धं भवति तस्मात् वैकुंठस्यच नारा
यणस्य चानित्यत्वमेव वक्तुमुचितं भवति सत्यमेव भवतीति देश
कः परिहरति साकारस्तु द्विविधः सोपाधिको निरुपाधिकश्च
तत्र सोपाधिकः साकारः कथमिति अविद्यकमखिलकार्यका
रणजालमविद्यापाद एव नान्यत्र तस्मात् समस्ताविद्योपाधि
स्साकारस्सावयव एव सावयवत्वादावश्यकमनित्यं भवत्येव सो
पाधिकसाकारो वर्णितः तर्हि निरुपाधिकसाकारः कथमिति
निरुपाधिकसाकारस्त्रिविधः ब्रह्मविद्यासाकारश्चानंदसाका

A 57
1170

रउभयात्मकसाकारश्चेति त्रिविधसाकारोपिपुनर्द्विविधोभव
ति नित्यसाकारोमुक्तसाकारश्चेति नित्यसाकारस्त्वाद्यंतशू
न्यः शाश्वतः उपासनयायेमुक्तिंगतास्तेषांसाकारोमुक्तसाका
रः तस्याखंडज्ञानेनाविर्भावोभवति सोपिशाश्वतः मुक्तसा
कारस्त्वैच्छिकइत्येकेन्येवदंति शाश्वतत्वंकथमिति अद्वैताखं
डपरिपूर्णनिरतिशयपरमानंदशुद्धबुद्धमुक्तसत्यात्मकब्रह्म
चैतन्यसाकारत्वात् निरुपाधिकसाकारस्यनित्यत्वंसिद्धमेव ७
तस्मादेवनिरुपाधिकसाकारस्यनिरवयवत्वात्सावधिकमविद्द्

रतोनिरस्तमेव निरवयवंब्रह्मचैतन्यमिति सर्वोपनिषत्सु
सर्वशास्त्रसिद्धांतेषुश्रूयते अथचविद्यानंदतुरीयाणामभे
दएवश्रूयतेसर्वत्र विद्यादिसाकारभेदःकथमिति सत्यमेवोक्त
मितिदेशिकःपरिहरति विद्याप्राधान्येनविद्यासाकारः आ
नंदप्राधान्येनानंदसाकारः उभयप्राधान्येनोभयात्मकसाका
रश्चेति प्राधान्येनाभ्भेदएवभूयोवस्तुतस्तभेदएव भगवंन
खंडाद्वैतपरमानंदलक्षणपरंब्रह्मणस्साकारनिराकारौविरुद्ध
धर्मौ विरुद्धोभयात्मकत्वंकथमिति सत्यमेवतिगुरुःपरिहर

59
1970

ति यथासर्वगतस्य निराकारस्य महावायोश्चतादात्मकस्यत्व-
र्तुपतित्वेन प्रसिद्धस्य साकारस्य महावायुदेवस्य चाभेद एव श्रू-
यते सर्वत्र यथा पृथिव्यादीनां व्यापकशरीराणां देवशेषाणां
च तद्विलक्षणतदभिन्नव्यापकापरिच्छिन्ननिजमूर्त्याकारदेवता
श्रूयते सर्वत्र तद्वत् परंब्रह्मणः सर्वात्मकस्य साकारनिराकारभे-
दविरोधो नास्त्येव विविधविचित्रानंतशक्तेः परंब्रह्मणस्वरूपज्ञा
नेन विरोधो न विद्यते तदभावे सत्यनंतविरोधो विभाति अथ-
च राम कृष्णाद्यवतारेष्वप्यद्वैतपरमानंदलक्षणपरंब्रह्मणः

परमतत्त्वपरमविभवानुसंधानं स्वीयत्वेन श्रूयते सर्वत्र सर्वपरि
पूर्णस्याद्वैतपरमानंदलक्षणपरंब्रह्मणस्तु किं वक्तव्यं अन्यथास
र्वपरिपूर्णस्य परंब्रह्मणः परमार्थतः साकारं विना केवलनिरा
कारत्वं यद्यभिमतं तर्हि केवलनिराकारस्य गगनस्येव परंब्रह्मणो
पि जडत्वमापाद्यते तस्मात् परंब्रह्मणः परमार्थतः सकारनिरा
कारौ स्वभावसिद्धौ तथाविधस्याद्वैतपरमानंदलक्षणस्यादि-
नारायणस्योन्मेषनिमेषाभ्यां मूलाविद्योदयस्थितिर्जायंते क
दाचित् दासारामस्याखिलपरिपूर्णस्यादिनारायणस्य स्वेच्छानुसा

61/1970

त्रिपा॰ रणोन्मेषोजायते तस्मात् परंब्रह्मणोधस्तनपादेसर्वकारण उप॰
व्यक्ताविर्भावोभवति अव्यक्तान्मूलाविर्भावोमूलाविद्याविर्भा
वतस्मादेवसच्छब्दवाच्यंब्रह्माविद्याशबलंभवति ततोमहत्
महतोहंकारः अहंकारात्पंचतन्मात्राणि पंचतन्मात्रेभ्यःपं
चमहाभूतानि पंचमहाभूतेभ्योब्रह्मैकपादंव्यासं एकमवि
द्यांडंजायते तत्रतत्वतोगुणातीतशुद्धसत्वमयालीलागृही
तनिरतिशयानंदलक्षणोमायोपाधिकोनारायणआसीत् ॥ १
सएवनित्यपरिपूर्णः पादविभूतिवैकुंठनारायणः सचानंत

शीर्षापुरुषानंताक्षिपाणिपादोभवति अनंतश्रवणःसर्वमा
वृत्यतिष्ठति सर्वव्यापकोभवति ज्ञानबलैश्वर्यशक्तितेजस्वरू
पोभवति विविधविचित्रानंतजगदाकारोभवति निरतिशय
निरंकुशसर्वज्ञसर्वशक्तिसर्वनियंतृत्वाद्यनंतकल्याणगुणाका
रोभवति वाचामगोचरानंतदि--तेजोराश्याकारोभवति सम
स्ताविद्यांडव्यापकोभवति सचानंतमहामायाविलासानामधि
ष्ठानविशेषनिरतिशयाद्वैतपरमानंदलक्षणपरंब्रह्मविलास
विग्रहोभवति अस्यैकैकरोमकूपांतरेष्वनंतकोटिब्रह्मांडानि॥

त्रिपा॰ स्थावराणि च जायंते तेष्वंडेषु सर्वेष्वेकैक नारायणावतारो जायते नारायणाद्धिरण्यगर्भो जायते नारायणादंड विराट् स्वरूपो जायते नारायणादखिललोकस्रष्ट्र प्रजापतयो जायंते नारायणादेकादश रुद्राश्च जायंते नारायणाच्च सर्व देवाश्च जायंते नारायणाद्वादशादित्यास्सर्वे वसवस्सर्व ऋषयस्सर्वाणि भूतानि सर्वाणि छंदांसि नारायणादेव समुत्पद्यंते नारायणात्प्रवर्तंते नारायणे प्रलीयंते अथ नित्योक्षरः परमस्वराट् ब्रह्मा नारायणः शिवश्च नारायणः शक्रश्च नारायणः दिशाश्च नारायणः विदि उप॰ १०

शश्च नारायणः कालश्च नारायणः कर्माखिलं च नारायणः मूर्तामूर्तं च नारायणः कारणात्मकं सर्वं कार्यात्मकं सकलं नारायणः तदुभय विलक्षणो नारायणः परंज्योतिस्स्वप्रकाशमयः ब्रह्मानंदमयः नित्यो निर्विकल्पो निरंजनो निराख्यातः शुद्धो देव एको नारायणः न द्वितीयोस्ति कश्चित् न स नाधिकरत्व संशयं परमार्थतो य एवं वेद सकलबंधान् छित्वा मृत्युं तीर्त्वा स मुक्तो भवति य एवं विदित्वा सदा तमुपास्ते पुरुषस्स नारायणो भवति स नारायणो भवतीत्युपनिषत् इत्यथर्वण महानारा

65
1970

त्रिपा· यणोपनिषदि परब्रह्मणस्साकारनिराकारस्वरूपनिरूपणंनाम उप·
द्वितीयोध्यायः २ अथच्छात्रस्तथेति होवाच भगवन्देशिक
परमतत्त्वज्ञसविलासमहामूलाविद्योदयक्रमः कथितः तदुप्र
पंचोत्पत्तिक्रमः कीदृशो भवति विशेषेण कथनीयः तस्य तत्त्वंवे
दितुमिच्छामि तथेत्युक्त्वा गुरुरित्युवाच तथानादिसर्वप्रपंचोदृश्य
ते नित्योनित्योवेति संशायते प्रपंचोपि द्विधः विद्याप्रपंचश्चावि
द्याप्रपंचश्चेति विद्याप्रपंचस्य नित्यत्वंसिद्धमेव नित्यानंदचिद्वि ११
लासात्मकत्वात् अथचतुद्धबुद्धमुक्तसत्यानंदस्वरूपत्वाच्च अ

विद्याप्रपंचस्यनित्यत्वमनित्यत्वंवा कथमिति प्रवाहतानित्यत्वं 67
वदंतिकेचन प्रलयादिकंश्रूयमाणत्वादनित्यंवदंत्यन्ये उभयं 1770
नभवति पुनः कथमिति संकोचविकासात्मकमहामायाविला
सात्मकएवसर्वोप्यविद्याप्रपंचः परमार्थतोनकिंचिदस्तिक्षणभ्र
न्यानादिमूलाविद्यापलासत्वात् तत्कथमिति एकमेवाद्वितीयं
ब्रह्म नेहनानास्तिकिंचन तस्मात् ब्रह्मव्यतिरिक्तंसर्वंबाधितमेव।
सत्यमेवपरंब्रह्म सत्यंज्ञानमनंतंब्रह्म ततः सविलासमूलावि
द्योपसंहारक्रमः कथमिति अत्यादरपूर्वकमतिहर्षेण देशिको

पदिशति चतुर्युगसहस्राणि ब्रह्मणो दिवा भवति तावता का ५१॰
लेन पुनस्तस्य रात्रिर्भवति द्वे अहोरात्रे एकदिनं भवति तस्मिंने
कस्मिं दिने आसत्यलोकानामुदयस्थितिलया जायंते पंचदशादि
नानि पक्षो भवति पक्षद्वयं मासो भवति मासद्वयमृतुर्भवति
ऋतुत्रयमयनं भवति अयनद्वयं वत्सरो भवति वत्सरशतं ब्रह्म
मानेन ब्रह्मणः परमायुः प्रमाणं तावत्कालं तस्य स्थितिरुच्यते स्थि
त्यंते अंडविराट्पुरुषस्वांशं हिरण्यगर्भमभ्येति हिरण्यगर्भः स ३२
कारणं परमात्मानमंडपरिपालकनारायणमभ्येति पुनर्वत्सर

शतं तस्य प्रळयो भवति तथा जीवास्सर्वे प्रकृतौ प्रलीयंते प्रळ 69/1970
ये सर्वशून्यं भवति तस्य ब्रह्मणः स्थितिप्रळयावादिनारायण्यां
शेनावतीर्णस्याजांडपरिपालकस्य महाविष्णोः होरात्रसंज्ञको
ते अहोरात्रे एकदिनं भवति एवं दिनपक्षमाससंवत्सरादिभे
दाश्च तद्दीय्यमानेन शतकोटिसंवत्सरकालः तस्य स्थितिरित्यु
च्यते स्थित्यंते स्वांशं महाविराट्पुरुषमभ्येति ततः सावर
णं ब्रह्मांडं विनाशमभ्येति ब्रह्मांडावरणा विनश्यति तस्य वि
ष्णोः स्वरूपं तस्य तावत् प्रळयो भवति प्रळये सर्वशून्यं भवति

अंडपरिपालकमहाविष्णोःस्थितिप्रळयावादिविराट्पुरुषस्या
होरात्रिसंज्ञिको तेअहोरात्रेएकदिनंभवति एवंदिनपक्ष
माससंवत्सरादिभेदाश्च तदीयमानेनशतकोटिसंवत्सरका
लस्तस्यस्थितिरुच्यते स्थित्यंतेआदिविराट्पुरुषःस्वांशंमायो
पाधिकनारायणमभ्येति तस्यविराट्पुरुषस्ययावत्स्थिति
कालःतावत्प्रळयोभवति प्रळयेसर्वशून्यंभवति विराट्स्थि
तिप्रळयोमूलाविद्यांडपरिपालकस्यादिनारायणस्याहोरा ३२
त्रसंज्ञिको तेअहोरात्रेएकदीनंभवति एवंदिनपक्षमास

संवत्सरादिभेदाश्च तदीयमानेनतस्यशतकोटिसंवत्सरका
लस्तस्यस्थितिरुच्यते स्थित्यंतेत्रिपाद्विभूतिनारायणस्यछाव
शांनिमेषोजायते तन्मूलाविद्यांडस्यसावरणस्यविलयोभ
वति ततःसविलासमूलाविद्यासर्वकार्योपाधिसमन्विता
सदसद्विलक्षणानिर्वाच्यालक्षणशून्याविर्भावतिरोभावा
त्मिकानाद्यखिलकारणानंतमहामायाविशेषेणविशेषिता
परमसूक्ष्ममूलकारणमव्यक्तंविशति अव्यक्तंविशेनुब्रह्म
णि निरिंधनोवैश्वानरोयथातस्मान्मायोपाधिकआदिनार

71
1970

त्रिपा॰ यणास्तथास्वस्वरूपंभजति सर्वेजीवाश्चस्वस्वरूपंभजंत य उप॰
थाजपाकुसुमसांनिध्याद्रक्तस्फटिकप्रतीतिः तदभावेशुद्धस्फ
टिकप्रतीतिः ब्रह्मणोपिमायोपाधिवशात्सगुणपरिछिंना
दिप्रतीतिः उपाधिवलयांनिर्गुणनिरवयवादिप्रतीतिरित्यु
पनिषत् इत्यथर्वणमहानारायणोपनिषदिमूलाविद्या
प्रळयस्वरूपनिरूपणंनामतृतीयोध्यायः ३ ततस्त
स्मांनिर्विशेष्यमतिनिर्मलंभवति अविद्यापारमतिशुद्धंभव २४
ति शुद्धबोधानंदलक्षणकैवल्यंभवति ब्रह्मणःपादचतुष्ट॰

यंनिर्विशेषंभवति अखंडलक्षणाखंडपरिपूर्णसच्चिदानंदस्व
प्रकाशंभवति अद्वितीयमनीश्वरंभवति अखिलकार्यका
रणस्वरूपंअखंडचित्घनानंदअतिदिव्यमंगळाकारंनिरति
शयानंदतेजोराशिविशेष सर्वपरिपूर्णानंतचिन्मयस्तंभाका
रं शुद्धबोधानंदविशेषाकारं अनंतचिद्विलासविभूतिसम
ष्टयाकारं अद्भुतानंदाश्चर्यविभूतिविशेषाकारं अनंतपरि
पूर्णानंददिव्यसौधामिनीनिचयाकारं एवमाकारद्वितीयाखंडा
नंदब्रह्मस्वरूपंनिरूपितं अथश्चाश्रोवदति भगवन्पादभे

73
1970

दादिकंकथं कथमद्वैतस्वरूपमितिनिरूपितं देशिकःपरि
हरति विरोधोनविद्यतेब्रह्माद्वैतमेवसत्यं तथैवोक्तंचब्र
ह्मभेदोनकथितः ब्रह्मव्यतिरिक्तंनकिंचिदस्तिपादभेदा
दिकथनंतुब्रह्मस्वरूपकथनमेव तदेवोच्यतेपादचतुष्टया
त्मकं तत्रैकमविद्यापादं पादत्रयममृतंभवति शास्त्रांतरो
पनिषत्स्वरूपमेवनिरूपितमेव तमसस्तुपरंज्योतिः पर
मानंदलक्षणंपादत्रयात्मकंब्रह्मकैवल्यंप[...]रमंशाश्वतमि
ति वेदाहमेतंपुरुषंमहांतमादित्यवर्णंतमसःपरस्तात् त

मेवंविद्वानमृतइहभवतिनान्यःपंथाविद्यतेयनाय सर्वेषां
ज्योतिषांपरंज्योतिस्तमसःपरमुच्यते सर्वस्यधातारमचिंत्य
रूपमादित्यवर्णंपरंज्योतिस्तमसउपरिविभाति यदेकमव्य
क्तमनंतरूपंविश्वंपुराणंतमसःपरस्तात्तदेवर्तंतदुसत्यमा
हुस्तदेवसत्यंतदेवब्रह्मपरमंविशुद्धं कथ्यतेतमःशब्देनावि
द्या पादोस्यविश्वाभूतानि त्रिपादस्यामृतंदिवि त्रिपादूर्ध्व
उदयितपुरुषः पादोस्येहाभवात्पुनः ततोविष्वङ्व्यक्रामत्
साशनानशनेअभि विद्यानंदतुरीयाख्यपादत्रयममृतंभव

75
1970

ति अवशिष्टमविद्याश्रयमिति आत्मारामस्यादिनारायण
स्यकीदृशावुन्मेषनिमेषौ तयोस्वरूपंकथमिति गुरुर्वदति प
राकृदृष्टिरुन्मेषः प्रत्यदृष्टिर्निमेषः प्रत्यकृदृष्टास्वस्वरूपचिं
तनमेवनिमेषः यावदुन्मेषकालस्तावंनिमेषकालोभवति अ
विद्यायास्थितिरुन्मेषकाले निमेषकालेतस्याःप्रलयोभवति य
दाउन्मेषोजायतेतथाचिरंतनातिसूक्ष्मवासनाबलात्पुनः अ
विद्यायाःउदयोभवति यथापूर्वमविद्याकार्याणिजायंतेका ३८
र्यकारणोपाधिभेदात्जीवेश्वरभेदोपिदृश्यते कारणोपा

धिरीश्वरः कार्योपाधिरयंजीवः ईश्वरस्यमहामायातदाज्ञाव
शवर्तिनी तत्संकल्पानुसारिणी विविधानंतमहामायाश
क्तिसुसेविता अनंतमहामायाजालजननमंदिरा महाविष्णोः
क्रीडाशरीररूपिणी ब्रह्मादीनामगोचरा एतांमहामायांत
रंत्येव येविष्णुमेवभजंति नान्येतरंतिकदाचनविविधोपा
येरपिअविद्याकार्यांतःकरणान्यतीत्यकालान्यनंतानिजायं
ते ब्रह्मचैतन्यंतेषुप्रतिबिंबितंभवति प्रतिबिंबाएवजीवाइ
तिकथ्यंते अंतःकरणोपाधिकास्सर्वेजीवाइत्येवंवदंति महा

77
1970

त्रिपा॰ भूतोथसूक्ष्मांगोपाधिकारस्सर्वेजीवाइत्येकेवदंति बुद्धिप्रतिबिं उप॰
बितचैतन्यंजीवाइत्यपरेमन्यंते एतेषामुपाधिनानात्वंतभेदो
नविद्यते सर्वपरिपूर्णोनारायणस्त्वनयानिजयाक्रीडतिस्वेच्छ
यासदा तद्वदविद्यमानफल्गुविषयसुखाशायाःसर्वेजीवाःप्रधा
वंत्यसारसंसारचक्रे एवमनादिपरंपरावर्ततेसंसारविपरीतभ्र
मादित्युपनिषत् इत्यथर्वणमहानारायणोपनिषदिमहा
मायातीताखंडाद्वैतपरमानंदलक्षणपरंब्रह्मणःपरमतत्वस्व १०
रूपनिरूपणंनामचतुर्थोध्यायः ४ पूर्वकांडःसमाप्तः ॥

अथशिष्योवदति गुरुंभगवंतंनमस्कृत्यभगवन्सर्वात्मनानष्टा १९ 1970
याअविद्यायाःपुनरुदयःकथं सत्यमेवेति गुरुरितिहोवाच प्रा
वृट्कालप्रारंभेयथामंडुकादीनांप्रादुर्भावः तद्वत्सर्वात्मना
नष्टोयाअविद्यायाउन्मेषकालेपुनरुदयोभवति भगवन्कथं
जीवानामनादिसंसारभ्रमः तन्निवृत्तिर्वाकथमिति कथंमो
क्षमार्गस्वरूपंच मोक्षसाधनंकथमिति कोवामोक्षोपायः
कीदृशंमोक्षस्वरूपं कावासायुज्यमुक्तिः एतत्सर्वंतत्वतःक
थनीयमिति अत्यादरपूर्वकमतिहर्षेणशिष्यंबहुकृत्यगु

त्रि.पा. रुर्वदति श्रूयतांसावधानेन कुत्सितानंतजन्माभ्यस्तात्यंतो॰ उप.
त्कृष्टविविधविचित्रानंतदुष्कर्मवासनाजालविशेषैर्देहात्मवि
वेकोनजायते तस्मादेवदृढतरदेहात्मभ्रमोभवति अहमज्ञः
किंचिज्ज्ञोहमहंजीवोहमत्यंतदुःखाकारोहमनादिसंसारीतिभ्र
मवासनाबलात्संसारएवप्रवृत्तिस्तन्निवृत्त्युपायःकदापिनवि
द्यते मिथ्याभूतस्वप्नतुल्यान्विषयभोगाननुभूयविविधानसं
ख्यानतिदुर्लभान्मनोरथाननवरतमाशास्यअतृप्तस्सदापरि १८
धावति विविधविचित्रस्थूलसूक्ष्मोत्कृष्टनिकृष्टानंतदेहानप

रिगृह्यतत्तद्देहविहितविविधविचित्रानेकशुभाशुभप्रारब्धक
र्माण्यनुभूयतत्तत्कर्मफलवासनाजालवासितांतःकरणानांपुः
नःपुनस्तत्तत्कर्मफलविषयप्रवृत्तिरेवजायते संसारनिवृत्ति
मार्गप्रवृत्तिःकदापिनजायते तस्मादनिष्टमेवेष्टमिवभाति इ
ष्टमेवानिष्टवभाति अनादिसंसारविपरीतभ्रमात् तस्मात्स
र्वेषांजीवानामिष्टविषयेबुद्धिस्सुखबुद्धिर्दुःखबुद्धिर्भवति परमा
र्थतस्त्ववाधितब्रह्मसुखविषयेप्रवृत्तिरेवनजायते तत्स्वरूप
ज्ञानाभावात् तत्किमितिनविद्यते कथंबंधःकथंमोक्षइति

81/1900

विचाराभावाच्चतत्कथमिति अज्ञानप्राबल्यात्तस्मादज्ञानप्रा
बल्यमिति भक्तिज्ञानवैराग्यवासनाभावाच्च तदभावःकथमि
ति अत्यंतांतःकरणमलिनविशेषात् अंतःसंसारतरणोपा
यःकथमिति देशिकस्तमेवकथयति सकलवेदशास्त्रसिद्धा
तरहस्यंजन्मजन्माभ्यस्तात्यंतोत्कृष्टसुकृतपरिपाकवशात्स
त्भिस्संगोजायते तस्माद्विधिनिषेधविवेकोभवति ततस्स
दाचारप्रवृत्तिर्जायते सदाचारादखिलदुरितक्षयोभवति त २९
स्मादंतःकरणमतिविमलंभवति ततःसद्गुरुकटाक्षमंतःक

रणमाकांक्षति तस्मात्सद्गुरुकटाक्षलेशविशेषणसर्वसि
द्धयःसिध्यंतिसर्वबंधाःप्रविनश्यंति श्रेयोविघ्नाःसर्वेप्रलयं
यांति सर्वाणिश्रेयांसिस्वयमेवायांतियथाजात्यंधस्यरूप
ज्ञानंनविद्यतेतथागुरूपदेशेनविनाकल्पकोटिभिस्तत्वज्ञा
नंनविद्यते तस्मात्सद्गुरुकटाक्षलेशविशेषणाचिरादेवत
त्वज्ञानंभवति यदासद्गुरुकटाक्षोभवतितदाभगवत्कथा
श्रवणध्यानादौश्रद्धाजायते तस्मात्हृदयस्थितानादिदुर्वास
नाग्रंथिविनाशोभवति ततोहृदयस्थिताःकामाःसर्वेविनश्यं

83
1920

ति तस्माद्धृदयपुंडरीककर्णिकायां परमात्माविर्भावो भवति
ततो दृढतरा वैष्णवी भक्तिर्जायते ततो वैराग्यमुदेति वैरा
ग्यात् बुद्धिविज्ञानाविर्भावो भवति अभ्यासात्तज्ज्ञानं क्रमेण
परिपक्वं भवति पक्वविज्ञानात् जीवन्मुक्तो भवति ततः शु
भाशुभकर्माणि सर्वाणि वासनानि नश्यंति ततो दृढतरशु
द्धसात्त्विकवासनया भक्त्यतिशयो भवति भक्त्यतिशयेन
नारायणस्सर्वमयः सर्वावस्थासु प्रविभाति सर्वाणि जगंति
नारायणमयानि प्रविभाति नारायणव्यतिरिक्तं न किंचिद

स्ति इत्येतत् बुध्वा विहरत्युपासकः सर्वत्र निरंतरसमाधिपरंप
राभिर्जगदीश्वराकारास्सर्वत्र सर्वावस्थासु प्रविभांति अस्यम
हापुरुषस्य क्वचित् क्वचिदीश्वरसाक्षात्कारो भवति अस्यदेह
त्यागेच्छा यदा भवति तदा वैकुंठपार्षदाः सर्वे समायांति ततो भ
गवध्यानपूर्वकं हृदयकमलेव्यवस्थितमात्मानं स्वमंतरात्मानं सं
चिंत्य सम्यगुपचारैरभ्यर्च्य हंसमंत्रमुच्चरन् सर्वाणि द्वाराणि संय
म्य सम्यङ्मनो निरुध्य चोर्ध्वगेन वायुना सह प्रणवेन प्रणवानु
संधानपूर्वकं शनैश्शनैः ब्रह्मरंध्राद्विनिर्गत्य सोहमिति मंत्रे

त्रिपा· णद्वादशांतस्थितपरमात्मानमेकीकृत्यपंचोपचारैरभ्यर्च्य पुन उप·
स्सोहमिति मंत्रेण षोडशांतस्थितज्ञानात्मानमेकीकृत्यसम्य
गुपचारैरभ्यर्च्य प्राकृतपूर्वदेहं परित्यज्य पुरःकल्पितमंत्रपशु
द्धब्रह्मतेजोमयनिरतिशयानंदमयमहाविष्णुसारूप्यविग्रह
परिगृह्य सूर्यमंडलांतर्गतानंतदिव्यचरणारविंदांगुष्ठनिर्ग
तनिरतिशयानंदमयामरनदिप्रवाहमाकृष्य भावनयात्र
स्नात्वा वस्त्राभरणाद्युपचारैरात्मपूजां विधाय साक्षान्नाराय २१
णो भूत्वा ततो गुरुनमस्कारपूर्वकं प्रणवगरुडं ध्यात्वा ध्याने

न विसृष्टं तं महाप्रणवगरुडं पंचोपचारैराराध्य गुर्वनुज्ञया प्रद 87
क्षिणनमस्कारपूर्वकं प्रणवगरुडमारुह्य महाविष्णोः स 1920
मस्तसाधारणचिन्हचिन्हितो महाविष्णोः समस्तासाधारण
दिव्यभूषणैः भूषितः सुदर्शनपुरुषं पुरस्कृत्य विश्वक्सेनप
रिपालितो वैकुंठपार्षदैः परिवेष्टितो नभोमार्गमाविश्य पार्श्व
द्वयस्थितानेकपुण्यलोकानतिक्रम्य तत्रत्यैः पुण्यपुरुषैरभिपू
जितः सत्यलोकमाविश्य ब्रह्माणमभ्यर्च्य ब्रह्मणा च सत्यलोक
वासिभिः सर्वैरभिपूजितः शैवमीशानकैवल्यमासाद्य शिवं ध्या

त्वा शिवमभ्यर्च्य शिवगणैस्सर्वैः शिवेन चाभिपूजितो ग्रहऋषिमं
डलान्यतिक्रम्य सूर्यसोममंडले भित्वा कीलकनारायणं ध्यात्वा
ध्रुवमंडलेस्य दर्शनं भगवंतं ध्रुवमभिपूज्य ततश्शिंशुमारचक्रं
विभिद्य शिंशुमारप्रजापतिमभ्यर्च्य चक्रमध्यगतं सर्वाधारं सना
तनं महाविष्णुमाराध्य तेन पूजितस्ततउपर्युपरि गत्वा परमा
नंदं प्राप्य ततो वैकुंठवासिनः सर्वे समायांति तान्सर्वान्सुसंपू
ज्य तैस्सर्वैरभिपूजितश्चोपर्युपरि गत्वा विरजानदीं प्राप्य तत्र
स्नात्वा भगवध्यानपूर्वकं पुनर्निमज्य तत्रापंचीकृतभूतोत्थसू

क्ष्मांगं भोगसाधनं सूक्ष्मशरीरमुत्सृज्य केवलमंत्रमयदिव्यतेजो 89/1970
मयनिरतिशयानंदमयमहाविग्रहं परिगृह्य ततः उन्मज्यात्मपू
जां विधाय प्रदक्षिणनमस्कारपूर्वकं ब्रह्ममयवैकुंठमाविश्य त
त्रत्यान्विशेषेण संपूज्य तन्मध्ये च ब्रह्मानंदमयानंतप्राकारप्रासा
दतोरणविमानोपवनावलिभिः ज्वलद्भिरवैरूप्यलक्षितः निरुपम
नित्यनिरवद्यनिरतिशयनिरवधिकब्रह्मानंदाचलो विराजते त
दुपरि ज्वलति निरतिशयानंददिव्यतेजोराशिः तदभ्यंतरसंस्था
ने शुद्धबोधानंदलक्षणं विभाति तदंतरालेचिन्मयवेदिका आ

त्रिपा॰ नंदवेदिकानंदवनविभूषिता तदभ्यंतरेऽमिततेजोराशिस्तदुप उप॰
रिज्वलति परममंगलासनं विराजते तत्पद्मकर्णिकायां शुद्धशे
षभोगासनं विराजते तस्योपरि समासीनमानंदपरिपालकमादि
नारायणं ध्यात्वा तमीश्वरं विविधोपचारैराराध्य प्रदक्षिणनमस्का
रान्विधाय तदनुज्ञातश्चोपर्युपरि गत्वा पंचवैकुंठान्तीत्वांडविराड्
कैवल्यं प्राप्य तं समाराध्योपासकः परमानंदं प्राप्नोत्युपनिषत्
इत्याथर्वण महानारायणोपनिषदि संसारतारणोपायकथनद्वा २२
रा परममोक्षमार्गस्वरूपनिरूपणं नाम पंचमोऽध्यायः ५

ततउपासकः परमानंदं प्राप॥ सावरणं ब्रह्मांडं च भित्त्वा परितस्त 91
मवलोक्य ब्रह्मांडस्वरूपं निरीक्ष्य परमार्थतस्तत्स्वरूपं ब्रह्मज्ञाने (910
नावबुद्धः समस्तवेदशास्त्रेतिहासपुराणानि समस्तविद्याजाला
नि ब्रह्मादयः सुरास्सर्वे समस्ताः परमर्षयश्चांडाभ्यंतरप्रपं
चैकदेशमेव वर्णयंत्यंडस्वरूपं न जानंति॥ ब्रह्मांडान्न बहिः प्रपं
चज्ञानं न जानंत्येव॥ कुतोंऽडांतरांतर्बहिः प्रपंचज्ञानं॥ दूरतो मो
क्षप्रपंचज्ञानं अविद्याप्रपंचज्ञानं चेति॥ कथं ब्रह्मांडस्वरूप
मिति॥ कुक्कुटांडाकारं महदादिसमष्ट्याकारं॥ अंडं तपनीयम

यं॥ तप्तजांबूनदप्रभं॥ उद्यत्कोटिदिवाकराभं॥ चतुर्विधसृष्ट्यु
पलक्षितं॥ महाभूतैः पंचभिरावृतं॥ महदहंकृतितमोभिश्च॥
मूलप्रकृत्या परिवेष्टितं॥ अंडभित्तिविशालं॥ सपादकोटियो
जनप्रमाणं॥ एकैकावरणं तथैव॥ अंडप्रमाणं परितअयुत
द्वयकोटियोजनप्रमाणं॥ महामंडूकाद्यनंतशक्तिभिरधिष्ठि
तं॥ नारायणक्रीडाकंदुकं॥ परमाणुवद्विष्णुलोमसुसंलग्नं॥
अदृष्टाश्रुतविविधविचित्रानंतविशेषैरुपलक्षितं॥ अस्यब्र
ह्मांडस्य समंततः स्थितान्येतादृशान्यनंतकोटिब्रह्मांडानि साव

रणानि ज्वलंति॥ चतुर्मुखपंचमुखषण्मुखसप्तमुखाष्टमुखा 93
दिसंख्याक्रमेण सहस्रावधिमुखांतैर्नारायणांशैरजोगुणप्र 1970
धानैरेकैकसृष्टिकर्तृभिरधिष्ठितानि॥ विष्णुमहेश्वराख्यैर्नारा
यणांशैस्सत्वतमोगुणप्रधानैरेकैकस्थितिसंहारकर्तृभिर
धिष्ठितानि महाजलौघमत्स्यबुद्बुदानंतसंघवद्भ्रमंति
क्रीडासक्तजालककरतलामलकवृंदवन्महाविष्णोः करत
लेविलनंतकोटिब्रह्मांडानि जलयंत्रस्थघटमालिकाजालव
न्महाविष्णोरेकैकरोमकूपांतरेष्वनंतकोटिब्रह्मांडानि साव

रणा निभ्रमंति॥ समस्तब्रह्मांडांतर्बहिःप्रपंचरहस्यं ब्रह्मज्ञाने- उप.
नावबुध्य विविधविचित्रानंतपरमविभूतिसमष्टिविशेषान्स
मवलोक्यात्यैश्वर्यामृतसागरे निमज्य निरतिशयानंदपारावारो
भूत्वा समस्तब्रह्मांडजालानि समुल्लंघ्यामितपरिच्छिन्नानंततम
स्सागरमुत्तीर्य महाविद्यापरं दृष्ट्वा विविधविचित्रानंतमहामा
याविशेषैः परिवेष्टितां॥ अनंतमहामायाशक्तिसमष्ट्याकारां
अनंतदिव्यतेजोज्वालाजालैरलंकृतां॥ अनंतमहामायाविला ॥२५॥
सानां परमाधिष्ठानविशेषाकारां॥ शश्वदमितानंदाचलोपरि

विहारिणीं मूलप्रकृतिजननीमविद्यालक्ष्मीमेवं ध्यात्वा विविधो 95 / 1929
पचारैराराध्य समस्तब्रह्मांडसमष्टिजननीं वैष्णवीं महामायां नम
स्कृत्य तया चानुज्ञातश्चोपर्युपरि गत्वा महाविराट्पदं प्राप महा
विराट्स्वरूपं कथमिति॥ समस्ताविद्यापादको विराट्॥ विश्वत
श्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात्॥ संबाहु-
भ्यां नमति संपतत्रैर्द्यावापृथिवी जनयं देव एकः॥ न संदृशे तिष्ठ
ति रूपमस्य न चक्षुषा पश्यति कश्चनैनं॥ हृदा मनीषा मनसा-
भिक्लृप्तो य एनं विदुरमृतास्ते भवंति॥ मनोवाचामगोचरमादि

त्रिपा॰ विराट्स्वरूपं ध्यात्वा विविधोपचारैराध्य तदनुज्ञातश्चोपर्युपरि उप॰
गत्वा विविधविचित्रानंदमूला विद्याविलासानवलोक्योपासकः
परमकौतुकं प्राप ॥ अखंडपरिपूर्णपरमानंदलक्षणपरंब्रह्म
णस्समस्तस्वरूपविरोधकारिणी ॥ अपरिच्छिन्नतिरस्करिण्या
कारा ॥ वैष्णवी महायोगमाया ॥ मूर्तिमद्भिरलंतमहामायावि
शेषैः परिवेष्टिता ॥ तस्याः पुरमतिकौतुकमत्याश्चर्यसागरानं
दलक्षणममृतं भवति ॥ अविद्यासागरप्रतिबिंबितनित्यवैकुं
ठप्रतिवैकुंठमिव विभाति ॥ उपासकस्ततः पुनं प्राप्य योगमा ॥२५॥
यालक्ष्मिं ध्यात्वा विविधोपचारैराराध्य तया संपूजितस्तयानुज्ञा

तश्चोपर्युपरि गत्वानंतयोगमायाविलासानवलोक्योपासकः 97
कौतुकं प्राप ॥ ततउपरि पादविभूतिवैकुंठपुरमाभाति ॥ अत्या 1930
श्चर्यानंतविभूतिसमष्ट्याकारं ॥ अनंतससप्रवाहैरलंकृतं ॥ अ
मिततरंगिण्याः प्रवाहैरतिमंगळं ॥ ब्रह्मतेजोविशेषाकारैरनंत
ब्रह्मवनैरभितस्ततं ॥ अनंतनित्यमुक्तैरभिव्याप्तं ॥ अनंतचि
न्मयप्रासादजालसंकुलं ॥ अनादिपादविभूतिवैकुंठमेवमाभा
ति ॥ तन्मध्ये च विद्यानंदाचलो विभाति ॥ तदुपरि ज्वलति निरति
शयानंददिव्यतेजोराशिः ॥ तदभ्यंतरे परमानंदविमानं विभा

ति॥ तदभ्यंतरसंस्थाने चिन्मयासनं विराजते॥ तत्पद्मकर्णिका-
यां निरतिशयदिव्यतेजोराश्यंतरसमासीनमादिनारायणं ध्या-
त्वा विविधोपचारैस्तं समाराध्य॥ तेनाभिपूजितस्तदनुज्ञातश्चो-
पर्युपरि गत्वा सावरणमविद्यांडं च भित्वा विद्यापादमुल्लंघ्य विद्या-
विद्ययोस्संधौ विष्वक्सेनकुंवैडं परमाभाति॥ अनंतदिव्यतेजो-
ज्वालाजालैरभितो नित्यं प्रज्वलितं॥ अनंतबोधानंदव्यूहैरभित-
स्ततं॥ शुद्धबोधविमानावलिभिर्विराजितं॥ अनंतानंदपर्वतैः प- ॥२७॥
रमकौतुकमाभाति॥ तन्मध्ये च कल्याणाचलोपरि शुद्धानंदवि-

मानंविभाति॥ तदभ्यंतरे दिव्यमंगलासनं विराजते॥ तत्पद्म-
कर्णिकायां ब्रह्मतेजोराश्यभ्यंतरसमासीनं॥ भगवदनंतविभू-
तिविधिनिषेधपरिपालकं॥ सर्वप्रवृत्तिसर्वहेतुप्रनिमित्तकं॥ नि-
रतिशयलक्षणमहाविष्णुस्वरूपं॥ अखिलापवर्गपरिपालकं
अमितविक्रममेवंविधं विष्वक्सेनं ध्यात्वा प्रदक्षिणनमस्कारान्वि-
धाय विविधोपचारैराराध्य तदनुज्ञातश्चोपर्युपरि गत्वा विद्या-
विभूतिं प्राप्य विद्यामयानंतवैकुंठान्परितोवस्थितान्ब्रह्म-
तेजोमयानवलोक्योपासकः परमानंदं प्राप॥ विद्यामयानंत-

११/१९७०

त्रिपा॰ वैकुंठान् परितोवस्थितान् ब्रह्मतेजोमयानवलोक्योपासकः पर उप॰
मानंदं प्राप॥ विद्यामयानंतसमुद्रानतिक्रम्य ब्रह्मविद्यातरं
गिणीमासाद्य तत्र स्नात्वा भगवद्ध्यानपूर्वकं पुनर्निमज्य मंत्रमय
शरीरमुत्सृज्य विद्यानंदमयामृतदिव्यशरीरं परिगृह्य नाराय
सारूप्यं प्राप्यात्मपूजां विधाय ब्रह्ममयवैकुंठवासिभिः सर्वैर्नि
त्यमुक्तैः सुपूजितस्ततो ब्रह्मविद्याप्रवाहैरानंदरसनिर्भरैः क्री
डानंदपर्वतैरनंतैरभिव्याप्तं॥ ब्रह्मविद्यामयैस्सहप्राकारैरा ॥२८॥
नंदामृतमयैः दिव्यगंधैः स्वभावैः चिन्मयैरनंतब्रह्मवनैरतिशो

भितं॥ उपासकस्त्वेवंविधं ब्रह्मविद्यावैकुंठमाविश्य तदभ्यंतर 161
स्थितांस्ततोनंतबोधानंदप्रासादाग्रस्थितप्रणवविमानोपरि 1970
स्थितां॥ अपारब्रह्मविद्यासाम्राज्याधिदेवतां॥ अमोघनिजमं
दकटाक्षेणानादिमूलाविद्याप्रळयकरीं अद्वितीयामेकां॥ अ
नंतमोक्षसाम्राज्यलक्ष्मीमेवं ध्यात्वा प्रदक्षिणनमस्कारान्वि
धाय॥ विविधोपचारैराराध्य पुष्पांजलिं समर्प्य स्तुत्वा स्तोत्रवि
शेषैस्तयाभिपूजितस्तदनुज्ञातश्चोपर्युपरि गत्वा॥ ब्रह्मवि
द्यातीरं गत्वा बोधानंदमयानंतवैकुंठानवलोक्य निरतिशया

यानंदं प्राप्य बोधानंदमयाननंतसमुद्रानतिक्रम्य गत्वा गत्वाब्र उप.
त्मभवनेषु परममंगळावलश्रेणिषु ततो बोधानंदविमानपरं
परासु पासकः परमानंदं प्राप॥ तत्र श्रीतुळसीपुरवैकुंठपुरमा
भाति॥ परमकल्याणमनंतविभवं॥ अमिततेजोराश्याकारं॥
अनंतब्रह्मतेजोराशिसमष्ट्याकारं॥ चिदानंदमयानेकप्रकार
विशेषैः परिवेष्टितं॥ अमितबोधानंदावलोपरिस्थितं॥ बोधानंद
तरंगिण्याः प्रवाहैरतिमंगळं॥ निरतिशयानंदैरनंतवृंदावनैर ॥२५॥
तिशोभितं॥ अखिलपवित्राणां परमपरमपवित्रं॥ चिद्रूपैरनंत

नित्यमुक्तैरत्यभिव्याप्तं॥ आनंदमयानंतविमानजालैरलंकृतं॥ अ 103
मिततेजोराश्यंतर्गतदिव्यतेजोविशेषं॥ उपासकस्त्वेवमाकारतुल 1920
सीवैकुंठभनिश्यतदंतर्गतदिव्यविमानोपरिस्थितां॥ सर्वपरिपूर्ण
स्य महाविष्णोः सर्वांगेषु विहारिणीं॥ निरतिशयसौंदर्यलावण्या
धिदेवतां॥ बोधानंदमयैरनंतनित्यपरिजनैः परिषेवितां॥ श्रीसु
खीतुलसीमेवं लक्ष्मीं ध्यात्वा प्रदक्षिणनमस्कारान्विधाय विविधो
पचारैराराध्य स्तुत्वा स्तोत्रविशेषैस्तया भिपूजितस्तत्र तैश्चाभिपू
जितस्तदनुज्ञातश्चोपर्युपरि गत्वा परमानंदतरंगिण्यास्तीरे तीरेग

त्रिपा॰ त्वापरितोवस्थितान्शुद्धबोधानंदमयाननंतवैकुंठानवलोक्यनिर उप॰
तिशयानंदंप्राप्यतत्रसैश्वद्रूपैःपुराणपुरुषैश्चाभिपूजितःतते
गत्वागत्वाब्रह्मवनेषुदिव्यगंधानंदपुष्पवृष्टिभिस्समन्वितेषुदि
व्यमंगलालयेषुनिरतिशयानंदामृतसागरेषुअमिततेजोरा
शाकारेषुकल्लोलवनसंकुलेषुततोनंतशुद्धबोधविमानजाल
संकुलानंदाचलश्रेणिष्वपासकस्ततउपर्युपरिगत्वाविमानप
रंपरास्वनंततेजस्सर्वतराजिष्वेवंक्रमेणप्राप्यविद्यानंदमयोस्सं ॥२०॥
धिंतत्रानंदतरंगिण्याःप्रवाहेषुस्नात्वाबोधानंदवनंप्राप्य॥शु

द्धबोधपरमानंदाकारवनंसंततामृतपुष्पवृष्टिभिःपरिषिक्तंपर
मानंदप्रवाहैरभिव्यासं॥मूर्तिमद्भिःपरममंगलैःपरमकौतुकं॥अ
परिच्छिन्नानंदसागराकारं॥क्रीडानंदपर्वतैरभिशोभितं॥तन्म
ध्येचशुद्धबोधानंदवैकुंठं॥तदेवब्रह्मविद्यापादवैकुंठं॥सहस्रानं
दप्राकारैस्समुज्वलति॥अनंतानंदविमानजालसंकुलं॥अनं
तबोधसौधविशेषैरभितोनिशंप्रज्वलंतंक्रीडानंदमंटपविशे
षैर्विशेषितं॥बोधानंदमयानंतपरमश्छत्रध्वजचामरवितान
तोरणैरलंकृतं॥परमानंदव्यूहैर्नित्यमुक्तैरभितस्ततं॥अनंत

105
1970

दिव्यतेजःपर्वतसमस्याकारं॥अपरिच्छिन्नानंतशुद्धबोधानंदःमं उप॰
डलं॥वाचामगोचरानंदब्रह्मतेजोराशिमंडलं॥अखंडतेजोमंडल
विशेषं॥शुद्धानंदविशेषसमष्टिमंडलविशेषं॥अखंडचित्घना
नंदविशेषं॥एवंविधंबोधानंदवैकुंठमुपासकःप्रविश्यतत्रत्यैस्स
र्वैरभिपूजितःपरमानंदाचलोपरिअखंडबोधविमानंप्रज्वल
तितदभ्यंतरसमासीनमादिनारायणंध्यात्वाप्रदक्षिणनमः
स्कारान्विधायविविधोपचारैस्संपूज्यपुष्पांजलिंसमर्प्यस्तुत्वा ॥२१॥
स्तोत्रविशेषैस्स्वरूपेणावस्थितमुपासकमवलोक्यतमुपासक

मादिनारायणःस्वसिंहासनेसुसंस्थाप्यतद्वैकुंठवासिभिःस 107/1970
र्वैस्समन्वितःसमस्तमोक्षसाम्राज्यपट्टाभिषेकमुद्दिश्यमंत्रपू
तैरुपासकमानंतकलशैरभिषिच्यदिव्यमंगळमहावाद्यपुरस्स
रंविविधोपचारैरभ्यर्च्यमूर्तिमद्भिःसर्वैस्स्वचिन्हैरलंकृत्यप्रदक्षि
णनमस्कारान्विधायत्वंब्रह्मासिअहंब्रह्मास्मि॥आवयोरंतरं
नविद्यते॥त्वमेवाहं॥अहमेवत्वं॥इत्यभिधायेत्युक्त्वादिनारा
यणस्तिरोदधेतदेत्युपनिषत्॥ ॥इत्यथर्वणमहानारा
यणोपनिषदिपरममोक्षमार्गस्वरूपनिरूपणंनामषष्ठमोऽ

ध्यायः॥ ६॥ ॥अथोपासकस्तदा तया नित्यगरुडमारुह्य वै
कुंठवासिभिः सर्वैः परिवेष्टितो महासुदर्शनं पुरस्कृत्य विष्वक्से
नपरिपालितश्चोपर्युपरि गत्वा ब्रह्मानंदविभूतिं प्राप्य सर्वत्रा
वस्थितान् ब्रह्मानंदमयाननंतवैकुंठानवलोक्य निरतिशयानं
दसागरो भूत्वा॥ आत्मारामानानंदविभूतिपुरुषाननंतानवलो
क्य तान्सर्वानुपचारैस्समभ्यर्चनैस्सर्वैरभिपूजितश्चोपासकस्त ॥२५॥
तउपर्युपरि गत्वा ब्रह्मानंदविभूतिं प्राप्यानंतदिव्यतेजःपर्वतै

रलंकृतान् परमानंदलहरीवनशोभितानसंख्याकानंदसमुद्रा 109 / 1970
नतिक्रम्य विविधविचित्रानंदपरमतत्त्वविभूतिसमष्टिविशे
षान् परमकौतुकान् ब्रह्मानंदविभूतिविशेषान् तिक्रम्य उपा
सकः परमकौतुकं प्राप॥ ततः सुदर्शनवैकुंठपरमाभाति॥ नि
त्यमंगलमनंतविभवं॥ सहस्रानंदप्राकारपरिवेष्टितं॥ अयु
तकक्ष्युपलक्षितं॥ अनंतोत्कटज्वलदरमंडलं॥ निरतिशयदि
व्यतेजोमंडलं॥ बंदाकारपरमानंदशुद्धबुद्धस्वरूपं॥ अनंतानं

त्रिपा॰ दसौदामिनीपरमविलासं॥ निरतिशयपरमानंदपारावारं॥ उप॰
अनंतैरानंदपुरुषैश्चिद्रूपैरधिष्ठितंतन्मध्येचसुदर्शनंमहाच
क्रं॥ चरणंपवित्रंविततंपुराणंयेनपूतस्तरतिदुष्कृतानितेनप
वित्रेणशुद्धेनपूताः॥ अतिपाप्मानमरातिंतरेमलोकस्यद्वारम
र्चिमत्पवित्रं॥ ज्योतिष्मद्भ्राजमानंमहस्वत्॥ अमृतस्यधाराब
हुधादोहमानंचरणंनोलोकेसुधितांदधातु॥ अयुतारज्वलंतं ॥३५॥
अयुतारसमष्ट्याकारं॥ निरतिशयविक्रमविलासं॥ अनंतदिव्या

युधदिव्यशक्तिसमष्टिरूपं॥ महाविस्फोरनर्गळप्रवाहविग्रहं॥ अ 111
युतायुतकोटियोजनविशालं॥ अनंतज्वालाजालैरलंकृतं॥ स 1970
मस्तदिव्यमंगळनिदानं॥ अनंतदिव्यतीर्थानांनिजमंदिरं॥ ए
वंसुदर्शनमहाचक्रंप्रज्वलति॥ तस्यनाभिमंडलसंस्थानउपल
क्ष्यते॥ निरतिशयानंददिव्यतेजोराशिः॥ तन्मध्येचसहस्रारच
क्रंप्रज्वलति॥ तदखंडदिव्यतेजोमंडलाकारं॥ परमानंदसौदा
मिनीचयोज्वलं॥ तदभ्यंतरसंस्थानंषट्शतारचक्रंप्रज्वलति

त्रिपा· तस्यामितपरमतेजःपरविहारसंस्थानविशेषं॥ विज्ञानघनस्व उप
रूपं॥ तदंतराले त्रिशतारचक्रं विभाति॥ तच्च परमकल्याणवि
लासविशेषं॥ अनंतदिव्यादित्यसमप्रभाकारं॥ तदभ्यंतरे शता
रचक्रमाभाति॥ तच्च परमतेजोमंडलविशेषं॥ तन्मध्ये षडार
चक्रमाभाति॥ तच्च ब्रह्मतेजःपरमविलासविशेषं॥ तदभ्यंतर
संस्थाने षट्कोणचक्रं प्रज्वलति॥ तच्चोपरि चिंतानंतदिव्यतेजो ॥२४॥
राश्याकारं॥ तदभ्यंतरे महानंदपदं विभाति॥ तत्कर्णिकायां

सूर्येंदुवह्निमंडलानि चिन्मयानि ज्वलंति॥ तत्रोपलक्ष्यते निरतिश
यदिव्यतेजोराशिः॥ तदभ्यंतरसंस्थाने युगपदुदितानंतकोटिर
विप्रकाशः सुदर्शनपुरुषं ध्यात्वा विविधोपचारैराराध्य प्रदक्षिणन
मस्कारान् विधायोपासकः तेनाभिपूजितस्तदनुज्ञातश्चोपर्युपरि
गत्वा परमानंदमयानंतवैकुंठानवलोक्योपासकः परमानंदं प्रा
प॥ ततउपरि विविधविचित्रानंतचिद्विलासविभूतिविशेषानति
क्रम्यानंतरपरमानंदविभूतिसमष्टिविशेषानंतनिरतिशया

113
7920

नंदसमुद्रानतीत्योपासकः क्रमेणाद्वैतसंस्थानंप्राप॥ कथमद्वैत
संस्थानं॥ अखंडानंदस्वरूपंअनिर्वाच्यं॥ अमितबोधसागरं॥
अमितानंदसमुद्रं॥ विजातीय्यविशेषवर्जितं॥ सजातीय्यविशे
षविशेषितं॥ निरवयवं॥ निराधारं॥ निर्विकारं निरंजनं॥ अनं
तब्रह्मानंदसमष्टिकंदं॥ परमचिद्विलाससमष्ट्याकारं॥ निर्म
लं॥ निरवंघं॥ निराश्रयं॥ अतिनिर्मलानंतकोटिरविप्रकाशै
कस्फुलिंगं॥ अनंतोपनिषदर्थस्वरूपं॥ अखिलप्रमाणातीतं

मनोवाचामगोचरं॥ नित्यमुक्तस्वरूपं॥ अनाधारं॥ आदिमध्यां 115
तशून्यं॥ कैवल्यंपरमशांतं॥ सूक्ष्मातूसूक्ष्मतरं॥ महतोमहत्तरं 1970
अपरिमितानंदविशेषं॥ शुद्धबोधानंदविभूतिविशेषं॥ अनं
तानंदविभूतिविशेषसमष्टिरूपं॥ अक्षरं अनिर्देश्यं॥ कूटस्थ
मचलंध्रुवमदिग्देशकालं॥ अंतर्बहिश्च ततव्याप्यमपरिपूर्णं
परमयोगिभिर्विमृग्यंदेशतःकालतोवस्तुतःपरिच्छेदरहितं॥
निरंतराभिनवं॥ नित्यपरिपूर्णं॥ अखंडानंदामृतविशेषं॥ शाश्व

त्रिपा·

तं परमं पदं॥ निरतिशयानंदामृतं॥ नदितूपर्वताकारं॥ अद्विती उप·
यं स्वयंप्रकाशमनिशंज्वलति॥ परमानंदलक्षणापरिच्छिनान
तपरंज्योतिशाश्वतं॥ शश्वद्विभाति तदभ्यंतरसंस्थाने अमितानं
दचिद्रूपाचलं॥ अखंडपरमानंदविशेषं॥ बोधानंदमहोज्वलं॥
नित्यमंगळमंदिरं॥ चिन्मथनाविर्भूतचित्तूसारं॥ अनंताश्चर्य
सागरं॥ अमिततेजोराश्यंतर्गततेजोविशेषं॥ अनंतानंदप्रवा ॥२६॥
हैरलंकृतं॥ निरतिशयानंदपारावारं॥ निरूपम नित्यनिरवद्य॥

निरतिशय निरवधिक तेजोराशिविशेषं॥ निरतिशयानंदसह 117
स्रभाकारैरलंकृतं॥ शुद्धबोधवल्लिविशेषैरलंकृतं॥ चिदानंदम 1930
यानंददिव्यरत्नमयैस्सुशोभितं॥ शश्वदमितपुष्पवृष्टिभिस्स
मंततस्संततं॥ तदेव त्रिपाद्विभूतिवैकुंठस्थानं॥ तदेव परमकैव
ल्यं॥ तदेवाबाधितपरमतत्वं॥ तदेवानंतोपनिषद्विमृग्यं॥ तदेव
परमयोगिभिर्मुमुक्षुभिस्सर्वैराश्यास्यमानं॥ तदेवानंदघनं तदे
व चितूघनं॥ तदेवानंदघनं॥ तदेव शुद्धबोधघनविशेषं॥ अखंडा
नंदब्रह्मचैतन्याधिदेवतास्वरूपं॥ सर्वाधिष्ठानमद्वयपरंब्रह्म वि

हारमंडलं॥निरतिशयानंदतेजोमंडलं॥अद्वैतपरमानंदलक्षणप
रंब्रह्मणःपरमाधिष्ठानमंडलं॥निरतिशयपरमानंदपरममूर्तिवि
शेषमंडलं॥अनंतपरममूर्तिविशेषमंडलं॥निरतिशयपरमानं
दलक्षणपरंब्रह्मणःपरममूर्तिपरमतत्वविलासविशेषमंडलं॥
बोधानंदमयानंतपरमविलासविभूतिविशेषसमष्टिमंडलं॥अ
नंतचिद्विलासविभूतिविशेषहंसपाद्यनेकसमष्टिमंडलं॥खंड अ
शुद्धचैतन्यनिजमूर्तिविशेषविग्रहं॥वाचामगोचरानंतशुद्धबोध ॥२७॥
विशेषविग्रहं॥अनंतानंदसमुद्रसमष्ट्याकारं॥अनंतबोधाचः

लैरनंतबोधानंदाचलैरधिष्ठितं॥निरतिशयानंदपरममंगळवि
शेषसमष्ट्याकारं॥अखंडाद्वैतपरमानंदलक्षणपरंब्रह्मणःप
रममूर्तिपरमतेजःपुंजपिंडविशेषं॥चिद्रूपादित्यमंडलं॥द्वात्रिं
शद्व्यूहभेदैरधिष्ठितं॥व्यूहभेदाश्च॥केशवादिचतुर्विंशतिः॥सुदर्श
नादिन्यासमंत्राः॥सुदर्शनादिनाममंत्राः॥अनंतगरुडविष्वक्से
नाश्चनिरतिशयानंदश्च॥आनंदव्यूहमध्येसहस्रकोटियोजना
यतोऽनंतचिन्मयप्रासादः॥ब्रह्मानंदमयविमानकोटिभिरतिमंग
ळं॥अनंतोपनिषदर्थारामजालसंकुलं॥सामहंसकूजितैरतिः

119/1970

त्रिपा· उप·

शोभितं॥ आनंदमयानंतशिखरैरलंकृतं॥ चिदानंदरसनिर्भरैरभि
व्याप्तं॥ अखंडानंदतेजोराश्यंतस्थितं॥ अनंतानंदाश्चर्यसागरं॥ त
दभ्यंतरसंस्थाने अनंतकोटिरविप्रकाशातिशयप्रकाशं॥ निरति
शयानंदलक्षणं॥ प्रणवाख्यं विमानं विराजते॥ शतकोटिशिखरै
रनंदमयैस्समुज्वलति॥ तदंतराळे बोधानंदाचलोपर्यष्टाक्षरिम
डपो विभाति॥ तन्मध्ये च चिदानंदमयवेदिका॥ आनंदवनविभूषि
ता॥ तदुपरिज्वलति निरतिशयानंदतेजोराशिः॥ तदभ्यंतरसंस्था· ॥२८॥
ने अष्टाक्षरीपद्मविभूषितचिन्मयासनं विराजते॥ प्रणवकर्णिका

यां सूर्येंदुराश्यंतर्गतं परममंगळाकारमनंतासनं विराजते॥ तस्यो
परि महायंत्रं प्रज्वलति॥ निरतिशयब्रह्मानंदपरममूर्तिमहायं 121
त्रं॥ समस्तब्रह्मतेजोराशिसमष्टिरूपं॥ निरंजनं परं ब्रह्मस्वरूपं॥ 1970
परंब्रह्मणः परमरहस्यकैवल्यं महायंत्र परमवैकुंठनारायणयं
त्रं विजयति॥ तत्स्वरूपं कथमिति। देशिकस्तथेति होवाच॥ अष्टो
षट्कोणचक्रं॥ तन्मध्ये षट्दळपद्मं तत्कर्णिकायां॥ प्रणवओ·
मिति॥ प्रणवमध्ये नारायणबीजमोमिति॥ तन्माध्यगर्भितं॥ म
मसमस्ताभीष्टसिद्धिं कुरु कुरु स्वाहेति॥ तत्सम्परलेषु विष्णुन्रसिंहष

डुक्षरमंत्रौ॥ ॐ नमो विष्णवे॥ ऐं क्लीं श्रीं ह्रीं क्लौं फट्॥ तद्दलकपोलेषु ३ उप०
रामकृष्णषडक्षरमंत्रौ॥ रां रामाय नमः॥ क्लीं कृष्णाय नमः॥ षट्को॥
णेषु सुदर्शनषडक्षरमंत्रः॥ सहस्रार हुं फट् इति॥ षट्कोणकपोलेषु
प्रणवयुक्तशिवपंचाक्षरमंत्रं॥ ॐ नमः शिवायेति॥ तत् बहिः प्रणव
मालायुक्तवृत्तं वृत्तात् बहिरष्टदलपद्मं॥ तेषु दलेषु॥ नारायणनृ॥
सिंहाष्टाक्षरमंत्रौ॥ ॐ नमो नारायणाय जय जय नरसिंह॥ तद्दल
संधिषु॥ रामकरश्रीकराष्टाक्षरमंत्रौ॥ ॐ रामाय हुं फट् स्वाहा॥ ॥२९॥
क्लीं दामोदराय नमः॥ उत्तिष्ठ श्रीकर स्वाहा॥ तत् बहिः प्रणवमाला

वृत्तं युक्तं॥ वृत्तात् बहिर्नवदळपद्मं॥ तेषु दळेषु रामकृष्णहयग्रीव 128
नवाक्षरमंत्राः॥ ॐ रामचंद्राय नमः॥ ॐ क्लीं कृष्णाय गोविं 1990
दाय क्लीं॥ हसौं हयग्रीवाय नम हसौं॥ तद्दळकपोलेषु दक्षि॥
णामूर्तिनवाक्षरमंत्रः॥ ॐ दक्षिणामूर्तिरतरों॥ तत् बहिः
र्नारायणबीजयुक्तं वृत्तं॥ वृत्तात् बहिर्दशदळपद्मं॥ तेषु दळेषु
रामकृष्णदशाक्षरमंत्रौ॥ हुं जानकीवल्लभाय स्वाहा॥ गोपी
जनवल्लभाय स्वाहा॥ तद्दळसंधिषु नृसिंहमालामंत्रः॥ ॐ न
मो भगवते श्रीनृसिंहाय करालदंष्ट्रवदनाय मम विघ्नान् प

त्रिपा.

चपचस्वाहा॥ ततूबहिर्नृसिंहैकाक्षरयुक्तं वृत्तं॥ क्ष्रौमित्येकाक्ष उप.
रं॥ वृत्तात् बहिर्द्वादशदळपद्मं॥ तेषु दळेषु नारायणवासुदेव
द्वादशाक्षरमंत्रौ॥ ॐ नमोभगवते नारायणाय॥ ॐ नमोभग
वते वासुदेवाय॥ तद्दळकपोलेषु महाविष्णुरामकृष्ण द्वादशाक्ष
रमंत्राश्च॥ ॐ नमोभगवते महाविष्णवे॥ ॐ ह्रीं भरताग्रजरा
म क्लीं स्वाहा॥ श्रीं ह्रीं क्लीं कृष्णाय गोविंदाय नमः॥ ततूबहिर्जग ॥४०॥
न्मोहन बीजयुक्तं वृत्तं क्लीमिति॥ वृत्तात् बहिश्चतुर्दशदळपद्मं॥

तेषु दळेषु लक्ष्मीनारायण हयग्रीव गोपाल दधिवामन मंत्राश्च॥
ॐ ह्रीं ह्रीं श्रीं श्रीं लक्ष्मीवासुदेवाय नमः॥ ॐ नमस्सर्वकोटिसर्ववि
द्याराजाय क्लीं कृष्णाय गोपालचूडामणये स्वाहा॥ ॐ नमोभगव
ते दधिवामनाय॥ तद्दळसंधिषु अन्नपूर्णेश्वरी मंत्रः॥ ह्रीं पद्माव
त्यंनपूर्णे माहेश्वरी स्वाहा॥ ततू बहिः प्रणवमालायुक्तं वृत्तं॥ वृत्ता
तू बहिः षोडशदळपद्मं॥ तेषु दळेषु श्रीकृष्णसुदर्शनषोडशाक्षर
मंत्रौ च॥ ॐ नमोभगवते रुक्मिणीवल्लभाय स्वाहा॥ ॐ नमोभग
वते महासुदर्शनाय हुं फट्॥ तद्दळसंधिषु वराहसुदर्शनमालामंत्र

123A / 1930

त्रिपा.

श्च॥ अआइईउऊऋॠऌॡएऐओऔअंअः॥ सुदर्शनमहाचक्राय उप.
दीप्तरूपाय सर्वतो मां रक्ष रक्ष सहस्रार हुं फट् स्वाहा॥ ततो बहिर्वराह
बीजयुक्तं वृत्तं॥ तद्धुमिति॥ वृत्तात् बहिरष्टादळपद्मं॥ तेषु दळेषु श्री
कृष्णवामनाष्टादशाक्षरमंत्रौ॥ क्लीं कृष्णाय गोविंदाय गोपीजनव
ल्लभाय स्वाहा॥ ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा॥ तद्दळ
कपोलेषु गरुडपंचाक्षरमंत्रो गरुडमालामंत्रः॥ क्षिप ॐ स्वाहा॥ ॐ
नमः पक्षिराजाय सर्वविषभूतरक्षःकृत्यादिछेदनाय सर्वेष्टसाधका ॥ ४५ ॥
य स्वाहा॥ ततो बहिर्मायाबीजयुक्तं वृत्तं॥ वृत्तात् बहिः पुनरष्टदळपद्मं

तेषु दळेषु श्रीकृष्णवामनाष्टाक्षरमंत्रौ॥ ॐ नमो दामोदराय॥ ॐ वां
वामनाय नमः॥ तद्दलकपोलेषु नीलकंठत्र्यक्षरी गरुडपंचाक्षरमं
त्रौ च॥ प्रं री ठः नमोऽजाय॥ ततो बहिर्मन्मथबीजयुक्तं वृत्तं॥ वृत्ताद्ब
हिश्चतुर्विंशद्दलपद्मं॥ तेषु दलेषु शरणागतनारायमंत्रो नारायण
हयग्रीवगायत्रीमंत्रौ च॥ श्रीमंनारायणचरणौ शरणं प्रपद्ये॥ श्रीम
ते नारायणाय नमः॥ नारायणाय विद्महे हयग्रीवाय धीमहि॥ तन्नो
हंसः प्रचोदयात्॥ तद्दळकपोलेषु नृसिंहसुदर्शनब्रह्मगायत्रीमंत्रा
श्च॥ वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि॥ तन्नो नृसिंहः प्रचोद
२वासुदेवाय धीमहि॥ तन्नो विष्णुः प्रचोदयात्॥ वागीश्वराय विद्महे ×

125
1770

त्रिपा. दस्मन्तु॥ सुदर्शनायविद्महेहेतिराजायधीमहि॥ तंनःचक्रःप्रचोदया ७५.
त्॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि॥ धियोयोनःप्रचोदयात्
तत्बहिर्हयग्रीवाक्षरयुक्तंवृत्तं॥ हसौमिति॥ वृत्तात्बहिर्द्वात्रिंश
द्दळपद्मं॥ तेषुदळेषुनृसिंहहयग्रीवानुष्टुभमंत्रौ॥ उग्रंवीरंमहावि
ष्णुंज्वलंतंसर्वतोमुखं॥ नृसिंहंभीषणंभद्रंमृत्युंमृत्युंनमाम्यहं॥ ऋ
ऋग्यजुस्सामरूपायवेदाहरणकर्मणे॥ प्रणवोद्गीथवपुषेमहा
श्वशिरसेन्नमः॥ तद्दळकपोलेषुरामकृष्णानुष्टुभमंत्रौ॥ रामभद्र ॥६७॥
महेष्वासरघुवीरनृपोत्तम॥ भोदशास्यांतकास्माकंरक्षांदेहिश्रि

यंचते॥ देवकीसुतगोविंदवासुदेवजगत्पते॥ देहिमेतनयंकृष्णत्वाम
हंशरणंगतः॥ तत्बहिःप्रणवसंपुटिताग्निबीजंयुक्तंवृत्तं॥ ॐरंॐ 127/1970
इति॥ वृत्तात्बहिष्षट्त्रिंशद्दळपद्मं॥ तेषुदळेषुहयग्रीवषट्त्रिं
शदक्षरमंत्रः॥ पुनरष्टत्रिंशदक्षरमंत्रः॥ हंसःविश्वोत्तीर्णस्वरूपाय
चिन्मयानंदरूपिणेतुभ्यंनमोहयग्रीवविद्याराजायविष्णवे॥ सो
हंहसौंॐनमोभगवतेहयग्रीवायसर्ववागीश्वरेश्वरायसर्ववे
दमयायसर्वविद्यांमेदेहिस्वाहा॥ तद्दळकपोलेषुप्रणवादिनमों
ताश्चतुर्थ्यंताःकेशवादिचतुर्विंशतिमंत्राश्च॥ अवशिष्टद्वादश

स्थानेषु राम कृष्ण गायत्री द्वयवर्णचतुष्टयमेकैकस्थले ॥ ॐ केशवाय नमः ॥ ॐ नारायणाय नमः ॥ ॐ माधवाय नमः ॥ ॐ गोविंदाय नमः ॥ ॐ विष्णवे नमः ॥ ॐ मधुसूदनाय नमः ॥ ॐ त्रिविक्रमाय नमः ॥ ॐ वामनाय नमः ॥ ॐ श्रीधराय नमः ॥ ॐ हृषीकेशाय नमः ॥ ॐ पद्मनाभाय नमः ॥ ॐ दामोदराय नमः ॥ ॐ संकर्षणाय नमः ॥ ॐ वासुदेवाय नमः ॐ प्रद्युम्नाय नमः ॥ ॐ अनिरुद्धाय नमः ॥ ॐ पुरुषोत्तमाय नमः ॥ ॐ अधोक्षजाय नमः ॥ ॐ नारसिंहाय नमः ॥ ॐ अच्युताय नमः ॥ ॐ जनार्दनाय नमः ॥ ॐ उपेंद्राय नमः ॥ ॐ हरये नमः ॥ ॐ श्रीकृष्णा

यनमः ॥ दाशरथाय विद्महे सीतावल्लभाय धीमहि ॥ तंनो रामः प्रचोदयात् ॥ दामोदराय विद्महे वासुदेवाय धीमहि ॥ तंनः कृष्णः प्रचोदयात् ॥ ततू बहिः प्रणवसंपुटितांकुशबीजयुक्तं वृत्तं ॐ क्रों ॐ मिति ॥ ततू बहिः पुनः वृत्तं ॥ तन्मध्ये द्वादशाकुक्षिस्थानानि सांतरालानि ॥ तेषु कौस्तुभ वनमाला श्रीवत्स सुदर्शन गरुड पद्म ध्वजानंत शार्ङ्ग गदा शंख नंदक मंत्राः ॥ प्रणवादिनमोंताश्चतुर्थ्यंताः क्रमेण ततदंतरालेषु ॥ विष्वक्सेनाय नमः ॥ आचक्राय स्वाहा ॥ विचक्राय स्वाहा ॥ सुचक्राय स्वाहा ॥ धीचक्राय स्वाहा ॥ संचक्राय स्वाहा ॥ ज्वा

129
1970

त्रिपा॰ ल्काचक्राय स्वाहा॥ क्रुद्धोल्काय स्वाहा॥ ॐ क्रुद्धोल्काय स्वाहा॥ ॐ उप॰
वीर्याय स्वाहा॥ ॐ द्युल्काय स्वाहा॥ ॐ सहस्रोल्काय स्वाहा॥ इति प्र
णवादि मंत्राः॥ ततू बहिः प्रणवसंपुटित गरुड पंचाक्षर युक्तं दत्तं॥
ॐ क्षिप ॐ स्वाहा॥ तच्च द्वादश वज्रैः सांतरालैरलंकृतं॥ तेषु वज्रेषु
ॐ पद्मनिधये नमः॥ ॐ महापद्मनिधये नमः॥ ॐ गारुडनिधये
नमः॥ ॐ शंखनिधये नमः॥ ॐ मकरनिधये॰॥ ॐ कच्छपनिध- ॥४४॥
ये नमः॥ ॐ विद्यानिधये नमः॥ ॐ परमानंदनिधये॰॥ ॐ मोक्ष-
निधये॥ ॐ लक्ष्मीनिधये॰॥ ॐ ब्रह्मनिधये॰॥ श्रीमुकुंदनिधये॰॥

तत्संधिस्थानेषु विद्याकल्पतरवे नमः॥ आनंदकल्पतरवे नमः॥
मुक्तिकल्पतरवे नमः॥ ॐ अमृतकल्पतरवे नमः॥ ॐ बोधकल्प- 131
तरवे नमः॥ ॐ विभूतिकल्पतरवे नमः॥ ॐ वैकुंठकल्पतरवे 1970
नमः॥ ॐ वेदकल्पतरवे नमः॥ ॐ योगकल्पकतरवे नमः॥ ॐ
पद्मकल्पकतरवे नमः॥ ॐ पद्मकल्पकतरवे नमः॥ तच्च शिवगा-
यत्री परब्रह्ममंत्राणां वर्णैः वृत्तासंवेष्टय॥ तत्पुरुषाय विद्महे
महादेवाय धीमहि॥ तन्नो रुद्रः प्रचोदयात्॥ श्रीमन्नारायणो

भिपा. ज्योतिरात्मानारायणःपरं॥ नारायणपरंब्रह्मनारायणनमोस्तु उप.
ते॥ इत्यष्टौ॥ ततूबहिःप्रणवसंपुटितश्रीबीजयुक्तंवृत्तं॥ ॐ श्री
मोमिति॥ वृत्तात् बहिश्चत्वारिंशद्दळपद्मं॥ तेषुदळेष्वात्मति
शिवस्संपुटितवेगायत्रीपादचतुष्टयसूर्याष्टाक्षरीमंत्रौ॥ ॐ भूः
ॐ भुवः॥ ॐ सुवः॥ ॐ महः॥ ॐ जनः॥ ॐ तपः॥ ॐ सत्यं॥ ॐ तत्सवि
तुर्वरेण्यं॥ ॐ भर्गोदेवस्यधीमहि॥ ॐ धीयोयोनःप्रचोदया
त्॥ ॐ परोरजसिसावदों॥ ॐ मापोज्योतीरसोमृतंब्रह्मभूर्भुव ॥४५॥
स्वरों॥ ॐ घृणिस्सूर्यआदित्यः॥ तद्दळसंधिषुप्रणवश्रीबीजसं

पुटितनारायणबीजंसर्वत्र॥ ॐ श्रीअंश्रीॐ॥ ततूबहिरष्टशूलां 133
कितभूचक्रं॥ चक्रांतश्चतुर्दिक्षुहंसस्सोहंमंत्राः॥ प्रणवसंपुटिता 1970
नारायणास्त्रमंत्रश्च॥ ॐ हंसस्सोहं॥ ॐ नमोनारायणायहुंफट्
ततबहिःप्रणवमालासंयुक्तंवृत्तं॥ वृत्तात् बहिःपंचाशद्दळपद्मं॥
तेषुदलेषुमातृकापंचाक्षरमालाक्षकारवर्णान्तद्दळसंधिषुप्रण
वश्रीबीजसंपुटितरामकृष्णमालामंत्रौ॥ ॐ श्रीॐ नमोभगव
तेरघुनंदनायरक्षोघ्नविशारदायमधुरप्रसंनवदनायअमिततेः
जसेबलायरामायविष्णवेनमः॥ श्रीॐ ॐ नमःकृष्णायदेवकीपु

त्रिपा· नायवसुदेवाय निगळच्छेदनाय सर्वलोकाधिपतये सर्वजगन्मोह· उप·
नाय विस्मवेकामितार्थदायस्वाहा॥ श्रीॐ॥ तत्रूबहिरष्टभूलां·
कितभस्त्वकं॥ तेषु प्रणवसंपुटितमहानीलकंठमंत्रवर्णानि॥·
ॐ ॐ नमोनीलकंठायॐ॥ भूलाग्रेषुलोकपालमंत्राः॥ प्रणवा
दिनमोंताश्चतुर्थ्यंताः क्रमेण॥ ॐ इंद्रायनमः॥ ॐ अग्नये·॥
ॐ यमाय·॥ ॐ निर्रूतये·॥ ॐ वरूणाय·॥ ॐ वायवे·॥ ॐ सो
माय·॥ ॐ ईशानाय·॥ तत्रूबहिः प्रणवमालायुक्तवृत्तत्रयं॥ त ॥४५॥
त्रूबहिः भूपुरचतुष्टयं॥ चतुर्द्वारयुतं॥ वक्रकोणचतुष्टयमष्ट

कल्वविभूषितं॥ तेषुवज्रेषु प्रणवश्रीबीजसंपुटितामृतबीजद्व 135/1970
यं॥ ॐ श्रीॐ वं वं श्रीॐमितिबहिर्भूपुरवीथ्यां॥ ॐ आधारशक्त्यै
नमः॥ ॐ मूलप्रकृत्यै·॥ ॐ आदिकूर्माय·॥ ॐ अनंताय·॥ ॐ पृ
थिव्यै·॥ मध्यपुरवीथ्यां॥ ॐ क्षीरसमुद्राय·॥ ॐ रत्नद्वीपाय·॥ ॐ
रत्नमंडपाय·॥ ॐ श्वेतछत्राय·॥ ॐ कल्पकवृक्षाय·॥ ॐ रत्नसिं
हासनाय·॥ ॐ प्रथमभूपुरवीथ्यां॥ धर्मज्ञानवैराग्यैश्वर्याध·
र्माज्ञानावैराग्यानैश्वर्यसत्वरजस्तमो मायाविद्यानंताप्माःप्र·
णवादिनमोंताश्चतुर्थ्यंताः क्रमेण॥ बाह्यवृत्तवीथ्यां॥ निमलोक

र्षिणी ज्ञानाक्रियायोगशक्तीसमेशानाः प्रणवादिनमोंताश्चतु

र्थ्यंताः क्रमेण॥अंतर्दलवीथ्यां॥ॐ अनुग्रहायै॥ॐ नमो भगव

ते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मकसंयोगयोगपीठा

त्मने नमः॥दलाग्रकाशेषु॥बीजं प्राणं च शक्तिं च दृष्टिं वश्यादिकं त

था॥मंत्रयंत्राख्यगायत्रीप्राणस्थापनमेव च॥भूतदिक्पालबीजा

नि यंत्रस्यांगानि वै दश॥मूलमंत्रमात्रामंत्रकवचादिग्बंधनमं ॥४७॥

त्राश्च॥एवंविधमेतद्यंत्रं॥महामंत्रमयं योगधिरातैः परमंत्रैरलं

कृतं॥षोडशोपचारैरभ्यर्चितं॥जपहोमादिना साधितमेतद्यंत्रं॥ 137

शुद्धब्रह्मतेजोमयं॥सर्वाभयंकरं॥समस्तदुरितक्षयकरं॥सर्वाभी 1970

ष्टसंपादकं॥सायुज्यमुक्तिप्रदं॥एतत्परमवैकुंठमहानारायण

यंत्रं प्रज्वलति॥तस्योपरि निरतिशयानंदतेजोराश्यभ्यंतरस

मासीनं॥वाचामगोचरानंदतेजोराश्याकारं॥चित्साराविर्भूतानं

दविग्रहं॥बोधानंदस्वरूपं॥निरतिशयासौंदर्यपारावारं॥तुर्यस्व

रूपं तुरीयातीतं च॥अद्वैतपरमानंदं निरंतरातितुरीयनिरति

श्रिपा० शयसौंदर्यानंदपारावारं॥लावण्यवाहिनीकल्लोलिततटितूभा उप०
सुरं॥दिव्यमंगळविग्रहं॥मूर्तिमद्भिः परममंगळैरुपसेव्यमानं
चिदानंदमयैरनंतकोटिरविप्रकाशैरनंतभूषणैरलंकृतं॥
सुदर्शनपांचजन्यपद्मगदासिशार्ङ्गमुसलपरिघाद्यैः चिन्मया
नेकायुधगणैः मूर्तिमद्भिः सुसेवितं॥श्रीवत्सकौस्तुभवनमा
लांकितवक्षसं ब्रह्मकल्पवनामृतपुष्पवृष्टिभिः संततमानंदं ॥४८॥
ब्रह्मानंदरसनिर्भरैरसंख्यैरतिमंगळं॥शेषायुतफणाजालवि

पुलच्छत्रशोभितं॥नतफणिमंडलोदर्चिर्मणिज्योतिविग्रहं 139/1970
तरंगकांतिनिर्झरैरलतं॥निरतिशयब्रह्मगंधस्वरूपं॥निरतिश
यानंदब्रह्मगंधविशेषाकारं॥अनंतब्रह्मगंधाकारसमष्टिवि
शेषं॥अनंतानंदतुलसीमाल्यैरभिनवं॥चिदानंदमयानंतपु
ष्पमाल्यैर्विराजमानं॥तेजःप्रवाहतरंगतत्परंपराभिर्ज्वलितं
निरतिशयानंदकांतिविशेषावर्तैरभितोनिशं प्रज्वलंतं॥बो
धानंदमयानंतधूपदीपावळिभिरतिशोभितं॥निरतिशयानं

दचामरविशेषैपरिषेवितं॥ निरंतरनिरुपमनिरतिशयोत्कट
सानानानंदानुगतगुच्छफलैरलंकृतं॥ चिन्मयानंददिव्यविमान
च्छत्रध्वजराजिभिः विराजमानं॥ परममंगलानंतदिव्यतेजोभिः
ज्वलितमनिशं॥ वाचामगोचरानंततेजोराश्यंतर्गतं॥ अर्धमात्रा
त्मकंतुरीयध्वन्यात्मकं॥ तुरीयातीतमवाच्यं॥ नादबिंदुकलाध्या
त्मस्वरूपंचेति॥ इत्याद्यनंताकारेणावस्थितं॥ निर्गुणं निष्क्रियं
निर्मलं निरवद्यं निरंजनं निराकारं॥ निराश्रयं निरतिशयाद्वै
तपरमानंदलक्षणं॥ आदिनारायणं ध्यायेदित्युपनिषत्॥

इत्यथर्वणमहानारायणोपनिषदि परममोक्षस्वरूपद्वारात्रि 141
पाद्विभूतिपरमवैकुंठमहानारायणयंत्रस्वरूपनिरूपणंना 1970
मसप्तमोध्यायः॥७॥ ततः पितामहः परिपृच्छति भगवंतं म
हाविष्णुं॥ भगवन् शुद्धाद्वैतपरमानंदलक्षणपरंब्रह्मलक्षणस्त्
वकथं विरुद्धवैकुंठप्रासादप्राकारविमानाद्यनंतवस्तुभेदः॥ सत्य
मेवोक्तमिति भगवान् महाविष्णुः परिहरति यदा शुद्धसुवर्णस्य
कटकमकुटांगदादिभेदः॥ यथा समुद्रसलिलस्य स्थूलसूक्ष्मत
रंगफेनबुद्बुदकरकलवणपाषाणाद्यनंतवस्तुभेदः॥ यथाभू

त्रिपा०

मेः पर्वतवृक्षतृणगुल्मलताद्यनंतवस्तुभेदः॥ तथैवाद्वैतपर
मानंदलक्षणं परब्रह्मणो मम सर्वाद्वैतमुपपन्नं भवत्येव॥ म
त्स्वरूपमेव सर्वमद्व्यतिरिक्तमणुमात्रं न विद्यते॥ पुनः पिता
महः परिपृच्छति॥ भगवन् परमवैकुंठ एव परममोक्षः॥ परः
मोक्षस्त्वेक एव श्रूयते सर्वत्र॥ कथमनंतवैकुंठाश्चानंतानंद
समुद्रादयश्चानंतमूर्तयस्संतीति॥ तथेति होवाच भगवान् ॥५०॥
महाविष्णुः॥ एकस्मिन्नविद्यापादे अनंतकोटिब्रह्मांडानि साव

उप०

वरणानि श्रूयंते॥ तस्मिन्नेकस्मिन्नंडे ब्रह्मलोकाश्चानंतवि
भूतयश्च सन्त्येव॥ सर्वांडेष्वनंतलोकाश्चानंतवैकुंठास्संतीति।
सर्वेषां खल्वभिमतं॥ पादत्रयेपि किंवस्त्वं निरतिशयानंदावि
र्भावो मोक्ष इति मोक्षलक्षणं पादत्रये वर्तते॥ तस्मात् पादत्रयं
परममोक्षः॥ पादत्रयं परमवैकुंठः॥ पादत्रयं परमकैवल्यमि-
ति॥ ततश्शुद्धचिदानंदब्रह्मविलासानंदाश्चानंतपरमानंद-
विभूतयश्चानंतपरमानंदसमुद्रादयस्संत्येव॥ उपासकस्तु ता-

143/1970

त्रिपा. ध्येत्यएवंविधंनारायणंध्यात्वाप्रदक्षिणनमस्कारान्विधायवि उप.
विधोपचारैरभ्यर्च्यनिरतिशयाद्वैतपरमानंदलक्षणोभूत्वात
दग्रेसावधानेनोपविश्याद्वैतयोगमास्थायसर्वाद्वैतपरमानंदल
क्षणाखंडामिततेजोराश्याकारंविभाव्योपासकस्स्वयंशुद्धबोधा
नंदमयामृतनिरतिशयानंदतेजोराश्याकारोभूत्वामहावाक्या
र्थमनुस्मरन्॥ब्रह्माहमस्मि॥अहमस्मिब्रह्माहमस्मि॥अह
मेवाहंमांजुहोमिस्वाहा॥अहंब्रह्मेतिभावनयायथापरमतेजो ॥५४॥
महानदिप्रवाहाः॥परमतेजःपारावारेप्रविशंति॥यथापरम॰

तेजःपारावारतरंगाःपरमतेजःपारावारेप्रविशंति॥तथैवसच्चि 145/1970
दानंदात्मोपासकः॥सर्वपरिपूर्णाद्वैतपरमानंदलक्षणपरंब्रह्म
ण्णिनारायणेमयिसच्चिदानंदात्मकोहमजोहंपरिपूर्णोहमस्
स्मीति॥प्रविवेश॥ततउपासकोनिस्तरंगाद्वैतपारनिरतिश
यसच्चिदानंदसमुद्रोबभूव॥यस्त्वनेनमार्गेणसम्यगाचरति॥
सनारायणोभवत्यसंशयमेव॥अनेनमार्गेणसर्वेमुनयस्सि॰
द्धिंगताः॥असंख्याताःपरमयोगिनश्चसिद्धिंगताः॥ततःशिष्यो
गुरुंपरिपृच्छति॥भगवन्साखंडनिरालंबयोगोकथमिति॥सा

लंबस्तु करचरणादिमूर्तिविशिष्टं॥ मंडलाद्यालंबनं सालंबयो
गः॥ निरालंबस्तु समस्तनामरूपकर्मादिदूरतया सर्वकामाद्यंतः
करणसाक्षितया तदालंबनशून्यतया च भावनं निरालंबयोगः
अथ च निरालंबयोगाधिकारी कीदृशो भवति॥ अमानित्वादिल
क्षणोपलक्षितो यः पुरुषस्स एव निरालंबयोगाधिकारी॥ क्वार्यः
कश्चिदस्ति॥ तस्मात् सर्वेषामधिकारिणामनधिकारिणां भक्ति
योग एव प्रशस्यते॥ भक्तियोगो निरुपद्रवः॥ भक्तियोगान्मुक्तिः ॥५८॥
बुद्धिमतामनायासेनाचिराद्देव तत्त्वज्ञानं भवति॥ तत्कथमिति भ

क्तवत्सलस्स्वयमेव सर्वेभ्यो मोक्षविघ्नेभ्यो भक्तिनिष्ठान् सर्वान् 147
परिपालयति॥ सर्वाभीष्टान् प्रयच्छति॥ मोक्षं दापयति चतुर्मु 1930
खादीनां॥ सर्वेषामपि विना विष्णुभक्त्या कल्पकोटिभिर्मोक्षो
न विद्यते॥ कारणेन विना कार्यं नोदेति॥ भक्त्या विना ब्रह्मज्ञा
नं कदापि न जायते॥ तस्मात्त्वमपि सर्वोपायान् परित्यज्य भक्ति
माश्रय॥ भक्तिनिष्ठो भव भक्तिनिष्ठो भव भक्त्या सर्वसिद्धयस्सि
ध्यंति॥ भक्तेरसाध्यं न किंचिदस्ति॥ एवंविधं गुरूपदेशमाकर्ण्य
सर्वं परमतत्त्वरहस्यमवबुध्य सर्वसंशयान्विधूय क्षिप्रमेव मोक्षं

निश्चित्य ततश्शिष्यस्समुत्थाय प्रदक्षिणनमस्कारं कृत्वा गुरुभ्यो
गुरुपूजां विधाय गुर्वनुज्ञया क्रमेण भक्तिनिष्ठो भूत्वा॥ भक्त्यति
शयेन पक्वविज्ञानं प्राप्य तस्मादनायासेन शिष्यः क्षिप्रमेव साक्षा
न्नारायणो बभूवेत्युपनिषत्॥ ततः प्रोवाच भगवान्महाविष्णुश्च
तुर्मुखमवलोक्य ब्रह्मन् परमतत्त्वरहस्यं ते सर्वं कथितं॥ तत्स्मर
णमात्रेण मोक्षो भवति॥ तदनुष्ठानेन सर्वमविदितं विदितं भव
ति॥ तत्सर्वपरमं रहस्यं कथितं॥ गुरुः क इति॥ गुरुस्साक्षादादि ॥५८॥
नारायणः पुरुषः॥ स आदिनारायणोऽहमेव॥ तस्मान्मामेकं शर

ण्यं व्रज॥ मद्भक्तिनिष्ठो भव॥ मदीयोपासनां कुरु॥ मामेव प्राप्स्य 149/1970
सि॥ मद्व्यतिरिक्तं सर्वं बाधितं॥ मद्व्यतिरिक्तमबाधितं न किंचिद
स्ति॥ निरतिशयानन्दोऽद्वितीयोऽहमेव॥ सर्वपरिपूर्णोऽहमेव॥ सर्वा
श्रयोऽहमेव॥ वाचामगोचरनिराकारपरब्रह्मस्वरूपोऽहमेव॥ म
द्व्यतिरिक्तमणुमात्रं न विद्यते॥ इत्येवं महाविष्णोः परममिममु
पदेशं लब्ध्वा पितामहः परमानन्दं प्राप॥ विष्णोः कराभिदर्श
नेन दिव्यज्ञानं प्राप्य पितामहः ततस्समुत्थाय प्रदक्षिणनम

स्कारान्विधायविविधोपचारैर्महाविष्णुंप्रपूज्यप्रांजलिर्भूत्वाविन
येनोपसंगम्यभगवन्भक्तिनिष्ठामेप्रयच्छत्वदभिन्नंमांपरिपालय
कृपालय॥तथैवसाधुसाध्वितिसाधुप्रशंसापूर्वकंमहाविष्णुःप्रो
वाच॥मदुपासकःसर्वोत्कृष्टःसभवति॥तदुपासयासर्वमंगला
निभवंति॥मदुपासनयासर्वंजयति॥मदुपासकःसर्ववंद्योभवति
मदीयोपासकस्यासाध्यंनकिंचिदस्ति॥सर्वेबंधाःप्रविनश्यंति॥स
द्भक्तमिवसर्वेदेवास्तंसेवंते॥महाश्रियाश्चसेवंतेमोपासकस्त
स्मान्निरतिशयाद्वैतपरमानंदलक्षणपरंब्रह्मभवति॥योवैमुमु

क्षुरनेनमार्गेणसम्यगाचरति॥सपरमानंदलक्षणपरंब्रह्मभवति
यस्तुपरमतत्त्वरहस्याथर्वणमहानारायणोपनिषदमधीते॥स
र्वेभ्यःपापेभ्योमुक्तोभवति॥ज्ञानाज्ञानकृतेभ्यःपातकेभ्योमुक्तो
भवति॥महापातकेभ्यःपूतोभवति॥रहस्यकृतप्रकाशकृतचिर
कालात्यंतकृतेभ्यस्तेभ्यःसर्वेभ्योपापेभ्योमुक्तोभवति॥सकल
लोकांजयति॥ससकलमंत्रजपनिष्ठोभवति॥ससकलवेदांत
रहस्याधिगतपरमार्थज्ञोभवति॥ससकलभोगभुग्भवति॥स
सकलयोगविद्भवति॥ससकलजगत्परिपालकोभवति॥

157
1970

 सोप्येतत्परमानंदलक्षणपरंब्रह्मभवति॥इदंपरमतत्वरहस्यं
नवाच्यंगुरुभक्तिविहीनायनचाशुश्रूषवेवाच्यंनतपोविहीनाय
नास्तिकायनडांभिकायमङ्क्तिविहीनायमात्सर्यांकितवेनवा॰
च्यंनवाच्यं॥मदस्यूयपरायकृतघ्नायइदंपरमरहस्यंमद्भक्तेभ्य॰
भिदास्यति॥मत्भक्तिनिष्ठोभूत्वामामेवप्राप्स्यति॥आवयोर्य
ईमंसवादमध्येप्यतीसनरोब्रह्मनिष्ठोभवति॥श्रुद्धावाननसू
युश्रणुयात्पतिवापठमंसंवादमावयोस्सपुरुषोमत्सायुज्य ॥५५॥
मेतितनतोमहाविष्णुस्तिरोदधे॥ततोब्रह्मास्वस्थानंजगामे

त्युपनिषत्॥ ॥इत्यथर्वणमहानारायणोपनिषदिपरमसा 153
युज्यमुक्तिस्वरूपनिरूपणंनामअष्टमोध्यायः॥८॥ उत्तरकां 1970
डस्समाप्तः॥भद्रंकर्णेभिरितिशांतिः॥इतित्रिपाद्विभूतिमहा
नारायणउपनिषत्समाप्तः॥ ॥शुभंभवतु॥ ॥छ॥

॥ इतित्रिपाद्विभूतिमहानारायणउपनिषत्समाप्तः॥

॥५६॥

155/1470

॥अथयोगचूडामणिउपनिषत्प्रारंभः॥

योगचूडा श्रीगणेशायनमः॥ आप्यायंत्विति शांतिः॥ ॥योगचूडामणिं मणीउ॰
वक्ष्येयोगिनांहितकाम्यया॥कैवल्यंसिद्धिदंगूढंसेवितंयोगवि
१ त्तमैः॥आसनंप्राणसंरोधःप्रत्याहारश्चधारणा॥ध्यानंसमाधिरे
तानियोगांगानिभवंतिषट्॥एकंसिद्धासनंप्रोक्तंद्वितीयंकमलास
नं॥षट्चक्रंषोडशाधारंत्रिलक्ष्यंव्योमचक्रकं॥स्वदेहेयोनजानाति
तस्यसिद्धिःकथंभवेत्॥चतुर्दलंस्यादाधारंस्वाधिष्ठानंचषड्दलं॥
नाभौदशदलंपद्मंभ्रूमध्येद्विदलंतथा॥सहस्रदलसंख्यातंब्रह्मरं
ध्रेमहापथि॥आधारंप्रथमंचक्रंस्वाधिष्ठानंद्वितीयकं॥योनिस्थानं १
द्वयोर्मध्येकामरूपंनिगद्यते॥कालाख्यंतुगुदस्थानेपंकजंतुचतुर्द

लं॥तन्मध्येप्रोच्यतेयोनिःकामाख्यासिद्धवंदिता॥तस्यमध्येमहालिं
गंपश्चिमाभिमुखंस्थितं॥नाभौतुमणिवद्बिंबंयोजानातिसयोगवि
त्॥तप्तचामीकराभासंतडिल्लेखेवविस्फुरत्॥त्रिकोणंतत्पुरंवह्नेः
अधोमेढ्रात्प्रतिष्ठितं॥समाधौपरमंज्योतिरनंतंविश्वतोमुखं॥त
स्मिन्दृष्टेमहायोगेयातायातोनविद्यते॥स्वशब्देनभवेत्प्राणःस्वा
धिष्ठानंतथाश्रयं॥स्वाधिष्ठानाश्रयादस्मात्मेढ्रमेवाभिधीयते॥
तंतुनामणिवत्प्रोतोयोत्रकंदःसुषुम्नया॥तंनाभिमंडलेचक्रंप्रोच्य
तेमणिपूरकं॥द्वादशारेमहाचक्रेपुण्यपापविवर्जिते॥तावज्जीवोभ्र
मत्येवयावत्तत्वंनविंदति॥ऊर्ध्वंमेढ्रादधोनाभौकंदेयोनिःखगांड

वत्॥ तत्रनाड्यः समुत्पन्नास्सहस्राणाद्विसप्ततिः॥तेषुनाडीसह
स्रेषुद्विसप्ततिरुदाहृताः॥प्राधानाः प्रणवाहिन्योभूयस्तास्तुदश
स्मृताः॥इत्याचपिंगळाचैवसुषुम्नाचतृतीयगा॥गांधारीहस्तिजि
व्हाचपूषाचैवयशस्विनी॥अलंबुसाकुहूचैवशंखिनीदशमीस्मृता
॥एतंनाडीमहाचक्रंज्ञातव्यंयोगिभिःसदा॥इडावामेस्थिताभागेद
क्षिणापिंगळास्मृता॥सुषुम्नामध्यदेशेतुगांधारीवामचक्षुषि॥द
क्षिणेहस्तिजिह्वाचपूषाकर्णेचदक्षिणे॥यशस्विनीवामकर्णेचा
ननेचाप्यलंबुसा॥कुहूश्चलिंगदेशेतुमूलस्थानेतुशंखिनी॥ए
वंद्वारंसमाश्रित्यतिष्ठंतेनाड्यः क्रमात्॥इडापिंगलसौषुम्नाः

प्राणमार्गेणसंस्थिताः॥सततंप्रणवाहिन्यःसोमसूर्याग्निदेवताः॥
प्राणापानसमानाख्यव्यानोदानंचवायवः॥नागःकूर्मोथकृकरो
देवदत्तोधनंजयः॥हृदिप्राणास्थितोनित्यंअपानोगुदमंडले॥समा
नोनाभिदेशेतुउदानःकंठमध्यगः॥व्यानःसर्वशरीरेतुप्रधानाः
पंचवायवः॥उत्गारेनागआख्यातःकूर्मउन्मीलनेतथा॥कृकरः
क्षुत्करोज्ञेयोदेवदत्तोविजृंभणी॥नजहातिमृतंचापिसर्वव्यापी
धनंजयः॥एतेनाडिषुसर्वासुभ्रमंतेजीवजंतवः॥आक्षिप्तोभुजदं
डेनयथाचलतिकंतुकः॥प्राणापानासमाक्षिप्तस्तथाजीवोनतिष्ठ
ति॥प्राणापानवशोजीवोत्यधश्चोर्ध्वंचधावति॥वामदक्षिणमार्गा

153 / 1970

भ्यां चंचलत्वांन दृश्यते॥ रज्जुबद्धो यथा श्येनो गतो प्याकृष्यते पुनः॥
गुणबद्धस्तथा जीवः प्राणा पानेन कर्षति॥ प्राणा पानवशो जीवो ह्य
धश्चोर्ध्वं च गच्छति॥ अपानः कर्षति प्राणं प्राणो पानेन कर्षति॥ ऊर्ध्वा
धः संस्थितावेतौ यो जानाति स योगवित्॥ हकारेण बहिर्याति सका
रेण विशेत् पुनः॥ हंसहंसेत्यमुं मंत्रं जीवो जपति सर्वदा॥ षट्शता
नि दिवारात्रौ सहस्राण्येकविंशतिः॥ एतत् संख्यान्वितं मंत्रं जीवो ज
पति सर्वदा॥ अजपानाम गायत्री योगिनां मोक्षदा सदा॥ अस्याः सं
कल्पमात्रेण सर्वपापैः प्रमुच्यते॥ अनया सदृशी विद्या अनया स ३
दृशो जपः॥ अनया सदृशं ज्ञानं न भूतं न भविष्यति॥ कुंडलिन्यां

समुद्भूता गायत्री प्राणधारिणी॥ प्राणविद्या विद्यायस्तां वेत्ति स वे
दवित्॥ कंदोर्ध्वे कुंडली शक्तिः अष्टधा कुंडलाकृतिः॥ ब्रह्मद्वार 161
मुखं नित्यं मुखेनाछाद्य तिष्ठति॥ येन द्वारेण गंतव्यं ब्रह्मद्वारमना 1970
मयं॥ मुखेनाछाद्य तद्द्वारं प्रसुप्ता परमेश्वरी॥ प्रबुद्धा वह्नियोगेन
मनसा मरुता सह॥ सुची ब्रह्मणिमादाय व्रजत्यूर्ध्वं सुषुम्नया॥ उ
द्घातयेत्कवाटं तु यथा कुंचितया गृहं॥ कुंडलिन्या योगी मोक्ष
द्वारं प्रभेदयेत्॥ कृत्वा संपुटितौ करौ दृढतरं बध्वातु पद्मासनं गाढं
वक्षसि संनिधाय चुबुकं ध्यानं च तच्चेतसि॥ वारंवारमपानमूर्ध्व
मनिलं प्रोच्चारयेत् पूरितं मुंचन् प्राणमुपैति बोधमतुलं शक्तिः

प्रभावांनरः॥ अंगानांमर्द्दनंकृत्वाश्रमसंजातवारिणा॥ खट्वाम्ल लवणत्यागी क्षीरभोजनमाचरेत्॥ ब्रह्मचारीमिताहारीयोगीयोगपरायणाः॥ अब्दादूर्ध्वंभवेत्सिद्धोनात्रकार्याविचारणा॥ स्कस्निग्धमधुराहारं चतुर्थांशविवर्जितं॥ भोज्यतेशिवसंप्रीत्यैमिताहारीसउच्यते॥ कंदोर्ध्वंकुंडलीशक्तिरष्टधाकुंडलाकृतिः॥ बंधनायचमूढानांयोगिनांमोक्षदासदा॥ महामुद्रानभोमुद्राउड्यापंचजलंधरं॥ मूलबंधंचयोवेत्तिसयोगीमुक्तिभाजनं॥ पार्ष्णिघातेनसंपीड्ययोनिमाकुंचयेद्दृढं॥ अपानमूर्ध्वमाकृष्यमूलबंधोविधीयते॥ अपानप्राणयोरैक्यंक्षयान्मूत्रपुरीषयोः॥ युवाभव

तिवृद्धोपिसततंमूलबंधनात्॥ ओड्याणंकुरुतेयस्मादविश्रांतमहाखगः॥ उडीयाणंतदेवस्यात्मृत्युमातंगकेसरी॥ उदरात्पश्चिमंताणमधोनाभेर्निगद्यते॥ उड्याणमुदरेबंधः तत्रबंधोविधीयते॥ बध्नातीहिशिरोजातमधोगामिनभोजलं॥ ततोजालंधरोबंधः कंठदुखौघनाशनं॥ जालंधरेकृतेबंधेकंटसंकोचलक्षणे॥ नपीयूषंपतत्यग्नौनचवायुःप्रधावति॥ कपालकुहरेजिह्वाप्रविष्टाविपरीतगा॥ भ्रुवोरंतर्गतादृष्टिर्मुद्राभवतिखेचरी॥ नरोगोमरणंतस्यननिद्रानक्षुधानतृषा॥ नचमूर्छाभवेत्तस्ययोमुद्रांवेत्तिखेचरीं॥ पीड्यतेनचरोगेणलिप्यतेनसकर्मभिः॥ बाध्यतेनच

165/1900

केनापियोमुद्रांवेत्तिखेचरीं॥ चित्तंचरतिखेयस्मात्जिह्वाचरतिखे
यतः॥ तेनेयंखेचरीमुद्रासर्वसिद्धिनमस्कृता॥ बिंदुमूलंशरीरा
णिसिरास्तत्रप्रतिष्ठिताः॥ भावयंतिशरीराणिआपादतलमस्तकं॥
खेचर्यामुद्रितंयेनविवरंलंबिकोर्ध्वतः॥ नतस्यक्षीयतेबिंदुःकामि
न्यालिंगितस्यच॥ यावत्बिंदुस्थितोदेहतावन्मृत्यभयंकुतः॥ या
वत्बाधानभोमुद्रातावत्बिंदुर्नगच्छति॥ ज्वलितोपियथाबिंदुः
संप्राप्तश्चहुताशनं॥ व्रजत्यूर्ध्वंगतःशक्त्यानिरुद्धोयोनिमुद्रया॥
सपितद्विविधोबिंदुःपांडरोलोहितस्तथा॥ पांडरंशुक्रमित्याहुः
लोहिताख्यंमहारजः॥ सिंदूरद्रावसंकाशंरविस्थानस्थितंर

जः॥ शशिस्थानस्थितंशुक्लंतयोरैक्यंसुदुर्लभं॥ बिंदुर्ब्रह्मारजः
शक्तिःबिंदुरिंदुरजोरविः॥ उभयोःसंगमादेवप्राप्यतेपरमंपदं॥
वायुनाशक्तिचालेनप्रेरितंचयथारजः॥ यातिबिंदुस्सदैकत्वंभ
वेद्दिव्यवपुस्तथा॥ शुक्लंचंद्रेणसंयुक्तंरजस्सूर्येणसंगतं॥ तयोः
स्समरसैकत्वंयोजानातिसयोगवित्॥ शोधनंनाडिजालस्य
चालनंचंद्रसूर्ययोः॥ रसानांशोषणंचैवमहामुद्राभिधीयते॥ व
क्षोन्यस्तहनुःप्रपीड्यसुचिरंयोनिंचवामांघ्रिणाहस्ताभ्यामनुधा
रयत्प्रसारितंपादंतथादक्षिणं॥ अपूर्यास्यसमानकुक्षीयुगुलंब
ध्वाशनैरेचयेदेतद्व्याधिविनाशनेसुमहतीमुद्रानृणांकथ्यते॥ चं

योगचूडा द्राशेनसमभ्यस्यसूर्यांशेनाभ्यसेत्पुनः॥ यातुल्यातुभवेत्संख्या मणिउ·
८ ततोमुद्रांविसर्जयेत्॥ नहिपथ्यमपथ्यंवारसाःसर्वेपिनीरसाः॥
अतिभुक्तंविषंघोरंपीयूषमिवजीर्यते॥ क्षयकुष्ठगुदावर्तगुल्मजी
र्णपुरोगमाः॥ तस्यरोगाः क्षयंयांतिमहामुद्रांतुनभ्यसेत्॥ कथिते
यंमहामुद्रामहासिद्धिकरीनृणां॥ गोपनीयंप्रयत्नेननदेयायस्यक
स्यचित्॥ पद्मासनंसमारूह्यसमकायशिरोधरः॥ नासाग्रदृष्टिरे
कांतेजपेदोंकारमव्ययं॥ ॐ नित्यंशुद्धंबुद्धंनिर्विकल्पंनिरंजनं॥ नि ८
राख्यातीतमनादिनिधनमेकंतुरीयंयद्भूतंभवत्भविष्यत्परिव

र्तमानंसर्वदानवच्छिन्नंपरंब्रह्मतस्माज्जातापराशक्तिःस्वयंज्यो
तिरात्मिकाआत्मनआकाशःसंभूतः॥ आकाशाद्वायुः॥ वायोर
ग्निः॥ अग्नेरापः॥ अद्भ्यःपृथिवी॥ तेषांपंचभूतानांपतयःपंच॥
सदाशिवेश्वररुद्रविष्णुब्रह्मणश्चेति॥ तेषांब्रह्मविष्णुरुद्राश्चोत्प
त्तिस्थितिलयकर्तारः॥ राजसोब्रह्मासात्विकोविष्णुस्तामसोरुद्रइति
॥एतेत्रयोगुणयुक्ताः ब्रह्मादेवानांप्रथमस्संबभूव॥ धाताचसृष्टे॥
विष्णुश्चस्थितौ॥ रुद्रश्चनाशे॥ भोगायचेंद्रःप्रथमजाबभूवुः॥ ए
तेषांब्रह्मणोलोकाद्देवतिर्यङ्नरश्चस्थावराश्चजायंते॥ तेषांमनु
ष्यादीनांपंचभूतसमवायश्शरीरं॥ ज्ञानकर्मेंद्रियैःप्राणादिपं

167
1970

चवायुमनोबुद्धिचिनाहंकारैः स्थूलकल्पितैः सोपिस्थूलप्रकृति
रित्युच्यते॥ ज्ञानकर्मेंद्रियैः ज्ञानविषयैः प्राणादिपंचवायुः बु
द्धिश्च सूक्ष्मस्थोपिलिंगमेवत्युच्यते॥ गुणत्रययुक्तंकारणं सर्वे
षामेवत्रीणिशरीराणिवर्तंते॥ जागृत् स्वप्न सुषुप्तितुरीयाश्चेत्य
वस्थाचक्रः॥ तासामवस्थानामधिपतयश्चत्वारः पुरुषाः॥ वि
श्वतेजसप्राज्ञात्मानश्चेति॥ विश्वोहिस्थूलभुङ्‌नित्यंतैजसः॥
प्रविविक्तभुक्॥ आनंदभुक्तथाप्राज्ञस्सर्वसाक्षीत्यतःपरः॥
प्रणवस्सर्वदातिष्ठेत्॥ सर्वजीवेषुभोगतः॥ अभिरामस्तुस
र्वासुत्ध्यवस्थास्वत्यथोमुखः॥ अकारउकारमकारश्चेतित्र

योवर्णास्त्रयोवेदाः॥ त्रयोलोकास्त्रयोगुणाः॥ स्त्रयोक्षराणि
स्त्रयः स्वराएवप्रणवः प्रकाशते अकारोजागृतिनेत्रोवर्तते॥
सर्वजंतुषु उकारः कर्णस्वप्नम्काराेत्हृदिस्थस्थितः॥ विराड्वि
श्वस्थूलश्चाकारः॥ हिरण्यगर्भस्तैजससूक्ष्मश्च उकारः॥ का
रणाव्याकृतप्राज्ञश्च मकारः॥ अकारोराजसोरक्तोब्रह्माचेत
नउच्यते॥ उकारः सात्विकः शुक्लोविष्णुरित्याभिधीयते॥ मका
रस्तामसकृष्णारुद्रश्चेतितथोच्यते॥ प्रणवात्प्रणवोब्रह्मप्र
पावात्प्रभवोहरिः॥ प्रणावात्प्रभवोहिपरोभवेत्॥ अकारे
लीयतब्रह्मात्युकारेलीयतहरिः॥ मकारेलीयतेरुद्रः प्रण

169 / 1-770

योगचूडा वोहिप्रकाशते॥ ज्ञानिनामूर्ध्वगोभूयात् अज्ञानीनामधोमुखः मणिउ
८ ॥ एवंवैप्रणवस्तिष्ठेत् यस्तंवेदसवेदवित्॥ अनाहतस्वरूपेण
ज्ञानिनामूर्ध्वगोभवेत्॥ तैलधारमिवाछिन्नंदीर्घघंटानिना
दवत्॥ प्रणावस्यध्वनिस्तद्वत् तदग्रंब्रह्मचोच्यते॥ ज्योतिर्मयं
तदग्रंस्यात् अवाच्यंबुद्धिसूक्ष्मतः॥ ददृशुर्येमहात्मानोयस्तं
वेदसवेदवित्॥ जाग्रंनेत्रद्वयोर्मध्ये हंसएवप्रकाशते॥ सकारः
खेचरीप्रोक्तस्त्वंपदंचेतिनिश्चितं॥ हकारःपरमेशःस्यात् तत्प
दंचेतिनिश्चितं॥ सकारोध्यायतेजंतुःहकारोहिभवेध्रुवं॥ इंद्रि ८
येर्बद्धतजीवः आत्माचैवनबध्यते॥ ममत्वेनभवेज्जीवो नि

र्ममत्वेनकेवलः॥ भूर्भुवःस्वरिमेलोकाः सोमसूर्याग्निदेवताः॥ 131
यस्यमात्रासुतिष्ठंति तत्पदंज्योतिरोमिति॥ क्रियाइच्छातथाज्ञा 1920
नंब्राह्मीरौद्रीचवैष्णवी॥ त्रिधामात्रास्थितिर्यत्र तत्परंज्योतिरो
मिति॥ वचसातज्जपेंनित्यं वपुषातत्समभ्यसेत्॥ मनसातज्ज
पेंनित्यंतत्परंज्योतिरोमिति॥ शुचिर्वाप्यशुचिर्वापियोजपेत्प्र
णवंसदा॥ नसलिप्यतिवापेनपद्मपत्रमिवांभसा॥ चलेवाते
चलोबिंदुःनिश्चलेनिश्चलोभवेत्॥ योगिस्थाणुत्वमाप्नोतिन
तोवायुर्निरुंधयेत्॥ यावद्वायुस्थितोदेहेतावज्जीवोनमुंच
ति॥ मरणंतस्यनिष्क्रांतिस्ततोवायुर्निरुंधयेत्॥ यावद्वद्धो

योगचूडा मरुद्देहेनावज्जीवोनमुंचति॥यावदृष्टिर्भ्रुवोर्मध्येतावत्कालभयं मणिङ
९ कुतः॥कल्पकालभयात्ब्रह्माप्राणायामपरोभवत्॥योगिनो
मुनयश्चैवततःप्राणांनिरोधयेत्॥षड्विंशादंगळीहंसःप्रयाणंकुरु
तेबहिः॥वामदक्षिणमार्गेणप्राणायामाविधीयते॥शुद्धिमेतिय
दासर्वंनाडीचक्रंमलाकुलं॥तथैवजायतेयोगीप्राणसंग्रहणक्ष
मः॥बद्धपद्मासनोयोगीप्राणंचंद्रेणपूजयेत्॥धारयेद्वायथाश
क्त्याभूयःसूर्येणरेचयेत्॥अमृतोदधिसंकाशंगोक्षीरधवळोप
मं॥ध्यात्वाचंद्रसमंबिंबंप्राणायामेसुखीभवेत्॥स्फुरत्प्रज्वल ९
संज्वालापूज्यमादित्यमंडलं॥ध्यात्वाहृदिस्थितंयोगीप्राणाया

मेसुखीभवेत्॥प्राणंचेदिडयापिबेंनियमितंभूयोन्ययारेचये
त्पीत्वापिंगळयासमीरणमथोपीत्वात्यजद्वामया॥सूर्याचंद्र
मसानेकविधिनाबिंदुद्वयंध्यायतःशुद्धानाडिगणाभवंति य
मिनांनासद्वयाहूर्ध्वतः॥यथेष्टधारणंवायोरनलस्यप्रदीपनं।
नादाभिव्यक्तिरारोग्यंजायतेनाडिशोधनात्॥प्राणोदेहस्थितो
यावत्अपानंतुनिरुंधयेत्॥एकश्वाससमयीमात्राऊर्ध्वोनोग
गनेगतिः॥रेचकःपूरकश्चैवकुंभकःप्रणवात्मकः॥प्राणा
यामोभवेक्त्वेवंमात्राद्वादशसंयुतः॥मात्राद्वादशसंयुक्ता
निशाकरदिवाकरो॥दोषजालमवध्नंतौज्ञातव्यौयोगिभिः

योगचूडा स्सदा॥पूरकंद्वादशंकुर्यात्कुंभकंषोडशोभवेत्॥रेचकंदशचों मणिः
१० कारःप्राणायामस्सउच्यते॥अथमेद्वादशामात्रामध्यमेद्विगु
णामता॥उत्तमेत्रिगुणाप्रोक्ताप्राणायामस्यनिर्णयः॥अध
मेस्वेदजननंकंपोभवतिमध्यमे॥उत्तमेस्थानमाप्नोतिततोवायुं
निरुंधयेत्॥बद्धपद्मासनोयोगीनमस्कृत्यगुरुंशिवं॥नासाग्र
दृष्टिरेकाकीप्राणायामंसमभ्यसेत्॥द्वाराणांसचसंनिरुध्यम
रुतंलब्ध्वाददृढांधारणांनीत्वाकारमपानवह्निसहितंशक्त्यासमं
चालितं॥आत्मध्यानयुतस्त्वनेनविधिनाविन्यस्यमूर्ध्निस्थिरं १०
यावत्तिष्ठतितावदेवमहतांसंगोनसंस्तूयते॥प्राणायामोभ

वेदेवंपावकेंधनपावकः॥भवोदधिमहासेतुःप्रोच्यतेयोगिभि 173
स्सदा॥आसनेनरुजंहंतिप्राणायामेनपातकं॥विकारंमानसंयो 1970
गीप्रत्याहारेणमुंचति॥धारणाभिर्मनोधैर्यंयातिचैतन्यमद्भुतं॥
समाधौमोक्षमाप्नोतित्यक्त्वाकर्मशुभाशुभं॥प्राणायामद्विषट्
केनजायतेधारणाशुभा॥धारणाद्वादशंप्रोक्तंध्यानंयोगविशार
दैः॥ध्यानंद्वादशकेनैवसमाधिरभिधीयते॥यत्समाधौपरंज्यो
तिरनंतंविश्वतोमुखं॥तस्मिन्दृष्टेक्रियाकर्मयातायातोनविद्यते॥
संबद्धासनमेढ्रमंघ्रियुगलंकर्णाक्षिनासापुटद्वाराद्यंगुलिभि
र्नियम्यपवनंवक्त्रेणवापूरितं॥बध्वावक्षसिबद्धपानसहितंमू

योगचूडा ११ भ्रिस्थितं धारयेद्दवं याति विशेषतत्वसमतां योगीश्वरस्तन्मतः॥ ग मणिउ॰
गनं पवनः प्राप्ते ध्वनिरुत्पद्यते महान्॥ घंटादीनां प्रवाद्यानां नादस्थि
तिरितीरिता॥ प्राणायामेन युक्तेन सर्वयोगक्षयो भवेत्॥ प्राणाया
मविवियुक्तेभ्यः सर्वरोगसमुद्भवः॥ हिंकारीसस्तथाश्वासः शिरःकर्णा
क्षिवेदना॥ भवंति विविधा रोगाः पवनव्यत्ययक्रमात्॥ प्रत्योसिस्यो
गजोव्याघ्रोभवेद्वश्यश्शनैः शनैः॥ तथैव सेवितो वायुः अन्यथा हंति
साधकं॥ युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तं प्रपूरयेत्॥ युक्तं युक्तं प्रबध्नी
यात् एवं सिद्धिमवाप्नुयात्॥ चरतां चक्षुरादीनां विषयेषु यथाक्रमं॥ ११
तत्प्रत्याहरणं तेषां प्रत्याहारः स उच्यते॥ यथात्रितियकाले तु रविः

योगचूडा १२ प्रत्याहरेत् प्रभां॥ त्रितीयांगस्थितो योगी विकारं मानसं हरेदित्यु मणिउ॰
पनिषत्॥ ॥आप्यायंत्विति शांतिः॥ ॥इति योगचूडा
मणीउपनिषत् समाप्तः॥ ॥शके १७५५ विजयनामसंवत्

175
1670

१२

इतियोगचूडामणिउपनिषत्समाप्तः

श्रीगणेशायनमः ओम् भद्रंकर्णेभिःश्रृणुयामदेवाःभद्रंपश्येम
माक्षभिर्यजत्राः स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः 177
१ स्वस्तिनइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः स्वस्तिनस्ता
र्क्ष्योअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्दधातुः शांतिःशांतिःशांतिः 1910
आपोहवाइदमासत्सलिलमेवप्रजापतिरेकःपुष्करपर्णेसंभ
वत्तस्यांतर्मनसिकामःसमवर्ततेदंसृजेयमितितस्माद्यत्पुरु
षोमनसाभिगच्छतद्वाचावदतितत्कर्मणाकरोतितदेषाभ्युक्ता
कामस्तदग्रेसमवर्ततमनसोरेतःप्रथमंयदासीत् मनोब्रधुर्म

महोप सतिनिरविंदन्तदिमारिष्याकवयोमनीषस्सुपेनंनदुपनमिति नि५
यत्कामो भवति स तपोतप्यत स तपस्तप्त्वापुएतं मंत्रराजं नारसिं
हमानुष्टुभमपश्यत्तेन वै सर्वमिदमसृजत यदिदं किंच न तस्मात्स
र्वमिदमानुष्टुभमित्याचक्षते यदिदं किंचानुष्टुभो वा इमानि भू
तानि जायंत्यनुष्टुभा जातानि जीवंत्यनुष्टुभं प्रयंत्यभिसंविशंति
तस्यैषा भवत्यनुष्टुप्रथमा भवत्यनुष्टुबुत्तमा भवति वाग्वा अनुष्टु
प्वाचैव प्रयंति वाचैवोद्यंति परमा वा एषा छंदसां यदनुष्टुबिति १
१ ससागरां सपर्वतां सप्तद्वीपां वसुंधरां तत्साम्नः प्रथमं पादं जा

नीयद्यक्षगंधर्वाप्सरसोगणावेवितमंतरिक्षं तत्साम्नो द्वितीयं पा
दं जानीयाद्वसुरुद्रादित्यैः सर्वैर्देवैः सवितं दिवं तत्साम्नस्तृतीयं 179
पादं जानीयाद्ब्रह्मस्वरूपं निरंजनं परमव्योम्निकं तत्साम्नश्चतु 1970
र्थपादं जानीयाद्यो जानीते सोमृतत्वं च गच्छत्यृग्यजुःसामाथर्वा
णश्चत्वारो वेदाः सांगाः सशाखाश्चत्वारः पादा भवंति किं ध्यानं
किं दैवतं किं छंदः कऋषिरिति २ स होवाच स यो ह वै तत्सा
वित्र्यस्याक्षरं पदं श्रिया अभिषिक्तं तत्साम्नो वंगेद श्रिया हैवाभि
षिच्यते सर्वे वेदाः प्रणवादिकास्तं प्रवं तत्साम्नो गं वेद स त्री लो

क्रानूजपतिचतुर्विंशत्यक्षरमहाःलक्ष्मीयजुस्तत्साम्नोगंवेदस॰
आयुर्यशःकीर्तिर्ज्ञानैश्वर्यवान्भवतितस्मादिदंसांगंसामजा
नीतेसोमृतत्वंचगच्छतिसावित्रींप्रणवयजुर्लक्ष्मींस्त्रीशूद्रायनेच्छं
तिद्वात्रिंशदक्षरंसामजानीयाद्योजानीतेसोमृतत्वंचगच्छति॰
सावित्रींलक्ष्मींयजुःप्रणवंयदिजानीयात्स्त्रीशूद्रःसमृतोधो
गच्छतितस्मात्सर्वदानाचष्टेसआचार्यस्तेनैवमृतोधोगच्छति २
सहोवाचप्रजापतिरग्निर्वैवेदाइदंसर्वंविश्वानिभूतानिप्रा॰ २.
णावाइंद्रियाणिपशवोन्नममृतंसंम्राहराद्विरात्साम्नःप्रथम

पादंजानीयादृग्यजुःसामाथर्वरूपःसूर्येन्तरादित्येहिरण्मयःपु
रुषःस्तत्साम्नोद्वितीयपादंजानीयाद्यर्ओषधीनांप्रभवतितारा य 181/1970
तिःसोमस्तस्मात्साम्नस्तृतीयंपादंजानीयात्सब्रह्मासशिवःस
हरिःसइंद्रःसोग्निःसोक्षरःपरमस्वराट्तस्माच्चतुर्थपादंजा॰
नीयाद्योजानीतेसोमृतत्वंचगच्छत्ययंप्रथमस्यायंज्वलंतंद्विती
यस्यायंनृसिंहंतृतीयस्यायंमृत्युंचतुर्थस्यायंसामाजानीयाद्योजा
नीतेसोमृतत्वंचगच्छति तस्मादिदंसामयत्रकुत्रचिन्नाचष्टेयदि
दातुमपेक्षतेपुत्रायशुश्रूषवेदास्यत्यन्यस्मैशिष्यायचेति ४

महोप क्षीरोदार्णवशायिनं नृकेसरयोगी ध्येयं परमं पदं सामजानीयात् नि५.
द्यो जानीते सोऽमृतत्वं च गच्छति वीरं प्रथमस्यार्द्धस्यं तं सहद्वितीयस्या
र्द्धस्य हं भीन्ततीयस्यार्द्धस्यं तं स द्वितीयस्यार्द्धस्य हं भीन्ततीयस्या
र्द्धस्यं मृत्युं चतुर्थस्यार्द्धस्यं सामजानीते सोऽमृतत्वं च गच्छति त
स्मादिदं साम येन केन चिदाचार्यमुखेन यो जानीते स तेनैव सं
सारान्मुच्यते मोचयति मुमुक्षुर्भवति जपात्तेनैव शरीरेण देवतां
दर्शनं करोति तस्मादिदमेव मोक्षद्वारं कलौ नान्येषां भवति २
तस्मादिदं सांगं सामजानीयाद्यो जानीते स मुमुक्षुर्भवति ५

ओं ऋतं सत्यं परं ब्रह्म पुरुषं नृकेसरिविग्रहं कृष्णपिंगलं ऊर्ध्व
रेतं विरूपाक्षं शंकरं नीललोहितं उमापतिं पशुपतिं पिनाकिनं 183
त्वमिततपन्निरीशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधि 1970
पतिर्ब्रह्मणोऽधिपतिर्यो यजुर्वेदवाच्यं स्तसामजानीयाद्यो जानी
ते सोऽमृतत्वं च गच्छति महाप्रथमां ताईस्याचं तो द्वितीयरं त्वाई
स्याचं षण्णं ततीयां तस्याईस्यांचं नमाच तुर्थां नाईस्याचं सामजा
नीते सोऽमृतत्वं च गच्छति तस्मादिदं साम सच्चिदानंदमयं परं ब्र
ह्म तमेवं विद्वानमृत इह भवति तस्मादिदं सामजानीयाद्योजा

महोप नीतेसोमृतत्वंचगच्छति ६ विश्वसृजएतेनविश्वमिदमसृजंत निष
पद्विश्वमसृजंतस्तस्माद्विश्वसृजोविश्वमेनानुप्रजायतेब्रह्मणः
सायुज्यंसलोकतांजयतितस्मादिदंसाःप्रजानीयाद्योजानीतेसो
मृतत्वंचगच्छतिविष्णुःप्रथमस्यांत्स्यंमुखंद्वितीयस्यांत्स्यंभद्रंन्तती
यस्यांत्ससुहंचतुर्थस्यांत्सं सामप्रजानीयाद्योजानीहेसोमृतत्वंच
गच्छतियासौसदेवयद्दिदंकिंचात्मनिब्रह्मण्यानुष्टुभंजानीतेसो
मृतत्वंचगच्छतिस्त्रीपुंसोर्वायत्रहस्नातुमपेक्षतेससर्वैश्वर्यंददा ४
तिदेहोतेवःपरंब्रह्मताःरर्कमान्वष्टेयेनामृताभूत्वासोमृतत्वंचग

च्छतितस्मादिदंसामप्रत्यगंजयतितस्मादिदंसामांगंप्रजापति
र्यएवंवेदेतिमहोपनीषद्यएतांमहोपनीषदंवेदसकृतुरश्चर
णोमहाविष्णुर्भवति ७ इत्यथर्ववेदेनृसिंहपूर्वतापनीये
प्रथमेमहोपनीषद्विएकोनत्रिंशतिमोपनीषत्समाप्तं २९
श्रीकृष्णार्पणमस्तु शुभंभवतु श्रीरस्तु

185/1906

इतिमहोपनिषत्समाप्तः

५

श्रीगणेशायनमः॥सहनाविवित्विति शांतिः॥अच्युतोस्मिम
हादेवतवकारुण्यलेशतः॥विज्ञानघनएवास्मिशिवोस्मिकिं
मतःपरं॥ननिजंनिजवद्भातिअंतःकरणजृंभणात्॥अ
तःकरणनाशेनसंविन्मात्रस्थितोहरिः॥संविन्मात्रस्थितश्चा
हमजोस्मिकिमतःपरं॥व्यतिरिक्तंजडंसर्वंस्वप्नवच्चविनश्यं
ति॥चिज्जडानांतुयोद्रष्टासाच्युतोज्ञानविग्रहः॥सएवहिम
हादेवःसएवहिमहाहरिः॥सएवज्योतिषांज्योतिस्सएवप
रमेश्वरः॥सएवहिपरंब्रह्मतद्ब्रह्माहंनसंशयः॥जीवश्शि

187
1700

स्कंदोप॰ वच्छिवोजीवः सजीवः केवलः शिवः॥ तुषेण बद्धो व्रीहिस्यात्तु
षाभावेन तंडुलः॥ एवं बद्धस्तथाजीवः कर्मनाशे सदाशिवः॥
पाशबद्धस्तथाजीवः पाशमुक्तस्सदाशिवः॥ शिवाय विष्णुरू
पाय शिवरूपाय विष्णवे॥ शिवस्य हृदयं विष्णुर्विष्णोश्च हृ
दयं शिवः॥ यथा शिवमयो विष्णुरेवं विष्णुमयश्शिवः॥ यथांत
रं न पश्यामि तथा मे स्वस्तिरायुषि॥ यथांतरं न भेदास्युः शिव
केशवयोस्तथा॥ देहो देवालयः प्रोक्तः सजीवः केवलश्शिवः ॥१॥
त्यजेदज्ञाननिर्माल्यं सोहंभावेन पूजयेत्॥ अभेददर्शनं

ज्ञानं ध्यानं निर्विषयं मनः॥ स्नानं मनोमलत्यागश्शौमिंद्रियनि
ग्रहः॥ ब्रह्मामृतं पिबेत् भैक्ष्यमाचरेद्देहरक्षणे॥ वसेदेकांतिको 189
भूत्वा चैकांते द्वैतवर्जिते॥ इत्येवमाचरेद्धीमान् स एवं मुक्तिमा 1970
प्नुयात्॥ श्रीपरमधाम्ने स्वस्तिरायुष्मान् भवति॥ विरिंचिना
रायणशंकरात्मकुन्दसिंहदेवेशा तव प्रसादतः॥ अचिंत्यमव्य
क्तमनंतमव्ययं वेदात्मकं ब्रह्म निजं विजानते॥ तद्विष्णोः पर
मं पदं॥ सदा पश्यंति सूरयः॥ दिवीव चक्षुराततं॥ तद्विप्रासो
विपन्यवो जागृवांसस्समिंधते॥ विष्णोर्यत्परमं पदमित्येवं

निर्वाणानुशासनंवेदानुशासनंवेदानुशासनमित्युपनिषत्
सहनाववतिविनिशांतिः॥ इतिस्कंदोपनिषत्समाप्तः॥ छ॥

॥८॥

श्रीगणेशायनमः॥ ॐ ज्ञानेनाकाशकल्पेनधर्मान्योगगनोपमान्॥ज्ञेयाभिन्नेनसंबुद्धस्तंवंदेद्विपदांवरं॥अस्पर्शयोगोवैनामसर्वसत्वसुखोहितः॥ अविवादोविरुद्धदेशितस्तंनमाम्यहं॥भूतस्यजातिमिछंतिवादिनःकेचिदेवहि॥अभूतस्यापरेधीराविवदंतःपरस्परं॥ भूतंनजायतेकिंचिदभूतंनैवजायते॥विवदंतोद्वयात्येवमजातिंख्यापयंतिते॥ख्याप्यमानामजातिंतैरनुमोदामहेवयं॥विवदामोनतैःसार्द्धमविवादंनिबोधत॥ १ ॥अजातस्यैवधर्मस्यजातिमिछंतिवादिनः॥अजातोह्यमृतोधर्मोमर्त्यतांकथमिष्यति॥नभवत्यमृतंमर्त्यंनमर्त्यममृतंतथा॥प्रकृतेर 191/1930

आ॰शां॰ न्यथाभावेन कथंचिद्भविष्यति॥ स्वभावेनामृतो यस्य धर्मो गच्छति उ५०
१ मर्त्यतां॥ कृतकेनामृतस्तस्य कथं स्थास्यति निश्चलः॥ सांसिद्धिकी स
हजा अमृता च या॥ प्रकृतिश्चेति विज्ञेया स्वभावं न जहाति या॥ जरा
मरणनिर्मुक्ताः सर्वे धर्माः स्वभावतः॥ जरामरणमिच्छंतश्च्यवंते तन्म
नीषया॥ २ ॥करणं यस्य वै कार्यं कारणं तस्य जायते॥ जायमानं
कथमजं भिन्नं नित्यं कथं च यत्॥ कारणाद्यद्यनन्यत्वमतः कार्यमजं
यदि॥ जायमानाद्धि वै कार्यात्कारणं ते कथं ध्रुवं॥ अजाद्वै जायते यस्य
दृष्टांतस्तस्य नास्ति वै॥ हेतोः फलस्य चानादिः फलं ते रूपवर्ण्यते॥ हेतो १
रादिः फलं येषामादिर्हेतुः फलस्य च॥ जातात्त्वजायमानस्य न व्यवस्था

प्रसज्यते॥ हेतोरादि फलं येषामादिर्हेतुः फलस्य च॥ तथा जन्म भवेत्तेषां 193
पुत्रजन्म पितुर्यथा॥ संभवे हेतुफलयोरेषितव्यः क्रमस्त्वया॥ युगपत्सं
भवे यस्मादसंबंधो विषाणवत्॥ फलादुत्पद्यमानः सन्न ते हेतुः प्रसिध्य 1930
ति॥ अप्रसिद्धः कथं हेतुः फलमुत्पादयिष्यति॥ यदि हेतोः फलात्सिद्धिः
फलसिद्धिश्च हेतुतः॥ कतरत्पूर्वनिष्पन्नं यस्य सिद्धिरपेक्षया॥ अशक्ति
रपरिज्ञानं क्रमकोपोऽथवा पुनः॥ एवं हि सर्वथा बुद्धैरजातिः परिदीपिता॥
बीजांकुराख्यो दृष्टांतः सदा साध्यसमो हि सः॥ न हि साध्यसमो हेतुः सि
द्धौ साध्यस्य युज्यते॥ ३ ॥पूर्वापरापरिज्ञानमजातेः परिदीपकं॥ स
दसत्सदसद्वापि न किंचिद्वस्तु जायते॥ हेतुर्न जायतेऽनादेः फलं चापि

स्वभावतः॥आदिर्नविद्यतेयस्यतस्यत्वादिर्नविद्यते॥प्रज्ञप्तेःसन्निमित्त
त्वमन्यथाद्वयनाशनः॥संक्लेशस्योपलब्धेश्चपरतंत्रास्तितामता॥प्रज्ञ
प्तेःसंनिमित्तत्वमिष्यतेयुक्तिदर्शनात्॥निमित्तस्यानिमित्तत्वमिष्यतेभू
तदर्शनात्॥ ४ ॥चित्तंनसंस्पृशत्यर्थंनार्थाभासंतथैवच॥अभूताहियत
श्चार्थोनार्थाभासंततःपृथक्॥निमित्तंनसदाचित्तंसंस्पृशत्यंचसुत्रिषु॥
अनिमित्तोविपर्यासःकथंतस्यभविष्यति॥तस्मान्नजायतेचित्तंचित्तदृ
श्यंनजायते॥तस्यपश्यंतियेजातिंखेवैपश्यंतितेपदं॥अजातंजायतेय
स्मादजातिःप्रकृतिस्तथा॥प्रकृतेरन्यथाभावोनकथंचिद्भविष्यति॥ २
अनादेरंतवत्वंचसंसारस्यनसेत्स्यति॥अनंततावादिमतोमोक्षस्यन

भविष्यति॥ ५ ॥आदावंतेचयन्नास्तिवर्तमानेपितत्तथा॥वितथैःसदृ
शाःसंतोवितथाइवलक्षिताः॥सप्रयोजनतातेषांस्वप्नेविप्रतिपद्यते॥
तस्मादाद्यंतवत्वेनमिथ्यैवखलुतेस्मृताः॥सर्वेधर्मामृषास्वप्नेकायस्यां
तर्दर्शनात्॥संवृतेस्मिन्प्रदेशेवैभूतानांदर्शनंकुतः॥नयुक्तंदर्श
नंगत्वाकालस्यानियमाद्गतौ॥प्रतिबुद्धश्चवैसर्वस्तस्मिन्देशेनविद्यते॥
सतसंमंअप्रबुद्ध्योनप्रबुद्धोप्रपद्यते॥गृहीतंचापियत्किंचित्प्रतिबुद्धो
नपश्यति॥ ६ ॥स्वप्नेचावस्तुकःकायःपृथगन्यस्यदर्शनात्॥यथाका
यस्तथासर्वंचित्तदृश्यमवस्तुकं॥ग्रहणाज्जागरितवद्धेतुःस्वप्नदृश्य
ते॥तद्धेतुत्वाच्चतस्यैवसज्जागरितमिष्यते॥उत्पादस्याप्रसिद्धत्वा

195
1970

दजंसर्वमुदाहृतं॥ न चभूताद्भूतस्य संभवोस्ति कथंचन॥ असज्जाग
रितेदृष्ट्वा स्वप्ने पश्यतितन्मयः॥ असत्स्वप्नेपिदृष्ट्वा च प्रतिबुद्धो न पः
श्यति॥ नास्त्य सद्धेतुकमसत्सदसद्धेतुकं यथा॥ सच्च सद्धेतुकं नास्ति
सद्धेतुकमसत्कुतः॥ ७ ॥ विपर्यासाद्यथाः जाग्रदचिंत्यान्भूतवत्स्पृ
शेत्॥ तथा स्वप्ने विपर्यासाद्धर्मांस्तत्र च पश्यति॥ उपलंभात्समाचाराद
स्तिवस्तुत्ववादिनां॥ जातिस्तु देशितां बुद्धैरजातिश्च सदांसदा॥ अजा
तेस्त्रस्यतां तेषामुपलंभाद्वियंतिते॥ जातिदोमानसेत्स्यंति दोषोप्यलो
भविष्यति॥ उपलंभात्समाचारान्मायाहस्तीयथोच्यते॥ उपलंभात्समा ३
चारादस्ति वस्तु तथोच्यते॥ जात्याभासं चलाभासं वस्त्वाभासं तथैव

च॥ अजाचलमवस्तुत्वं विज्ञानं शांतमद्वयं॥ ८ ॥ एवं न जायते चित्त
मेवं धर्मा अजास्मृताः॥ एवमेव विजानंतो न पतंति विपर्यये॥ ऋजुव
क्रादिकाभासमलातस्यंदितं यथा॥ अस्पंदमानमलातमनाभासमजं
यथा॥ अस्पंदमानविज्ञानविज्ञानमनाभासमजं तथा॥ अनाभेस्यंद
मानेवैनाभासा अन्यतोभुवः॥ नतातान्यत्रनिस्पंदन्नालातं प्रविशंतिते।
ननिर्गता अलातात्ते द्रव्यत्वाभावयोगतः॥ विज्ञानेपितथैवस्युराभास
स्याविशेषतः॥ विज्ञाने स्पंदमाने वै नाभासा अन्यतोभुवः॥ न ततोन्यत्र
निस्पंदन विज्ञानं विशंतिते॥ निर्गतास्ते विज्ञानाद्द्रव्यत्वाभावयोगतः कार्य
कारणताभावाद्यतोचिंतासदैवते॥ द्रव्यं द्रव्यस्य हेतुस्यादन्यदन्यस्य

नैवहिद्रव्यस्यत्वमन्यभावोवाधर्माणांनोपपद्यते॥ एवंनचित्तजाध
र्माश्चित्तंवापिनधर्मजं॥ एवंहेतुफलाजातिंप्रविशंतिमनीषिणः॥ यावद्धे
तुफलावेशस्तावद्धेतुफलोद्भवः॥ क्षीणेहेतुफलावेशेनास्तिहेतुफलो
द्भवः॥ क्षीणेहेतुफलावेशेनास्तिहेतुफलोद्भवः॥ यावद्धेतुफलावेशः
संसारस्तावदायतः॥ क्षीणेहेतुफलावेशेसंसारोनोपजायते॥ संवृ
त्याजायतेसर्वंशाश्वतंतेननास्तिवै॥ सद्भावेनत्वजंसर्वमुच्छेदस्तेन
नास्तिवै॥ धर्मायइतिजायंतेजायंतेनततत्वतः॥ जन्ममायोपमंतेषांसा
चमायानविद्यते॥ यथामायामयाद्बीजाज्जायतेतन्मयोंकुतः॥ नासौ
नित्योनचोछेदीतद्वद्धर्मेषुयोजना॥ नाजेषुसर्वधर्मेषुशाश्वताशाश्व ४

तामिधा॥ यत्रवर्णानवर्तंतेविवेकस्तत्रनोच्यते॥ यथास्वप्नेद्वयाभासं
चित्तंचलतिमायया॥ तथाजाग्रद्द्वयाभासंचित्तंचलतिमायया॥ १०
अद्वयंचद्वयाभासंमनःस्वप्नेनसंशयः॥ अद्वयंचद्वयाभासंतथाजा
ग्रेनसंशयः॥ स्वप्नदृक्प्रचलंस्वप्नेदिक्षुवैदशसुस्थितान्॥ अंडजान्
स्वेदजान्वापिजीवान्पश्यंतियांसदा॥ स्वप्नदृक्चित्तदृश्यास्तेनभिद्यं
तेततःपृथक्॥ तथातंदृश्यमेवेदंस्वप्नदृक्चित्तमिष्यते॥ चरन्जाग
रितेजाग्रद्दिक्षुवैदशसुस्थितान्॥ अंडजान्स्वेदजान्वापिजीवान्प
श्यतिसायदा॥ ११ ॥ जाग्रच्चित्तेक्षणीयास्तेनभिद्यंतेततःपृथ
क्॥ तथातद्दृश्यमेवेदंजाग्रतश्चित्तमिष्यते॥ उभेत्वन्योन्यदृश्ये

199
1970

आ॰ शां॰ तेकिंचिदस्तीतिचोच्यते॥लक्षशाभ्रून्यमुभयंतन्मतेनैवगत्यते॥य उप॰
५ थास्वप्नमयोजीवोजायतेम्रियतेपिच॥तथाजीवाअमीसर्वेभवंतीनभ
वंतिच॥यथामायामयोजीवोजायतेम्रियतेपिच॥तथाजीवाअमीसर्वे
भवंतीनभवंतिच॥यथानिमित्तकोजीवोजायतेम्रियतेपिच॥तथाजी
वाअमीसर्वेभवंतीनभवंतिच॥नकश्चिज्जायतेजीवःसंभवोस्यनवि
द्यते॥एतत्तदुत्तमंसत्यंयत्रकिंचित्तजायते॥चित्तस्पंदतिमसर्वेग्रात्यं
ग्राहकवद्द्वयं॥चित्तंनिर्विषयंसत्यमसंगंतेनकीर्तितं॥ १२ ॥योस्ति
कल्पितसंवृत्तापरमार्थेननास्त्यसौ॥परतंत्राभिसंवृत्यास्मान्नास्ति ५
परमार्थतः॥अतःकल्पितसंवृत्यापरमार्थेननाप्यजः॥परतंत्राभि

निष्पत्त्यांसंवृत्याजायतेपुनः॥अभूतांभिनिवेशोस्तिद्वयंतत्रनविद्य 201
ते॥द्वयाभावंसबुद्धैवतन्निमित्तोनजायते॥यदानलभतेतन्तुत्तमाध 1970
ममध्यमान्॥तदानजायतेचित्तःहेत्वाभावेफलंकुतः॥अनिमित्तस्य
चित्तस्ययानुत्पत्तिःसमाद्वया॥अजोतस्यैवसर्वस्यचित्तदृश्यंहितद्यतः॥
१३ ॥बुध्वानिमित्ततासत्यांहेतुपृथगनाप्नुवन्॥वीतशोकंतथाका
ममभयंयदमश्नुते॥अभूताभिनिवेशाद्धिःसंदृशेतप्रवर्तते॥वस्त्वभा
वंसबुद्धैवनिःसंगंविनिवर्तते॥निवृत्तस्याप्रवर्तस्यनिश्चलाहितदास्थि
तिः॥विषयःसंप्रबुत्थानांतत्स्याममजमद्वयं॥अजंमनिद्रमस्वप्नं
प्रभावंभवतिस्वयं॥सकृद्विभावोह्येवैषधर्मधातुःस्वभावतः॥

आ॰शां॰ सुखमाश्रयेतनित्यंदुःखंविविषयस्य चधर्मस्य गृहणभगवानसौ॥ उप॰
५ १४ ॥अस्तिनास्त्यस्तिनास्तीतिनास्तिनास्तीतिवापुनः॥चलस्थिरो
भयाभावैरावृणोत्येवबालिशः॥कोटयश्चतस्रएतांश्चगृहैर्यासांसदा
वृतः॥भगवानाभिरस्पृष्टोयेनदृष्टःससर्वदृक्॥प्राप्यसर्वज्ञतांकृ
त्स्नंब्राह्मण्यंपदमद्वयं॥अनापन्नादिमध्यांतंकिमतःपरमीहते॥वि
प्राणांविनयोह्येषशमःप्राकृतउच्यते॥दमःप्रकृतिदांतत्वादेवंविद्वा
छमंव्रजेत्॥सवस्तुसोपलंभंचभुत्यंलौकिकमिष्यते॥ १४ ॥अव
स्तुउपलंभंचलोकोत्तरमितिस्मृतं॥ज्ञानंज्ञेयंचविज्ञेयंसदाबुद्धैः ५
प्रकीर्तितं॥ज्ञानेचत्रिविधेज्ञेयेक्रमेणविदितेस्वयं॥सर्वज्ञतादिस

र्वज्ञभवंतीहमहाधियः॥हेयज्ञेयाप्यपाक्यानिविज्ञेयान्यग्रया
णयः॥तेषामन्यत्रविज्ञेयादुपलंभस्त्रिषुस्मृतः॥प्रकृत्याकाशवि
ज्ञेयासर्वेधर्माअनादयः॥विद्यतेनहिनानात्वंतेषांकचनकिंच
न॥आदिबुद्धिःप्रकृत्यैवसर्वेधर्माःसुनिश्चिताः॥यस्यैवंभवति
क्षांतिःसोमृतत्वायकल्पते॥ १६ ॥आदिशांताह्यनुत्पन्नाः
प्रकृत्यैवसुनिर्वृताः॥सर्वेधर्माःसमाभिन्नाअजंसाम्यंविशार
दं॥वैशारद्यंतुवैनास्तिभेदेविचरतांसदा॥भेदनिम्नाःपृथग्वा
दाःतस्मात्तेकृपणाःस्मृताः॥अजंसाम्यंतुयेकेचिद्भविष्यंति

203/1970

आ॰शां॰ ७ विपश्चितः॥नेहिलोकेमहाज्ञानास्तच्चलोकेनगाहते॥अंतेषु उप॰
जमसंक्रांतंधर्मेषुज्ञानमिष्यते॥यतानक्रमतेज्ञानेमसंगं~~क्रि~~
तेनकीर्तितं॥अणुमात्रेपिवैधर्म्येजायमानेविपश्चितः॥असंगता
सदानास्तिकिमुताहृत्ररणाच्युतिं॥अलब्धावर्मणाःसर्वेषुधर्माः
प्रकृतिनिश्चलाः॥आदौबुध्यास्तथामुक्ताबुध्यंतइतिनायकाः।
क्रमतेनहिबुद्धस्यज्ञानंधर्मेषुनौमनः॥सर्वेधर्मास्तथाज्ञानेमेत
द्बुधेनभाषितं॥दुर्दर्शमतिगंभीरमजंसाम्यंविशारदं॥बुध्वाय ७
दनानात्वंमनःकुर्मोयथाबलं॥मनःकुर्मोयथाबलमिति १८

आ॰शां॰ ८ इत्यथर्वणेआलातशांत्याख्यंचतुर्थंप्रकरणमुपनिषत्समाप्तं १ उप॰

205/1970

॥ इति मुंडकोपनिषत् शांत्याख्यं चतुर्थं स॰ सं॰॥

श्रीगणेशाय नमः॥ पूर्णमद इति शांतिः॥ अथातोऽद्वय
तारकोपनिषदं व्याख्यास्यामो यतये जितेंद्रियाय शमादि
षड्गुणपरिपूर्णाय चित्स्वरूपोहमिति सदा भावयन्सम्यङ्
निमीलिताक्षः किंचिदुन्मीलिताक्षो वांतर्दृष्ट्या भ्रूदहरादुपरि स
च्चिदानंदतेजःकूटरूपं परंब्रह्मावलोकयन् तद्रूपो भवति॥ ग
र्भजन्मजरामरणसंसारमहद्भयात्संतारयति तस्मात्तारक
मिति॥ जीवेश्वरौ मायिकाविति विज्ञाय सर्वविशेषं नेति नेतीति

207

1910

विहाय यदवशिष्यते तद्हृयं ब्रह्म॥ तस्मिंध्येलक्ष्यत्रयानुसंधा
नः कर्तव्यः॥ देहमध्ये ब्रह्मनाडी सुषुम्ना सूर्यरूपिणी पूर्णचंद्रा
भा वर्तते॥ सा तु मूलाधाराद्दारभ्य ब्रह्मरंध्रगामिनी भवति॥ त
न्मध्ये तटित्कोटिसमानकांत्या मृणालसूत्रवत्सूक्ष्मांगी कुंड
लीनीति प्रसिद्धास्ति॥ तां दृष्ट्वा मनसैव नरः सर्वपापविनाशद्वा
रा मुक्तो भवति॥ फालोर्ध्वगल्लाटविशेषमंडले निरंतरं तेजस ॥२॥
तारकयोगविस्फुरणेन पश्यति चेत्सिद्धो भवति॥ तर्जिन्यग्रो

न्मीलितकर्णरंध्रद्वये तत्र फूत्कारशब्दो जायते॥ तत्र स्थिते मन 209/1970
सि चक्षुर्मध्यगतनीलज्योतिस्थलं विलोक्यांतर्दृष्ट्या निरतिशयसु
खं प्राप्नोति॥ एवं हृदये पश्यति॥ एवमंतर्लक्ष्यलक्षणं मुमुक्षुभि
रुपास्यं॥ अथ बहिर्लक्ष्यलक्षणं॥ नासिकाग्रे चतुर्भिष्षड्भिर
ष्टभिर्दशभिर्द्वादशभिः क्रमादंगुलांते नीलद्युतिश्यामत्वसदृ
ग्रक्तभंगी स्फुरत्पीतवर्णद्वयोपेतव्योमयदि पश्यति॥ स तु यो
गी भवति॥ चलदृष्ट्या व्योमभागवीक्षितुः पुरुषस्य दृष्ट्यग्रे ज्यो
तिर्मयूखा वर्तंते॥ तद्दर्शनेन योगी भवति॥ तप्तकांचनसंकाश

ज्योतिर्मयूखाअपांगांतेभूमौवा पश्यति॥तद्दृष्टिः स्थिराभवति
शीर्षोपरिद्वादशांगुलिसममीक्षितुरमृतत्वंभवति।यत्रकुत्र
स्थितस्यशिरसिव्योमज्योतिर्दृष्टंचेत्सतुयोगीभवति॥अथमध्य
लक्ष्यलक्षणंप्रातश्चित्रादिवर्णानखंडसूर्यचक्रवद्वह्निज्वालाव
लीवत्तद्विहीनांतरिक्षवत्पश्यति॥तदाकाराकारितोयावति
ष्ठति॥तद्भूयोदर्शनेनगुणरहिताकाशंभवति॥विस्फुरत्तार
काकारासंदीप्यमानागाढतमोवमंपरमाकाशंभवति॥काला
नलसमद्योतमानंमहाकाशंभवति॥सर्वोत्कृष्टपरमद्युतिप्र

द्योतमानंतत्वाकाशंभवति॥कोटिसूर्यप्रकाशवैभवसंकाशंसू
र्याकाशंभवति॥एवंबाह्याभ्यंतरस्थंव्योमपंचकंतारकलक्ष्यंत
द्दर्शीविमुक्तफलस्तादृग्व्योमसमानोभवति॥तस्मात्तारकएवल
क्ष्यममनस्कफलप्रदंभवति॥तत्तारकंद्विविधं॥पूर्वार्धंतारकं॥उ
त्तरार्धममनस्कारंचेति॥तदेषश्लोकोभवति॥तद्योगंचद्विधा
विद्धिपूर्वोत्तरविधानतः॥पूर्वंतुतारकंविद्यादमनस्कंतदुत्तरमि
ति॥१॥अक्ष्यंतस्तारयोश्चंद्रसूर्यप्रतिफलनंभवति॥तारका
भ्यांसूर्यचंद्रमंडलदर्शनंब्रह्मांडमिवपिंडांडशिरोमध्यस्थाकाशे
रवींदुमंडलद्वितीयमस्मीतिनिश्चित्यतारकाभ्यांतद्दर्शनमंभा

211
1970

अद्वय ष्युभयैक्यदृष्ट्या मनोयुक्तं ध्यायेत्॥ तद्योगाभावे इंद्रियप्रवृत्तेरनव तार॰उ॰
काशात्॥ तस्मात्तद्दृष्ट्या तार एवानुसंधेयः॥ तत्तारद्विविधं मूर्ति
तारकं मूर्तितारकं चेति॥ यदिंद्रियांतं तन्मूर्तिमत्॥ यत् भ्रूयुगा
तीतं तदमूर्तिमत्॥ सर्वत्रांतःपदार्थविवेचने मनोयुक्ताभ्यास इ
ष्यते॥ तारकाभ्यां तदूर्ध्वस्थसत्वदर्शनान्मनोयुक्तेनांतरीक्षणेन स
च्चिदानंदस्वरूपं ब्रह्मैव॥ तस्मात् शुक्लतेजोमयं ब्रह्मेति सिद्धं॥ त
त् ब्रह्म मनस्सहकारी॥ चक्षुषां तद्दृष्ट्या वेद्यं भवति॥ एवममूर्ति
तारकमपि मनोयुक्तेन चक्षुषैव दहरादिकं वेद्यं भवति॥ रूपग्र ॥२॥
हणप्रयोजनस्य मनश्चक्षुरधीनत्वात् बाह्यवदांतरेपि आत्ममन

नश्चक्षुस्संयोगेनैव रूपग्रहणकार्योदयात्तस्मान्मनोयुक्तां तद्दृष्टि
तारकप्रकाशाय भवति॥ भ्रूयुगमध्यबिले दृष्टिं तद्द्वारोर्ध्वस्थित 213
तेज आविर्भूतं तारकयोगो भवति॥ तेन सह मनोयुक्तं तारकं सु 1930
संयोज्य प्रयत्नेन भ्रूयुग्मं सावधानतया किंचिदूर्ध्वमुत्क्षेपयेत्
इति पूर्वभागतारकयोगः॥ उत्तरं त्वमूर्तिमदमनस्कमित्युच्यते
तालुमूलोर्ध्वभागे महान् ज्योतिर्मंडलो वर्तते॥ तद्योगिभिर्ध्येयं त
स्मादणिमादिसिद्धिर्भवति॥ अंतर्बाह्यलक्ष्ये दृष्टौ निमेषोन्मेषव
र्जितायां सत्यां शांभवी मुद्रा भवति॥ तन्मुद्रारूढज्ञानि निवासात्
भूमिः पवित्रा भवति॥ तद्दृष्ट्या सर्वे लोकाः पवित्रा भवंति॥ तादृश

परमयोगीपूजा यस्य लभ्यते सोपि मुक्तो भवति॥ अंतर्लक्ष्यजल
ज्योतिस्वरूपं भवति॥ परमगुरूपदेशेन सहस्रारजलज्योतिर्वा
बुद्धिगुहानिहितचिज्ज्योतिर्वा षडशांतस्थतुरीयचैतन्यं वा अंत
र्लक्ष्यं भवति॥ तद्दर्शनं सदाचार्यमूलं॥ आचार्यो वेदसंपन्नो विष्णु
भक्तो विमत्सरः॥ योगज्ञो योगनिष्ठश्च सदा योगात्मकः शुचिः॥ गु
रुभक्तिसमायुक्तः पुरुषज्ञो विशेषतः॥ एवं लक्षणसंपन्नो गुरु
रुत्यभिधीयते॥ गुशब्दस्त्वंधकारस्याद्रुशब्दस्तं निरोधकः॥ अं
धकारनिरोधित्वात् गुरुरुत्यभिधीयते॥ गुरुरेव परं ब्रह्म गुरुरे
व परा गतिः॥ गुरुरेव परा विद्या गुरुरेव परायणं॥ गुरुरेव पराका

ष्ठा गुरुरेव परं धनं॥ यस्मात्तदुपदेष्टासौ तस्मात् गुरुतरो गुरु
रिति॥ सकृदुच्चारयति तस्य संसारमोचनं भवति॥ सर्वजन्मकृ
तं पापं तत्क्षणादेव नश्यति॥ सर्वान् कामानवाप्नोति सर्वपुरु
षार्थसिद्धिर्भवति॥ य एवं वेदेत्युपनिषत्॥ पूर्णमद इति शां
तिः॥ ॥श्रीशुभं भवतु॥ ॥छ॥ ॥छ॥

215
1970

॥इतिअद्वयतारकोपनिषत्समाप्तः॥

॥५॥

217/1970

॥अथशारीरकोपनिषत्प्रारंभः॥

शरीरक उ० श्रीगणेशायनमः॥ सहनाववत्विति शांतिः॥ अथातः पृथिव्या
१ दिमहाभूतानां समवायं शरीरं यत् कठिनं सा पृथिवी यद्द्रवं तदा
पो यदुष्णं तत्तेजः यत्संचरति स वायुः यत् सुषिरं तदाकाशं श्रोत्रा
दीनि ज्ञानेंद्रियाणि श्रोत्रमाकाशे वायौ त्वगग्नौ चक्षुरप्सु जिह्वा
पृथिव्यां घ्राणमिति एवमिंद्रियाणां यथाक्रमेण शब्दस्पर्शरू
परसगंधाश्चेते विषयाः॥ पृथिव्यादिमहाभूतेषु क्रमेणोत्पं
नाः॥ वाक्पाणिपादपायूपस्थाख्यानि कर्मेंद्रियाणि तेषां १
क्रमेण वचनादानगमनविसर्गानंदाश्चैते विषयाः पृथिव्या

दिमहाभूतेषु क्रमेणोत्पन्नाः॥ मनो बुद्धिरहंकारश्चित्तमि 219/1930
त्यंतःकरणचतुष्टयं॥ तेषां क्रमेण संकल्पविकल्पाध्यव
सायाभिमानावधारणाः स्वरूपाश्चैते विषयाः॥ मनस्स्था
नं गलांतं बुद्धेर्वदनमहंकारस्य हृदयं चित्तस्य नाभिरिति
अस्थिचर्मनाडिरोममांसाश्चेति पृथिव्यंशाः॥ मूत्रश्लेष्मरक्त
शुक्रस्वेदा अप्स्वंशाः॥ क्षुत्तृष्णालस्यमोहमैथुनान्यग्नेः॥ प्रचा
रणविलेखनस्थूलाक्ष्युन्मेषनिमेषादि वायोः॥ कामक्रोधलो
भमोहभयान्याकाशस्य शब्दस्पर्शरूपरसगंधाः पृथिवीगु

शरीरकु॰ णाः॥ शब्दस्पर्शरूपरसाश्चापांगुणाः॥ शब्दस्पर्शरूपान्यग्नि
२ गुणाः॥ शब्दस्पर्शावितिवायुगुणो॥ शब्द एव आकाशस्य॥ सा
त्विकराजसतामसलक्षणा नित्रयोगुणाः॥ अहिंसासत्यमस्ते
यंब्रह्मचर्यापरिग्रहं॥ अक्रोधोगुरुशुश्रूषाशौचसंतोषआ
र्जवं॥ अमानित्वमदंभित्वनास्तिकत्वमहिंसता॥ एते सर्वेगुणा
ज्ञेयाः सात्विकस्यविशेषतः॥ अहंकर्तास्म्यहंभोक्तास्म्यहंभ
क्ताभिमानवान्॥ एतेगुणाराजसस्यप्रोच्यंतेब्रह्मवित्तमैः॥ २
निद्रालस्योमोहरागोमैथुनंचौर्यमेवच॥ एतेगुणास्तामसस्य

प्रोच्यंतेब्रह्मवादिभिः॥ ऊर्ध्वंसात्विकोमध्यराजसोधस्तामस
इति॥ सम्यक्ज्ञानंसात्विकंधर्मज्ञानंराजसं॥ तिमिरांधंताम
सइति॥ जाग्रत्स्वप्नसुषुप्तितुरीयमिति॥ चतुर्विधावस्थाः॥
ज्ञानेंद्रियकर्मेंद्रियांतःकरणचतुष्टयंचतुर्दशकरणयुक्तंजा
यत्॥ अंतःकरणचतुष्टयैरेवसंयुक्तस्वप्नः॥ चित्तैककरणा
सुषुप्तिः॥ केवलजीवयुक्तमेवतुरीयमिति॥ उन्मीलितनि
मीलितमध्यजीवपरमात्मनोःमध्येजीवात्माक्षेत्रज्ञइतिविज्ञा
यते॥ बुद्धिकर्मेंद्रियप्राणपंचकैर्मनसाधिया॥ शरीरंसप्तदश

221/1070

शारीरक०३· भिः सूक्ष्मं तल्लिंगमुच्यते॥ मनोबुद्धिरहंकारः खा[?] निला
३ ग्निजलानिभूः॥ एताः प्रकृतयस्त्वष्टौविकाराः षोडशाःपरे
श्रोत्रत्वक्चक्षुजिह्वाघ्राणंचैवतुपंचमं॥ पायूपस्थौक
रौपादौवाक्चैवदशमीमता॥ शब्दस्पर्शश्चरूपंचरसोगं
धस्तथैवच॥ त्रयोविंशतिरेतानितत्वानिप्रकृतानितु॥ चतु
र्विंशतिरव्यक्तं प्रधानं पुरुषः परइत्युपनिषत्॥ ४ ॥ ३
इतिशारीरकोपनिषत्समाप्तः॥ ॥४॥४॥४

श्री४ ॐ देवाहवैप्रजापतिमब्रुवन्नणोरणीयांसमीनमात्मानमोंकारं
नोःव्याचक्षेतितथेत्योमित्येतदक्षरमिदंसर्वंतस्योपव्याख्यानंभूतं ६
भव्यंभविष्यदितिसर्वमोंकारएवयच्चान्यत्रीकालातीतंतदप्योंकार 223
एवसर्वंह्येतद्ब्रह्मायमात्माब्रह्मतमेतमात्मानमोमितिब्रह्मणैकीकृ 1470
त्यब्रह्मचात्मनोमित्येकीकृत्यतदेकमजरममरममृतमभयमो
मित्यनुभूय[?]तस्मिन्निदंसर्वंत्रिशरीरमारोप्यतन्मयंहितदेवेतिसं
हरेदोमितितंवाएतंत्रिशरीरमात्मानंत्रिशरीरंपरंब्रह्मानुसंदध्या
त्स्थूलत्वात्स्थूलभुक्त्वाच्चैक्यादानंदभोगाच्चसोयमात्माचतुष्पा
ज्जागरितस्थानःस्थूलप्रज्ञःसप्तांगएकोनविंशतिमुखस्थूलभुक्

उत्तरता· तुरात्माविश्वो वैश्वानरः प्रथमः पादः स्व प्रस्थानोंतः सूक्ष्म प्रज्ञः स्थूलः
१ सप्तांग एकोनविंशतिमुखः सुक्ष्मभुक्चतुरात्मातैजसोहिरण्यग
र्भोद्वितीयःपादोयत्रसुप्तोनकंचनकामंकामयतेनकंचनस्वप्नं प
श्यतितत्सुषुप्तंसुषुप्तस्थान एकीभूतः प्रज्ञानघनएवानंदमयो
ह्यानंदंभुक्चेतोमुखः श्चतुरात्माप्राज्ञईश्वरःतृतीयःपादःएषस
र्वेश्वरः एषसर्वज्ञ एषोंतर्याम्येषयोनिःसर्वस्यप्रभवाप्ययोहिभूता
नांत्रयमेतत्सुषुप्तंस्वप्नंमायामात्रंचिदेकरसोह्ययमात्माथचतुर्थ
श्चतुरात्मातुरीयावसिंचत्वादेकैकस्योतानुज्ञा ता साविकल्पैस्त्रैय ६१
मात्रापिसुषुप्तंपापात्रंचिदेकरसोह्ययमादेशोनस्थूलं प्रज्ञंनसूक्ष्म

प्रज्ञंनोभयतः प्रज्ञंनप्रज्ञंनाप्रज्ञंनज्ञानघनमदृष्टमव्यवहार्यम 225/1920
ग्राह्यमलक्षणमचिंत्यमव्यपदेश्यमेकात्मप्रत्ययसारंप्रपंचोपशमं
शिवंशांतमद्वैतंचतुर्थमेवमन्यंते स एवात्मा स एवविज्ञेयः ईश्वरग्रा
सस्तुरीयस्तुरीयः॥ १ ॥तंवा एतमात्मानंजा[illegible]त्स्वप्नसुषु प्र
प्तंस्वप्नजाग्रतमसुषुप्तंसुषुप्तजाग्रतमस्वप्नंजाग्रेतुरीयेतमस्व
प्नमसुषुप्तमव्यभिचारिणंनित्यानंदंसदेकरसंह्येवंचक्षुषोद्र
ष्टाश्रोत्रस्याद्रष्टावाचाद्रष्टामनसोद्रष्टाबुद्धेर्द्रष्टाप्राणस्यद्रष्टा
ततः सर्वस्मादन्यादन्योविलक्षणश्चक्षुषः साक्षीश्रोत्रस्यसा
क्षीवाचः साक्षीबुद्धेःसाक्षीप्राणस्यसाक्षीतमसःसाक्षीसर्व

उत्तरता॰ स्यसाक्षीततोअधिकोयेमहाचैतन्योस्मात्सर्वस्मात्प्रियतमआ नृसिंह
२ नंदघनंत्वेवमस्मात्सर्वस्मात्पुरतःसुविभातमेकरसमेवाजरम
मृतमभयंब्रह्मैवाप्यजयैनंचतुष्पादंमात्राभिरोंकारेणचैकीकुर्या
ज्जागरितस्थानश्चतुरात्माविश्वोवैश्वानरश्चतुरूपोंकारएवचतु
रूपोत्यकारःस्थूलसूक्ष्मबीजसाक्षीभिरकाररूपैराप्तिरादिम
त्वाद्वास्थूलत्वात्सूक्ष्मत्वाद्बीजत्वात्साक्षीत्वाच्चाप्नोतिहवाइदंसर्वमा
दिश्चभवतियएवंवेदस्वप्नस्थानश्चतुरात्मातैजसोहिरण्यगर्भश्चतु
रूपउकारएवचतुरूपोत्ययमुकारस्थूलसूक्ष्मबीजसाक्षीभिरुकार २
रूपैरुत्कर्षादुभयत्वाद्वास्थूलत्वात्सूक्ष्मत्वाद्बीजत्वात्साक्षीत्वाच्चोत्क

र्षतिहवैज्ञानसंततिंसमानश्चभवतियएवंवेदसुषुप्तस्थानश्चतु 223/1970
रात्माप्राज्ञईश्वरश्चतुरूपोमकारएवचतुरूपोत्ययंमकारःस्थू
लबीजसाक्षीभिर्मकाररूपैर्मितेरपीतेर्वास्थूलत्वात्सूक्ष्मत्वाद्बीज
साक्षीत्वाच्चमिनोतिहवाइदंसर्वमपीतिश्चभवतियएवंवेदमात्रामात्राः
प्रतिमात्राकुर्यादथतुरीयईश्वरग्रासःस्वराट्स्वयमीश्वरःस्वप्रकाश
श्चतुरात्मोतानुज्ञात्रनुज्ञाविकल्पैरोतोह्ययमात्माह्येदंसर्वमंतकाले
कालाग्निसूर्योस्रैरनुज्ञाताह्ययमात्माअस्यसर्वस्यस्वात्मानंददाति
दर्शयतीदंस्वात्मानमेवकरोतियथातमःसविताअनुज्ञैकरसोह्यय
मात्माचिद्रूपएवयथादाह्यंदग्ध्वाग्निरविकल्पोह्ययमात्मावांमनसागोच

उत्तरता॰ रत्वाच्चिद्रूपश्चतुरूपे ओंकार एवचतुरूपो ह्यमोंकार ओतानुज्ञात नृसिंह
२ नृज्ञाविकल्पैरोंकाररूपैरात्मैवनामरूपात्मकंह्यीदंसर्वंतुरीयत्वाच्चि
द्रूपत्वाद्वाउतत्वादनुज्ञातत्वादविकल्परूपत्वाच्चाविकल्परूपंहीदंस
र्वंनैवतत्रकाचनभिदास्त्यथतस्यायमादेशोमात्रश्चतुर्थोव्यवहार्यःप्र
पंचोपशमःशिवोद्वैतओंकाराआत्मैवसंविशत्यात्मनात्मानंयएवंवे
दएषवीरोनारसिंहेनानुष्टुभेनराजेनतुरीयंविद्योदयस्त्वात्मानंप्रका
शयतिसर्वसंहारसमर्थपरिभावाःसहःप्रभुर्व्याप्तःसदोज्वालाविद्या
तत्कार्यहीनःस्वात्माबंधहारसर्वदाद्वैतरहितःआनंदरूपःसर्वाधिष्ठा २
नसव्यानिरस्ताविद्यातमोमोहाहमेनितस्मादेवमेवममात्मानंपरब्र

ह्मानुसंदध्यादेषवीरोनृसिंहएव॥ २ ॥तस्यहवेप्रणवस्ययापूर्वा
मात्राप्रथमःपादोभवतिद्वितीयाद्वितीयस्यतृतीयातृतीयस्यचतुर्थो
तानुज्ञात्रनुज्ञाविकरूपातुरीयंचतुरात्मानमन्विष्यचतुर्थपादेनचत
यातुरीयेणानुचिंतयन्ग्रसेत्तस्यहवाएतस्यप्रणवस्ययापूर्वमात्रापृथि
व्यकारःसऋग्भिर्ऋग्वेदोब्रह्मावसवोगायत्रीगार्हपत्यःसाप्रथमः
पादोभवतिभवतिचसर्वेषुचतुरात्मास्थूलसूक्ष्मबीजसाक्षिभिर्द्विती
यांतरिक्षंसउकारःसयजुर्भिर्यजुर्वेदोविष्णुरुद्रास्त्रिष्टुप्दक्षिणाग्निः
साद्वितीयपादोभवतिभवतिचसर्वेषुपादेषुसचतुरात्मास्थूलसूक्ष्म
बीजसाक्षीभिस्तृतीयाद्यौसमकारःससामभिःसामवेदोरुद्रादित्याजग

229
1920

उत्तरता. त्याहवनीयःसास्तृतीयःपादोभवतिभवतिचसर्वेषुचतुरात्मास्थूल नृसिं.
४ सूक्ष्मःबीजसाक्षिभिर्यावसाने अस्यचतुर्थ्यर्द्धमात्रासासाम्लो
कओंकारःसोथर्वणैर्मंत्रैरथर्ववेदःसंवर्तकोग्निर्मरुतोविराडेकर्
षिर्भास्वतिस्मृतासाचतुर्थपादोभवतिभवतिचसर्वेषुपादेषुचतुरात्मा
स्थूलसूक्ष्मबीजसाक्षीभिर्मात्रामात्राकृत्वोतानुज्ञानसुज्ञाविकल्प
रूपंचिंतयन्ग्रसेत्मृतोकुतसंविवक्तःश्रुत्यःसंविष्टोनिर्विघ्नइममस्तु
नियमेनुभयेहेदसर्वदृष्ट्वासुप्रपंचहीनोसकलःसाधारोमृतमयश्च
तुरात्मासर्वमयेश्चतुरात्माथमहीपीठसपरिवारंतमेतंचतुःसदातमा ४
त्मानंमूलाग्नावग्निरूपंप्रणवंसंदध्यात्समासानंदचतुरात्मानंमका

रंब्रह्माणंनाभौसमात्मानंचतुरात्मानमुकारंविष्णुहृदयेसमात्मा
नंचतुरात्मानंमकारंरुद्रंभ्रुमध्येसमात्मानंचतुसमात्मानंचतुरा
त्मनमोंकारंसर्वेश्वरंद्वादशांतेसमात्मानंचतुरात्मानंचतुसमात्मा
नंचतुरात्मानमानंदामृतरूपंप्रणवंषोडशांतेधानंदामृतेतेनेनंश्चतु
र्धासंपूज्यतथाब्राह्मणमेवविष्णुमेवविभक्तांस्त्रीनेवाविभक्तांनेव
लिंगरूपातेवचसंपूज्योपहारैश्चतुर्द्धायलिंगात्संहृत्यतेजसाशरी
रत्रयंसंव्याप्यतदधिष्ठानमात्मानंसंज्वाल्यतत्तेजसआत्मचैतन्यरू
पंबलमवष्टभ्यगुणैरैक्यंसंपाद्यमहास्थूलेमहस्थूलंमहासूक्ष्मे.
महासूक्ष्मंमहाकारणेचसंहृत्यमात्राभिरोतानुज्ञाविकल्परूपं

231
1930

उत्तरता॰ चिंतयन्नासेत्॥ ३ ॥तद्वा एतमात्मानं परमं ब्रह्मोंकारं तुरीयोंकाराग्रविद्योतमनुष्टुभानत्वा प्रसाद्या मिति संहृत्याहमित्यनुसंदध्यात्तथैतमेवात्मानं परं ब्रह्मोंकारं तुरीयोंकाराग्र ग्रविद्योतमेकादशात्मानमात्मानं नृसिंहं नत्वामिति संहरन्ननुसंदध्यादथैतमेवात्मानं परं ब्रह्मोंकारं तुरीयोंकाराग्रविद्योतप्रणवेन संचिंत्यानुष्टुभा सच्चिदानंदपूर्णात्मकं तं परं ब्रह्म सभाव्याहमित्यात्मानमादीय मनसा ब्रह्मणैकीकुर्यादनुष्टुभैव च एष तु एष नृसिंह सर्वेसर्वत्र सर्वदा सर्वदा सर्वात्मा नृसिंहासापरमेश्वरो सो हि सर्वत्र सर्वदा सर्वात्मा मंन्सर्वमिति नृसिंह एवैक एष त्वेवोग्र एष एव वीरं एष एव वीरं एष एव महानेष एव विष्णुरेष एव ज्वलन्नेष नृसिं॰ ५

एव सर्वतोमुख एष एव नृसिंहं एष एव भीषणः एष एव भद्र एष एव मृत्युरेष एव नयाम्यं षहवाहमेवं योगारूढो ब्रह्मण्येवानुष्टुभं संदध्यादोंकार इति नंदतोश्वाकोभवतः॥ संस्तभ्यासिंहं स्वसुतान्गुणाकृ संभाज्य संयोगेश्वरस्य हत्वा॥ यस्यां स्फुरंतीमसतीनिःपीडय संसक्षे यसिंहेनस एष वीरः॥ भृंगप्रोता पदार स्पृष्टाहत्वातामग्रसत्स्वयं॥ न नत्वाच बहुधा सृष्टा नृसिंहः स्वहसुद्दिभाति॥ ४ ॥अथयो एवाकार आसत्तमार्थे आत्मन्येव नृसिंहब्रह्माणि वर्तत्त एष त्येवा प्रतम एष हि साक्ष्येष ह्रीश्वरोतः सर्वतो न ही दं स र्वमेष हि व्याप्तम इदं सर्वं पदप मात्मामाथामात्रे प्रप एवोग्र एष त्येवाप्तत भएष एव वीर एष एव हि व्या 233/1970

उत्तरता॰ ६ प्ततम एव महानेषहिव्याप्ततम एष एव विष्णुरेषहिव्याप्ततम एष ए नृसिं
वः ज्वलनेष एव हिव्याप्ततम एष एव सर्वतो मुखव एषहिव्याप्ततम एष ए
वः भीषण एषहिव्याप्ततम एष एव मृत्युमृत्युरेषहिव्याप्ततम एष ए
वनमाम्येषहिव्याप्ततम एष एवाहमेषहिव्याप्ततम अे त्मैव नृसिंहोदे
वो भवतिय एवं वेद सोकामो निष्काम आप्तकाम आत्मकामो न तस्य प्रा
णा उत्क्रामंत्यत्रैव समवनीयंते ब्रह्मैव संब्रह्माप्येत्यथैषो एवोकांतर
उत्कृष्टतमार्थ आत्मन्येव नृसिंहदेवे ब्रह्मणि वर्तते तस्मादेष सत्यस्वरू
पेन त्वन्यदस्त्यथेहमनात्मप्रकाशमेषहि स्वप्रकाशो संगोन्यत्रवीक्ष ६
त आत्मनो नान्यत्र भाति एतत्समात्रंत्येतदुत्कृष्टमेव एवोग्र एष एवोत्कृ

ष्ट एष एव वीर एष एवोत्कृष्ट एष एव महानेषत्येवोत्कृष्ट एष एव विष्णु
रेषत्येवोत्कृष्ट एष एव ज्वलन्नेषात्येवोत्कृष्ट एष एव सर्वतो मुखव एषत्ये 235/1930
वोत्कृष्ट एष एव भीषण एषत्येवोत्कृष्टा एष एव भद्र एषत्येवोत्कृष्ट एष ए
व मृत्युमृत्युरेषत्येवोत्कृष्ट एष एव अमाम्येषत्येवोत्कृष्ट एष एवात्त
मेषत्येवोत्कृष्टस्तस्मादात्मानमेवैवं जानीयादात्मैव नृसिंहो देवो ब्रह्म
भवतिय एवं वेद सोकामो निष्काम आप्तकाम आप्तकामो न तस्य प्राणा उ
त्क्रामंत्यत्रैव समवनीयंते ब्रह्मैव सन्ब्रह्माप्येत्यथैष एव मकारो महा
विभूत्यर्थ आत्मन्येव नृसिंहे देवे परे ब्रह्मणि वर्तते तस्माद्यमनन्त्याभि
न्न स्वरूपः स्वप्रकाश ब्रह्मैवाप्याप्ततम उत्कृष्टतम एतदेव ब्रह्मापि सर्व

उत्तरता· ह्येमहामायंमहाविभूत्यैतद्ध्येवोग्रमेतद्धिमहाविभूत्यैतद्देववीरमेतद्धि नृसिं·
७ महाविभूत्यैतदेवमहानेतद्धिमहाविभूत्यैतदेवज्वलंन्येतद्धिमहाविभू
त्यैतदेवमृत्युमृत्युरेतद्धिमहाविभूत्यैतद्देवनमाम्येतद्धिमहाविभूत्यै
तस्मादकारोकाराभ्यामिममात्मानमोतमेतमुत्कृष्टतमंचिन्मात्रंस
र्वद्रष्टारंसर्वसाक्षिणंसर्वग्रासंसर्वप्रेमास्पदंसच्चिदानंदमात्रमेका
रसंपुरतोस्मात्सर्वस्मात्सुविभातमन्विष्यात्तमुत्कृष्टतन्मात्रंम
हाविभूतिंसच्चिदानंदमात्रमेकरसंपरमेवब्रह्ममकारेणजानीया
दात्मैवनृसिंहोदेवःपरमेवब्रह्मभवतियएवंवेदसोकामोनिष्का ७
मआत्मकाआत्मकामोनतस्यप्राणानुत्क्रामंत्यत्रैवसमलीयंते

ब्रह्मैवसन्ब्रह्माप्येतीतिहप्रजापतिरुवाच॥ ५ ॥तेदेवाइम
मात्मानंज्ञातुमैच्छंस्तान्हासुरःपाप्मापरिजग्राहतेऐक्षंत
हंतैनमासुरंपाप्मानंपरिजग्रासतमइतितमेवोंकाराग्रविद्यो
तंतुरीयातुरीयमात्मानमुग्रमनुग्रंवीरमवीरंमहांतममहां
तंविष्णुमविष्णुंज्वलंतमज्वलंतंसर्वतोमुखमसर्वतोमुखं
नृसिंहंभीषणंभद्रंमृत्युमृत्युममृत्युमृत्युंनमाम्यनमाम्यहन्नहं
नृसिंहानुष्टुभैवबुद्धिरेतोभ्याहासावासुरःपाप्मासच्चिदानंदघनंज्यो
तिरभवत्तस्मादपध्वकषायमिमंमेवोंकाराग्रविद्योतंतुरीयातुरीय
मात्मानंनृसिंहानुष्टुभैवजानीयात्तस्याहासुरुपाप्मासच्चिदानंदघ

237/1970

उत्तरता. नंज्योतिरूपमेवदपद्युषायमिमंनेवाःकाराग्रविद्यातंतुरीयातुरी नृसिं.
८ यमात्मानंनृसिंहानुष्टुभतितदेवाज्योतिषमुतितीर्थेवाद्वितीयाद्वय
मेवपश्यंतइममेवोंकाराग्रविद्यातंतुरीयांतुरीयमात्मानंनृसिंहानुष्टु
भान्विश्यप्रणवेनैवतस्मिन्नवास्थितास्तस्यस्तज्योतिरस्यसर्वस्यपुर
तःसुविभातमद्वैतमचिंत्यमलिंगंस्वप्रकाशमानंदघनंशून्यमसव
देवंविश्वप्रकाशंपरमेवब्रह्मसवतिदेवाःपुत्रैषणायाश्चवित्तैषणाया
श्चलोकैषणायाश्चससाधनेभ्योव्युत्थायनिरंकारानिरागामिःपरि
ग्रहाअशिरवाअयज्ञोपवीताअंधावधीरामुग्धाक्लीवामुकाउन्मत्ता ८
इववर्तमानाशांतादांतउपरतास्तीतिक्षवःसमाहिताआत्मरतस्तप

आत्मक्रीडाआत्मनियुताआत्मानंदाःप्रणवमेवपरमंब्रह्माप्र 239
काशंशून्यंजानंतत्रैवयादिसमासास्तस्मादेवानांव्रतमाचरंनोका 1930
रेब्रह्मणिपर्यवसितास्मैवत्स आत्मनैवात्मानंपरंब्रह्मपश्यतितिद
वश्लोकः॥शृंगंचशृंगसंयोज्यसिंहंशृंगमुयाजयेत॥शृंगाभ्यांशृंग
मवध्यत्रयोदेवाउपासतइति॥ ८ ॥देवाहवैप्रजापतिमब्रुवन्नृभू
यएवनाभगवन्विज्ञापत्वितिथेत्यरत्वादजात्वादमृतत्वादभयत्वा
दशोकत्वादमोहत्वादनशायत्वापिपासत्वादद्वैतत्वात्वाकारेणेम
मात्मानमन्विष्योत्कृष्टत्वादुत्पादकत्वादुत्सद्दष्टत्वादुच्छामित्वा
उपद्रष्टृत्वादुत्सार्तकत्वादुत्पद्यवारिकत्वादुत्ग्रासकत्वादुद्भूतक

त्वादुत्तीर्णापिकृतत्वाच्चोंकारेणापरमंसिंहमन्विष्याकारमिममात्मा
नमुकारपूर्वार्द्धमाकृष्यसिंहीकृत्योत्तरार्द्धेनतंसिंहमाकृष्यमह
त्वात्यहस्तामानत्वान्मुक्तत्वान्महादेवत्वान्महेश्वरत्वांमहाचिदात्मे
हानंदत्वान्महाप्रभुत्वाच्चमकारार्द्धेनात्मनैकीकुर्यादशरीरोनिरिंद्रि
योप्राणोतमाः सच्चिदानंदमात्रः सस्वराड्भवतिय एवंवेदस्वमित्यह
मितिहोवाचैवमेवेदंसर्वंतस्मादहमितिसर्वाभिध्यानंतस्यादिरयमका
रःसएवभवतिसर्वंह्ययमात्मा अयंहिसर्वांतरोहिनहीदंसर्वंनिरात्म
कमात्मैवेदंसर्वंतस्मात्सर्वात्मकेनाकारेणसर्वात्मकमात्मानमन्विछ
ब्रह्मैवेदंसर्वंसच्चिदानंदरूपंसच्चिदानंदरूपंसर्वंसिद्धिदंसर्वंप्रकाशय ९

तेप्रकाशतेचेतिसद्धीतिदमिदंनेत्यनुभूरितिकौषीतकीयमियंनेत्य
वचनेनैवानुभवन्नुवाचैवमेवचिदानंदावप्यवचनेनैवाभवन्नुवाचस 261
र्वमन्यदपिसपरमआनंदस्तस्यब्रह्मणोनामब्रह्मेतितस्यांत्योयंमका 1500
रसएषवतितस्मान्मकारेणपरंब्रह्मान्विच्छेदकिमिदमेवमृत्यक इत्यवा
हीविचिकित्संदस्यादाकारेणममात्मानमन्विष्यमकारेणब्रह्मणायं
दध्यादुकारेणाविचिकित्संनशरीरोनिरिंद्रियोप्राणोतमाः सच्चिदानं
मात्रसस्वराड्भवतियएवंवेदब्रह्मवाइदंसर्वममृतत्वादुग्रत्वाद्वीरत्वात्म
हत्वाद्विष्णुत्वाज्ज्वलत्वात्सर्वतोमुखत्वान्नृसिंहत्वाद्भीषणत्वाद्भद्रत्वान्मृ
त्कत्वान्नमामिदहंत्वादितिसततंत्येतद्ब्रह्मोग्रत्वात्सुनःपुनर्हत्वादिति

उत्तरता॰ तस्माकारेणपरमंब्रह्मान्विष्यमकारेणमनआद्यवितारंमनआदि नृसिंह:
१० सदक्षिणमान्विष्ठत्सयदेतत्सर्वमुपक्षतेतदेतत्सर्वमस्मिन्प्रविशति
सपदाप्रबुध्यतेतदेतत्सर्वामःस्मादेवोत्तिष्ठतिएतत्सर्वनिरूत्यप्रत्यु
त्यसंपीड्यसंज्वाल्यसंभक्षस्वात्मानमेवांददात्युपातिवीरोतिमहानाति
विष्णुनतिज्वलनतिसर्वमुखोतिनृसिंहोतिभीषणोतिभद्रोतिमृत्युमृत्यु
रितिनमामात्यहंभूत्वास्वमहिम्निसदासमासतेतस्मादेनंमकारोर्द्धेन
परेणाब्रह्मणैकीकुर्यादुकारेणाविचित्सन्नशरीरोनिंद्रियोप्राणोतमाः
सच्चिदानंदमात्रःसस्वराटभवतियएवंवेदतदेषश्लोकः॥शृंगंशृंगा १०
र्द्धमाकृष्यशृंगेणानेनयोजयेत्शृंगमेनंपरेशृंगेतमनेनापियोजयेत्

त॥ ७ ॥अथतुरीयेणोतश्चप्रोतश्चत्ययमात्मासिंहोस्मिन्नहीदंसर्व
मयंहिसर्वमेवोनाद्वयोत्ययमात्मैकलएवाविकल्पोनहीवस्तुसद 243
यंत्येतश्वसदघनोयंःचिद्घनेनानंदघनएकरसोव्यवहार्यःकेनच 1970
नाद्वितीयएवओतश्चप्रोतश्चैष ॐकारएवनैवमितिदृष्टओमित्येवा
हओंकारोवागिदंसर्वंनत्यशरीरमिवहाःवास्तिचिन्मयोत्ययमोंका
रश्चिन्मयमिदंसर्वंतस्मात्परमेश्वरएवैकमेवतद्भवत्येतदमृतमभय
मेतद्ब्रह्माभयंहिवैब्रह्मभवतियएवंवेदेतिरहस्यमनुज्ञातोत्ययमा
त्माएषत्यस्यसर्वस्यस्वात्मानंमनुजानातिनहीदंसर्वंस्वतआत्मव
त्तत्ययमोहानानुज्ञातासंगत्वादविकारित्वादसत्वादस्यानुज्ञा

 ताऽप्ययमोंकारं ओमिति ह्यनुज्ञातातिवाग्वा ओंकारोवागेदंसर्वम
 नुजानुज्ञानातिचिन्मयोह्ययमोंकश्चिद्धिदंसर्वंनिरात्मकमात्मसात्क
रोतितस्मात्परमेश्वरएवैकमेवतद्भवत्येदमृतमभयमेतद्ब्रह्माभयंहि
वैब्रह्मभवतियएवंवेदेतिरहस्यमनुज्ञैकरसोह्ययमात्माप्रज्ञानघन
एवायंयस्मात्सर्वस्मात्पुरतःसुविभातोतश्चिंघनएवनह्ययमोतोनानु
ज्ञाताआत्मैहीदंसर्वंसदेवानुज्ञैकरसोह्ययमोंकारओमितिह्येवानु
ज्ञातीवाग्वाओंकारोवागेनह्यनुजानातिचिन्मयोह्ययमोंकारश्चिदेव
ह्यनुज्ञातस्मात्परमेश्वरएवैकमेतद्भवत्येतदमृतमभयमेतद्ब्रह्माभयंवै
ब्रह्माभयंहिवैब्रह्मभवतियएवंवेदेतिरहस्यमविकल्पोह्ययमात्माद्वि

तीयत्वाइतिकल्पोह्ययमोंकारोद्वितीयत्वादेवचिन्मयोह्ययमोंकार 245/1990
स्तस्मात्परमेश्वरएवैकमेवतद्भवत्यविकल्पोनाचिकल्पोपिनात्रका
चनभिदास्तिनैवात्रकाचनभिदास्त्यत्रभिदासिवमन्यमानःशतधास
हस्रधाभिन्नोमृत्योर्मृत्युमाप्नोतितदेतदद्वयंस्वप्रकाशंमहानंदमा
त्मैवैतदमृतमभयमेतद्ब्रह्माभयंवैब्रह्माभयंवैब्रह्मभवतियएवंवेद
तिरहस्यं॥ ८ ॥देवाहवैप्रजापतिमब्रुवन्नियमेवनोभगवन्नों
कारमात्मनमुपदेशेतितथेत्यपद्रष्टानुमतैष आत्मासिंहश्चिद्रूपए
वाविकारोह्यपलब्धासर्वत्रनह्यास्तिद्वैतसिद्धिरात्मैवसिद्धोपद्वितीयो
माययाह्यन्यदिवसर्वोएषआत्मापरएषैवसर्वतथाहिप्राज्ञैःसेषाविद्या

जगत्सर्वमात्मापरमात्मैवस्वप्रकाशोप्यविषयज्ञानत्वाज्ज्ञानन्नेव
त्यत्र नविजानात्यनुभूत्यैमायाचतमोरूपानुभूतेस्तदेवजडंमोहात्म
कंमनंतुगच्छमिदंरूपमस्यास्यव्यंजिकानित्यानिवृत्तांनिरूढैरात्मैवद्र
ष्टास्यात्सत्वसत्वंचदर्शयतिसिद्धत्वासिद्धत्वाभ्यांस्वतंत्रास्वतंत्रत्वेन
सैषावटबीजसामान्यवदनेकवटशक्तिरेकैवतद्यथावटबीजसामा
न्यमेकमनेकान्स्वाव्यतिरिक्तानिपरिपूर्णानिक्षेत्राणिदर्शयित्वाजीव
शावाभासेनकरोतिमायाचाविद्याचस्वयमेवभवतिसैषाचित्रांसुदृढा
बद्धंकुरास्वयंगुणभिन्नांकुरेष्वपिगुणभिन्नासर्वत्रब्रह्मविष्णुशिवरूपि १२
णीचैतन्यदीप्तातस्मादात्मन्येवंत्रैविध्यंसर्वत्रयोनित्वमप्याधिमंताजीवो

नियंतेश्वरः सर्वाहंमानीहिरण्यगर्भस्वरूपईश्वरवद्व्यक्तचैतन्यः सर्व
गोत्येषईश्वरःक्रियाज्ञानात्मासर्वासर्वमयंसर्वजीवाःसर्वमयाःसर्वव
स्थासुतथाप्यलात्मवाएषसूतानीद्रियाणिविराजंदेवताःकोशांश्चसृष्ट्वा
प्रविश्यामूढोमूढवद्व्यवहरन्नास्तेमाययैवतस्मादद्वयएवायमात्मासन्मा
त्रोनित्यःशुद्धोबुधःसत्योमुक्तोनिरंजनोनिरंतरोविभुरद्वयआनंदःप
रःप्रत्यगेकरसःप्रमाणैरेतैरवगतःसत्तामात्रंहीदंसर्वंसदेवपुरस्तात्सि
द्धंहिब्रह्मधनत्यत्रकिंचनानुभूयतेनानुविद्यानुभवात्मनिस्वप्रकाशे
सर्वसाक्षीण्यविक्रियद्वयेपश्यतेःहापित्सन्मात्रमसदन्यत्सत्यंहीद्धंपुर
स्ताद्द्वयोनिस्वात्मस्थमानंदचिद्घनंसित्यंत्यासित्यंतद्विष्णुरीताब्रह्मान्य

247
1970

उत्तरता. दपिसर्वंसर्वगंसर्वमनएवमुक्तोबात्यस्वरूपोशुद्धःसुखरूप आत्मा नृसिं.
१२ नहीदंनिरात्मकंत्येतमपिनात्मापुरतोहिसिद्धोनहीदंसर्वंकदाचिदात्मा
स्वमहिम्नस्थोनिरपेक्षयेक्षकएवसाक्षीस्वप्रकाशःकिंतन्नित्यमात्मनो
न्नत्येवनाविचिकित्स्यमेतद्धिदंसर्वंसाधयतिद्रष्टाद्रष्टुःसात्मविक्रयःसि
द्धोनिरवद्योबात्यांतरवीक्षणात्सुविस्पष्टस्तमपरस्माद्भूतेषद्रष्टाद्रष्टोव ०
तिद्रष्टोत्सवहार्योपत्योनात्यःसाक्षविशेषोनाभ्योसुखदुःखोद्वयःपर
मात्मासर्वज्ञोनंतोभिन्नोद्वयःसर्वदासंविन्निस्वप्रकाशेयूयमेवदृष्टाःके
नद्वयेनद्वितीयमेवनयूयमेवनयूयमेवब्रूत्येमभगवन्नितितेदवाऊचू १२
र्यूयमेवदृश्यतेचिन्मात्रात्मज्ञोसंगोत्ययमापूपमेवस्वप्रकाशाइदंसत्तं

चिन्मयत्वांयूयमेवेनेतिहोचुर्हतासंगावयमिनिहोचुःकथंपत्स्यंतीति 249
होवाचनवयंविम्नइतिहोचुस्ततोयूयमेवस्वप्रकाशाइतिहोवाचनचस
त्संचिन्मयाएतोहिपुरस्तात्सुविषातमव्यवहार्यमेवाद्वयंज्ञातोविषवि 1970
ज्ञातोविदिताविदितात्परइतिहोचुःसहोवाचतद्वाएतद्ब्रह्माद्वयंबृहत्वा
न्नित्यंशुद्धंबुद्धंमुक्तंसत्यंसूक्ष्मंपरिपूर्णमद्वयंसघनंदचिन्मात्मैवाव्य
वहार्यकेतचनतदेतदात्मानमोमित्यश्यंतःपश्यततदेतत्सत्यमात्मा
ब्रह्मैवब्रह्मैवात्रत्येवनाविचिकित्स्यमित्योमंत्यंतदेतत्पिंडताएवपश्यं
त्यतद्वाशब्दमस्पर्शमरूपमरसमगंधमव्यक्तमव्यनादातव्यमविस
र्जयितव्यमविसर्जयतानंदपितव्यममंतव्यमबोधव्यमहंकर्तव्यमचेत

श्रितव्यममपानश्रितव्यमव्यानश्रितव्यमनुदानश्रितव्यमनींद्रियमवि
षयमकरणमसंगमगुणमविक्रियमव्यपदेश्यमसत्वमरजस्कमतम
स्कममायमथोपनीषदमेवसुभाषितंसकृद्विभातंपुरतोस्मात्सर्वस्माद्विभा
तमद्वयंपश्यताहंसः सोहमितिसहोवाचकिमेषदृष्टोदृष्टो विदितोविदिता
त्तरइतिहोचुः केषाकथमितिहोचुः किंतेननकिंचनेतिहोचुर्यूयमाश्चर्य
रूपाइतिनचेत्याहोमित्यनुजानीध्वंब्रुतेनमितिज्ञातोज्ञातश्चेतिहोचुर्नैव
मितिहोचुर्ब्रूतैवेनमात्मासिद्धमितिहोवाचपश्याम एवभगवान्नचैवयं
पश्यामोनैवंवयंवक्तुंशक्नुमोनमस्तेभगवन्प्रसीदेतिहोचुर्नभेतव्यंपृच्छ
तेतिहोवाचक्वैषानुज्ञात्येष एत्येषएवात्मेतिहोवाचतेहोचुर्नमस्क्षम्यंवयं

तइतितिह प्रजापतिर्देवाननुशशासेतितदेषश्लोकः॥ॐ नमोतेनजा
नीयाद्यदनुज्ञातारमौतरं॥ अनुज्ञामद्वयंलब्ध्वाउपद्रष्टारमाव्रजेदिति॥
९ ॥इत्यथर्ववेदेनृसिंहोत्तरतापिनीयोपनिषत्समाप्तं॥ ३४ ॥ ॥

257/1970

इत्यथर्ववेदे नृसिंहोत्तरतापिनीयोपनिषत्समाप्तं

श्रीगणेशाय नमः॥ ॐ सह नाववत्विति शांतिः॥ ब्रह्मावर्ते नेम
हाभांडीरवटमूले महासत्रायसमेता महर्षयः शौनकादयस्ते
ह समित्पाणयस्तत्वजिज्ञासवो मार्कंडेयं चिरजीविनमुपसमेत्य
पप्रछुः॥ केन त्वं चिरंजिवसि केन वानंदमनुभवसीति परमरह
स्य शिवतत्वज्ञानेनेति॥ स होवाच॥ किं तत् परमरहस्य शिव
तत्वज्ञानं तत्र को देवः के मंत्राः॥ कानिष्ठा॥ किं तत् ज्ञानं सा
धनं॥ कः परिकरः को बलिः॥ कः कालः किं तत् स्थानं॥ स होवा
च॥ येन दक्षिणामुखशिवोपरोक्षीकृतो भवति तत् परमर

हस्य शिवतत्वज्ञानं॥ यस्सर्वोपरमेकालेसर्वानात्मन्युपसंहृत्य
स्वात्मानंदस्सुखेमोदते प्रकाशते वा सदेवः॥ अत्रैते मंत्ररहस्य
श्लोका भवंति॥ मेधादक्षिणामूर्तिमंत्रस्य॥ ब्रह्माऋषिः॥ गाय
त्रीछंदः॥ देवतादक्षिणास्यः॥ मंत्रेणांगन्यासः॥ ॐमादौनमः
उच्चार्य ततोभगवते पदं॥ दक्षिणेतिपदं पश्चात् मूर्तये पदमु
द्धरेत्॥ अस्मच्छब्दं चतुर्थ्यंतं मेधां प्रज्ञापदं वदेत्॥ प्रमुच्चार्य त
तो वायुबीजं छं चं ततः पठेत्॥ अग्निजायां ततस्त्वेषः चतुर्विंशा
क्षरो मनुः॥ स्फटिकरजतवर्णं मौक्तिकीमक्षमालाममृतकलशः
विद्याज्ञानमुद्राः कराग्रैः॥ दधतमुरगकक्ष्यं चंद्रचूडं त्रिनेत्रं विधृ

तविविधभूषं दक्षिणामूर्तिमीडे॥ आदौवेदादिमुच्चार्य स्वराद्यं स
विसर्गकं॥ पंचार्णं ततउद्धृत्य पुनरंस विसर्गकं॥ अंतेसमुद्धरेत्ता
रं मनुरेषनवाक्षरः॥ मंत्रेणन्यासः॥ मुद्रांभद्रार्थदात्रीसपरशु
हरिणं बाहुभिर्बाहुमेकं जान्वासक्तं दधानो भुजगवरसमाबद्ध
कक्ष्यो वटाधः॥ आसीनश्चंद्रखंडप्रतिघटितजटां क्षीरगौरस्त्रि
णेत्रो दद्यादाद्यः शुकाद्यैर्मुनिभिरभिवृतो भावशुद्धिं भवो नः॥
मंत्रेणांगंन्यासः॥ तारं ब्लूं नमउच्चार्य मायां वाग्भवमेव च॥ दक्षि
णापदमुच्चार्य ततस्यान्मूर्तयेपदं॥ ज्ञानं देहि पदं पश्चात् वह्नि
जायां ततो न्यसेत्॥ मनुरष्टादशार्णोयं सर्वमंत्रेषु गोपितः॥ भ

स्मेरापांडुरांगश्शशिशकलधरोज्ञानमुद्राक्षमालावीणापुस्तैः
विराजित्करकमलधरो योगपट्टाभिरामः॥व्याख्यापीठेनिष
ण्णो मुनिवरनिकरैः सेव्यमानः प्रसन्नस्सव्यालःकृत्तिवासास्सत
तं भवतु नो दक्षिणामूर्तिरीशः॥मंत्रेण न्यासः॥तारं परां रमाबी
जं वदेत्सांबशिवाय च॥तुभ्यं चानलजायां तु मनुर्द्वादशवर्णकः
वीणां करैः पुस्तकमक्षमालां बिभ्राणमभ्राभगलं पराढ्यं॥फणी
द्रकल्पं मुनिभिश्शुकाद्यैः सेव्यं वटाधःकृतनीडमीडे॥विष्णुऋषिः
अनुष्टुप्छंदः॥दक्षिणास्यो देवता॥मंत्रेण न्यासः॥तारं नमो भग ॥२॥
वते तुभ्यं वटपदं ततः॥मूलेति पदमुच्चार्य वासिने पदमुद्धरेत्

वागीशाय वदेत्पश्चान्महाज्ञानपदं ततः॥दायिने पदमुच्चार्य मायि
ने पदमुद्धरेत्॥वह्निजायान्तनस्त्वेषद्वात्रिंशद्वर्णको मनुः॥अनुष्टु
भो मंत्रराजः सर्वमंत्रोत्तमोत्तमः॥मुद्रापुस्तकवह्नीनागविलसद्बा
हुं प्रसन्नाननं मुक्ताहारविभूषणं शशिकला भास्वत्किरीटोज्वलं॥
अज्ञानापहमादिमादिमगिरामर्थं भवानीपतिं न्यग्रोधांतनिवास
नं सुरगुरुं ध्यायाम्यभीष्टाप्तये॥सोहमिति या परास्थितिः सा नि
ष्ठा भवति॥तदभेदेन मन्वाम्रेडनं ज्ञानसाधनं चित्ते तदेकताननता
परिकरः॥अंगचेष्टार्पणं बलिः॥त्रीणि धामानि कालः॥द्वादशांशा
तं परस्थानमिति॥ते ह पुनः श्रद्दधानास्तं प्रत्यूचुः॥अथ वास्योदयः

215 / 1426

किंस्वरूपं॥ कोपास्योपासक इति स होवाच॥ वैराग्यतैलसंपूर्णे भ
क्तिवर्तिसमन्विते॥ प्रबोधपूर्णपात्रे तु ज्ञप्तिदीपं निवेदयेत्॥ मोहां
धकारे निस्सारोउदेति स्वयमेव हि॥ वैराग्यमरणिं कृत्वा ज्ञानं कृ
त्वा तु चित्रगुं॥ गाढतामिस्रसंशांत्यै गूढमर्थं निवेदयेत्॥ मोहभा
नुजसंक्रांतं विवेकाख्यं मृकंडुजं॥ तत्वाविचारपाशेन बद्धं द्वैतभ
यातुरं॥ उज्जीवयं निजानंदे स्वस्वरूपेण संस्थितः॥ शेमुषी दक्षि
णा प्रोक्ता सा यस्याभीक्षणे मुखं॥ दक्षिणाभिमुखः प्रोक्तः शिवो ॥२॥
सौ ब्रह्मवादिभिः॥ सर्गादिकाले भगवान् विरंचिरुपास्यैनं सर्ग

सामर्थ्यमवाप्य तुतोष चित्तेवांछितार्थांश्च लब्ध्वा सोस्योपासको
भवति॥ य इमां परमरहस्यशिवतत्वविद्यामधीते स सर्वपापे
भ्यो मुक्तो भवति॥ य एवं वेद॥ स कैवल्यमनुभवति॥ स कैवल्य 257/1630
मनुभवतीत्युपनिषत्॥ सहनाववत्विति शांतिः॥ ॥इति द
क्षिणामूर्त्युपनिषत्समाप्तः॥ शुभं भवतु॥ छ ॥

॥इतिदक्षिणामूर्तिउपनिषत्समाप्तः॥

॥५॥

॥अथअक्षन्युपनिषत्प्रारंभः॥

अक्षन्युप. श्रीगणेशायनमः॥ ॥सहनाववत्विति शांतिः॥ ॥अ
१ थहंसांकृतिर्भगवानादित्यलोकंजगाम तत्रादित्यंतत्वाचा
क्षुष्मतीविद्ययातमस्तवत्॥ॐ नमोभगवतेश्रीसूर्यायाय
क्षितेजसेनमः॥ ॐ खेचरायनमः॥ ॐ महासेनायनमः॥
ॐ तमसेनमः॥ ॐ रजसेनमः॥ ॐ सत्वायनमः॥ असतो
मासद्गमयतमसोमाज्योतिर्गमयमृत्योर्मामृतंगमय॥
उष्णोभगवंश्छुचीरूपः॥ हंसोभगवांछुचीरूपः॥ प्रतिरूपः॥ १
एवंचाक्षुष्मतीविद्ययास्तुतसूर्यनारायणस्तुप्रीतोब्रवीत्॥

विश्वरूपंघृणिनंजातवेदसंहीरिराममयंज्योतीरूपंतपंतं॥स
हस्त्ररश्मिश्शतधावर्तमानःपुरुषःप्रजानामुदयत्येषसूर्यः॥
ॐ नमोभगवतेश्रीसूर्यायादित्यायाक्षितेजसेहोवाहिनीवाहि
नीवास्वाहेति चाक्षुष्मतीविद्यांब्राह्मणोयोनित्यमधीतेनत
स्याक्षिरोगोभवति॥नतस्यकुलेंधोभवति॥अष्टौब्राह्मणा
न्ग्राहयित्वाविद्यासिद्धिर्भवतियएवंवेदसमहान्भवति॥१
अथहंसांकृतिरादित्यंपप्रच्छभगवन्ब्रह्मविद्यांमेब्रूहीति॥
तमादित्योहोवाच॥सांकृतेशृणुवक्ष्यामितत्वज्ञानसुदुर्ल

261
1970

खं॥ येन विज्ञानमात्रेण जीवन्मुक्तो भविष्यसि॥ सर्वमेकमजं
शांतमनंतध्रुवमव्ययं॥ पश्यन्भूतार्थविद्रूपं शांत आस्व यथा
सुखं॥ अवेदनं विदुर्योगं चित्तक्षयमकृत्रिमं॥ योगस्थः कुरु क
र्माणि निरसो वाथ मा कुरु॥ विरागमुपयात्यंतर्वासनास्वनुवा
सरं॥ क्रियासुदाररूपासु क्रमते मोदतेन्वहं॥ ग्राम्यासु जडचे
ष्टासु सततं विचिकित्सते॥ नोदाहरति मर्माणि पुण्यकर्माणि
सेवते॥ अनन्योद्वेगकारीणि मृदुकर्माणि सेवते॥ पापात् बिभे
ति सततं न च भोगमवेक्षते॥ स्नेहप्रणवगर्भाणि पेशलान्युचि

तानि च॥ देशकालोपपंनादि वचनान्यभिभाषते॥ मनसा
कर्मणा वाचा सज्जनानुपसेवते॥ यतः कुतश्चिदानिय्य नित्यं
शास्त्राण्यपेक्षते॥ तदासौ प्रथमामेकां प्राप्तोभवति भूमिकां॥
एवं विचारवान्यस्स्यात् संसारोत्तारणं प्रति॥ स भूमिकावा
नित्युक्तः शेषस्त्वार्य इति स्मृतः॥ विचारनाम्नीमितरामाग
तो योगभूमिकां॥ श्रुतिस्मृतिसदाचारधारणाध्यानकर्मणः॥
मुख्यया व्याख्यया ख्यातांश्श्रयंति श्रेष्ठपंडिताः॥ पदार्थप्र
विभागज्ञः कार्याकार्यविनिर्णयं॥ जानात्यधिगतश्चान्यां ग्र

263
1970

ग्रहंग्रहपतिर्यथा॥ मदाभिमानमात्सर्यलोभमोहातिशायि
तां॥ बहिरःप्रास्थितामीषत्यजत्यहिरिवत्वचं॥ इत्थंभू
तमतिश्शास्त्रगुरुसज्जनसेवया॥ सरहस्यमशेषेणयथा
वादधिगच्छति॥ असंसर्गाभिधामान्यांतृतीयांयोगभूमि
कां॥ ततःपतत्यसौकांतःपुष्पशय्यामिवामलां॥ यथावत्
शास्त्रवाक्यार्थेमतिमाधायनिश्चलां॥ तापसाश्रमविश्रांतै
रध्यात्मकथनक्रमैः॥ शिलाशय्यासनासीनोजरयत्यायु
रातत॥ वनावनिविहारे चित्तोपशमशोभिना॥ असंगसु

खसौख्येनकालंनयतिनीतिमान्॥ अभ्यासात्साधुशा
स्त्राणांकरणात्पुण्यकर्मणां॥ जंतोर्यथावदेवेयंवस्तुदृ
ष्टिःप्रसीदति॥ तृतीयांभूमिकांप्राप्यबुद्धोनुभवतिस्वयं॥
द्विप्रकारमसंसर्गंतस्यभेदमिमंशृणु॥ द्विविधोयमसंसर्ग
स्सामान्यश्श्रेष्ठएवच॥ नाहंकर्तानभोक्ताचनबाध्योनच
बाधकः॥ इत्यसज्जनमर्थेषुसामान्यासंगनामकं॥ प्राक्
कर्मनिर्मितंसर्वमीश्वराधीनमेववा॥ सुखंवायदिवादुःखंकै
वात्रतवकर्तृता॥ भोगाभोगामहारोगासंपदःपरमापदः॥

265/1406

अक्षन्युप० वियोगायोऽस्य संयोगा आध्येयाव्याध्येयाधियो॥ कालश्चका
४ लेनाद्युक्तः सर्वभावाननारतं॥ अनास्थयेतिभावानां यद
भावनमांतरं॥ वाक्यार्थलब्धमनसः सामान्यासावसंग
मः॥ अनेनक्रमयोगेन संयोगेन महात्मनां॥ नाहंकर्तेश्व
रः कर्ता कर्म वा प्राक्तनं मम॥ कृत्वा दूरतरे नूनमितिशब्दा
र्थभावनं॥ यन्मौनमानसं शांतं तश्चेष्टासंग उच्यते॥ संतो
षामोदमधुरं प्रथमोदितिभूमिका॥ भूमिप्रोदितमात्रांतरमृ ४
तं कुरिकेव सा॥ एषाहि परिमृष्टांतरन्यासां प्रसवैकभूमि

कां॥ द्वितीयां च तृतीयां च भूमिकां प्राप्नुयात्ततः॥ श्रेष्टा सर्वग 267/1920
तात्वेषा तृतीया भूमिका तद्धि॥ भवति प्रोत्थिताशेषसंकल्प
कलनः पुमान्॥ भूमिकात्रितयाभ्यासादज्ञाने क्षयमागते॥
समं सर्वत्र पश्यंति चतुर्थ्री भूमिकां गताः॥ अद्वैते स्थैर्यमायां
ते द्वैते च प्रथमं गते॥ पश्यंति स्वप्नवल्लोकाश्चतुर्थ्रीं भूमिकां ग
ताः॥ भूमिकात्रितयं जाग्रच्चतुर्थी स्वप्न उच्यते॥ चित्तं तु शरद
भ्रांशविलयं प्रविलप्यते॥ सत्तावशेष एवास्ति पंचमी भूमिकां
गतः॥ जगद्विकल्पो नोदेति चित्तस्यात्र विलापनात्॥ पंचमी

अक्षन्यु॰ भूमिकामेत्यसुषुप्तपदनामिकां॥ शांताशेषविशेषांशस्तिष्ठ
५ त्यद्वैतमात्रकः॥ गलितद्वैतनिर्भासो मुदितोंतःप्रबोधवान्॥ सु
षुप्तघनएवास्ते पंचमीभूमिकांगतः॥ अंतर्मुखतयातिष्ठन्ब
हिर्वृत्तिपरोधि सन्॥ परिश्रांततयानित्यंनिद्राकुरिवलक्ष्यते॥
कुर्वन्नभ्यासमेतस्यां भूमिकायांविवासनः॥ षष्ठींतुर्याभिधा
मन्यांक्रमात्पतातिभूमिकां॥ यत्रनासन्नसद्रूपः नाहंनाप्य
नहंकृतिः॥ केवलंक्षीणमननमास्तेद्वैतेतिनिर्भयः॥ निर्ग्रंथिशां ५
तसंदेहो जीवन्मुक्तिविभावनः॥ अनिर्वाणोपनिर्वाणश्चित्र

दीपइवस्थितः॥ षष्ठ्यांभूमावसौस्थित्वासप्तमींभूमिमाप्नुया 269/1430
त्॥ विदेहमुक्ततात्रोक्तासप्तमीयोगभूमिका॥ आगम्यावचसां
शांतासासीमासर्वभूमिषु॥ लोकानुवर्तनंत्यक्त्वात्यक्त्वादेहा
नुवर्तनं॥ शास्त्रानुवर्तनंत्यक्त्वा स्वाध्यापनयंकुरु॥ ॐकार
मात्रमखिलंविश्वप्राज्ञादिलक्षणं॥ वाच्यवाचकताभेदात्
भेदेनानुपलब्धितः॥ अकारमात्रंविश्वस्यादुकारस्तैजसस्मृ
तः॥ प्राज्ञोमकारइत्येवंपरिपश्येत्क्रमेणतु॥ सामाधिकाला
त्प्रागेवविचिंत्यादिप्रयत्नतः॥ स्थूलसूक्ष्मक्रमात्सर्वंचिदा

अक्षन्यु॰ त्मनि विलापयेत्॥ चिदात्मानं नित्यशुद्धबुद्धमुक्तसदद्वयः॥
६ परमानंदसंदेहो वासुदेवोहमोमिति॥ आदिमध्यावसानेषु
दुःखं सर्वमिदं यतः॥ तस्मात् सर्वं परित्यज्य तत्वनिष्ठो भवा
नघ॥ अविद्यातिमिरातीतं सर्वाभासविवर्जितं॥ आनंदमम
लं शुद्धं मनोवाचामगोचरं॥ प्रज्ञानघनमानंदं ब्रह्मास्मी
ति विभावयेदित्युपनिषत्॥ ॥इति अक्षन्युपनिषत् स ६
माप्तः॥ ॥शके १७५५ विजयनामसंवत्॥ ६ ॥

271
1910

॥अथ अध्यात्मोपनिषत्प्रारंभः॥

अध्यात्मउ० श्रीगणेशायनमः॥पूर्णमदइतिशांतिः॥ ॥अंतःशरीरे
१ निहितोगुहायामजएकोनित्यमस्यपृथिवीशरीरंयःपृथि
वीमंतरेसंचरन्यंपृथिवीनवेद॥यस्यापःशरीरंयोपोंतरेसं
चरन्यमापोनविदुः॥यस्यतेजशरीरंयोपोंतरेसंचरन्यमा
पोनविदुः॥यस्तेजोंतरेसंचरन्यंतेजोनवेद॥यस्यवायुःशा
रीरंयोवायुमंतरेसंचरन्यंवायुर्नवेद॥यस्याकाशश्शरीरंय
आकाशमंतरेसंचरन्यमाकाशंनवेद॥यस्यमनःशरीरं १
योमनोंतरेसंचरन्यंमनोनवेद॥यस्यबुद्धिश्शरीरंयोबुद्धि

मंतरेसंचरन्यंबुद्धिर्नवेद॥यस्याहंकारःशरीरंयोहंकारमं 273/1470
तरेसंचरन्यमहंकारंनवेद॥यस्याव्यक्तंशरीरंयोव्यक्तमं
तरेसंचरन्यमव्यक्तंनवेद॥यस्याक्षरंशरीरंयोक्षरमंतरे
संचरन्यमक्षरंनवेद॥यस्यमृत्युश्शरीरंयोमृत्युमंतरेसं
चरन्यंमृत्युर्नवेद॥सएषसर्वभूतांतरात्मापहतपाप्मादि
व्योदेवएकोनारायणः॥अहंममेतियोभावोदेहाक्षादावना
त्मनि॥अध्यासोयंनिरस्तव्योविदुषाब्रह्मनिष्ठया॥ज्ञात्वा
स्वंप्रत्यगात्मानंबुद्धितद्वृत्तिसाक्षिणं॥सोहमित्येवतद्वृत्त्या

स्वान्यत्रात्ममतिंत्यजेत्॥ लोकानुवर्तनंत्यक्त्वात्यक्त्वा
देहानुवर्तनं॥ शास्त्रानुवर्तनंत्यक्त्वा स्वाध्यासापनयंकुरु॥
स्वात्मन्येवसदास्थित्यामनोनश्यतियोगिनः॥ युक्त्याश्रुत्या
स्वानुभूत्याज्ञात्वासार्वात्म्यमात्मनः॥ निद्रायालोकवार्तया
शब्दादेरात्मविस्मृतेः॥ क्वचिंनावसरंदत्वाचिंतयात्मानमा
त्मनि॥ मातापित्रोर्मलोद्भूतंमलमांसमयंवपुः॥ त्यक्त्वाचं
डालवद्दूरंब्रह्मीभूयकृतीभव॥ घटाकाशमहाकाशइवात्मा
नंपरात्मनि॥ विलाप्याखंडभावेनतूष्णींभवसदामुने॥ स्वप्र

काशमधिष्ठानंस्वयंभूयसदात्मना॥ ब्रह्मांडमपिपिंडांडं
त्यज्यतांमलभांडवत्॥ चिदात्मनिसदानंदेदेहरूढामहं 321
धियं॥ निवेश्यलिंगमुत्सृज्यकेवलोभवसर्वदा॥ यत्रैषज 1970
गदाभासोदर्पणांतःपुरंयथा॥ तत्ब्रह्माहमितिज्ञात्वाकृत
कृत्योभवानघ॥ अहंकारग्रहान्मुक्तःस्वरूपमुपपद्यते॥
चंद्रवद्विमलःपूर्णःसदानंदस्स्वयंप्रभः॥ क्रियानाशात्भवे
च्चिंतानाशोस्माद्वासनाक्षयः॥ वासनाप्रक्षयोमोक्षःसजी
वन्मुक्तिरिष्यते॥ सर्वत्रसर्वतस्सर्वब्रह्ममात्रावलोकनं॥ स

अध्या॰३॰ तद्भावभावनादार्ढ्याद्वासनालयमश्नुते॥प्रमादोब्रह्मनिष्ठा
२ यांनकर्तव्यःकदाचन॥प्रमादोमृत्युरित्याहुःविद्यायांब्रह्म
वादिनः॥यथापकृष्टंशैवालंक्षणमात्रंनतिष्ठति॥आवृणोति
तथामायाप्राज्ञंवापिपराङ्मुखं॥जीवितोयस्यकैवल्यंविदे
होपिसकेवलः॥समाधिनिष्ठतामेत्यनिर्विकल्पोभवानघ॥
अज्ञानहृदयग्रंथेर्निःशेषविलयस्तथा॥समाधिनाविक
ल्पेनयदाद्वैतात्मदर्शनं॥अत्रात्मत्वंदृढीकुर्वन्अहमादिषु २
संत्यजन्॥उदासीनतयातेषुतिष्ठन्घटपटादिवत्॥ब्रह्मा

दिस्तंबपर्यंतंमृषामात्राउपाधयः॥ततःपूर्णंस्वमात्मानं
पश्येदेकात्मनास्थितं॥स्वयंब्रह्मास्वयंविष्णुःस्वयंशिवः॥
स्वयंविश्वमिदंसर्वंस्वस्मादन्यंनकिंचन॥स्वात्मन्यारोपि
ताशेषाभासवस्तुनिरासतः॥स्वयमेवपरंब्रह्मपूर्णमद्व
यमक्रियं॥असंकल्पोविकल्पोयंविश्वमित्येकवस्तुनि॥
निर्विकारेनिराकारेनिर्विशेषभिदाकुतः॥द्रष्टृदर्शनदृश्या
दिभावशून्येनिरामये॥कल्पार्णवइवात्यंतःपरिपूर्णेचिदा
त्मनि॥तेजसीवतमोयत्रविलीनंभ्रांतिकारणं॥अद्वि

323
1970

अध्यात्मउ· तीयेपरेतत्वेनिर्विशेषेभिदाकुतः॥ एकात्मकेपरेतत्वे भेदक
४ तीकथंवसेत्॥ सुषुप्तौसुखमात्रायांभेदःकेनावलोकितः॥
चित्तमूलोविकल्पोयंचित्ताभावेनकश्चन॥अतश्चित्तंसमा
धेहिप्रत्यक्‌रूपेपरात्मनि॥अखंडानंदमात्मानंविज्ञायस्व
स्वरूपितः॥बहिरंतस्सदानंदरसास्वादनमात्मनि॥वैरा
ग्यस्यफलंबोधोबोधस्योपरतिःफलं॥स्वानंदानुभवाशां
तिरेषैवोपरतेःफलं॥यद्युत्तरोत्तराभावेपूर्वरूपंतुनिष्फलं॥ ५
निवृत्तिःपरमातृप्तिरानंदोनुपमस्वतः॥मायोपाधिर्जगद्यो

निःसर्वज्ञत्वादिलक्षणः॥पारोक्ष्यशबलस्सत्याद्यात्मकस्त
त्पदाभिधः॥आलंबनतयाभातियोस्मत्प्रत्ययशब्दयोः॥
अंतःकरणसंभिन्नबोधस्सत्वंपदाभिधः॥मायाविद्येविहायै
वउपाधिपरजीवयोः॥अखंडंसच्चिदानंदंपरंब्रह्मविलक्ष्य
ते॥इत्थंवाक्यैस्तदर्थानुसंधानंश्रवणंभवेत्॥युक्त्यासंभा
वितत्वानुसंधानंमननंतुतत्॥ताभ्यांनिर्विचिकित्सेर्थेचे
तसःस्थापितस्यतत्॥एकतानत्वमेतद्धिनिदिध्यासनमुच्य
ते॥ध्यातृध्यानेपरित्यज्यक्रमाध्येयैकगोचरं॥निवातदीप

325/1970

अध्यात्म० दच्छिन्नं समाधिरभिधीयते॥ इत्नयस्तुतदानीमप्यज्ञाता आ
५ त्मगोचराः॥ स्मरणादनुमीयंते व्युत्थितस्य समुत्थिताः॥ अ
नादाविह संसारे संचिताः कर्मकोटयः॥ अनेन विलयं यांति
शुद्धो धर्मो विवर्द्धते॥ धर्ममेघमिमं प्राहुः समाधिं योगवित्त
माः॥ वर्षत्येष यथा धर्मामृतधाराः सहस्रशः॥ अमुना वा
सनाजाले निश्शेषं प्रविलापिते॥ समूलोन्मूलि पुण्यपा
पाख्ये कर्मसंचये॥ वाक्यमप्रतिबद्धं सत् प्राक् परोक्षावभा ५
सते॥ करामलकवद् बोधमपरोक्षं प्रसूयते॥ वासनानु

दयो भोग्ये वैराग्यस्य तथावधिः॥ अहंभावोदयाभावो
बोधस्य परमावधिः॥ लीनवृत्तेरनुत्पत्तिः मर्यादापरदोस्तु
सा॥ स्थितप्रज्ञो यतिरयः यस्सदानंदमश्नुते॥ ब्रह्मण्येव
विलीनात्मा निर्विकारो विनिष्क्रियः॥ ब्रह्मात्मनोः शोधि
तयोरेकभावावगाहिनी॥ निर्विकल्पा च चिन्मात्रा वृत्तिः प्र
ज्ञेति कथ्यते॥ सा सर्वदा भवेद्यस्य स जीवन्मुक्त इष्यते॥ देहें
द्रियेष्वहंभाव इदंभावस्तदन्यके॥ यस्य नो भवतः क्वापि स
जीवन्मुक्त इष्यते॥ न प्रत्यक् ब्रह्मणो भेदं कथापि ब्रह्मसर्ग

327
1970

अध्यात्मउ· योः॥प्रज्ञयायोविजानातिसजीवन्मुक्तइष्यते॥साधुभिःपू
६ ज्यमानेस्मिन्पीड्यमानेपिदुर्जनैः॥समभावोभवेद्यस्यसजी
वन्मुक्तइष्यते॥विज्ञातब्रह्मतत्वस्ययथापूर्वंनसंसृतिः॥अ
स्तिचेंनसविज्ञातब्रह्मभावोबहिर्मुखः॥सुखाद्यनुभवोया
मि वत्तावत्प्रारब्धंइष्यते॥फलोदयःक्रियापूर्वोनिष्क्रियोन
हिकुत्रचित्॥अहंब्रह्मेतिविज्ञानात्कल्पकोटिशतार्जितं॥
संचितंविलयंयातिप्रबोधात्स्वप्नकर्मवत्॥स्वप्नसंगमुदा ६
सीनंपरिज्ञायनभोयथा॥नशिष्यतेयतिःकिंचित्कदाचित्

भाविकर्मभिः॥नन्नभोघटयोगेनसुरागंधेनलिप्यते॥तथा
त्मोपाधियोगेनतद्धर्मैर्नैवलिप्यते॥ज्ञानोदयात्पुरारब्धंक
र्मज्ञानान्ननश्यति॥अदत्वास्वफलंलक्ष्यमुद्दिश्योत्सृष्ट
बाणावत्॥व्याघ्रबुध्याविनिर्मुक्तोबाणःपश्चात्तुगोमतौ॥न
तिष्ठतिभिनत्त्येवलक्ष्यंवेगेननिर्भरं॥अजरोस्म्यमरोस्मी
तियआत्मानंप्रपद्यते॥तदात्मनातिष्ठतोस्यकुतःप्रारब्ध
कल्पना॥प्रारब्धंसिध्यतितदायदादेहात्मनास्थितिः॥देहा
त्मभावोनैवेष्टःप्रारब्धंत्यजतामतः॥प्रारब्धकल्पनाप्य

329
1470

अध्या·उ· स्यदेहस्यभ्रांतिरेषहि॥अध्यस्तस्यकुकुतस्सत्वमसत्यस्य
७ कुतोजनिः॥अजातस्यकुतोनाशः प्रारब्धमसतः कुतः॥ज्ञा
नेनाज्ञानकार्यस्यसमूलस्यलयोयदि॥तिष्ठत्ययंकथंदेह
इतिशंकावतोजडान्॥समाधातुंबाह्यदृष्ट्याप्रारब्धंवदति
श्रुतिः॥नतुदेहादिसत्यत्वबोधनायविपश्चितां॥परिपूर्णम
नाद्यंत ‾ प्रमेयमविक्रियं॥सत्घनंचित्घनंनित्यंआनं
दघनमव्ययं॥प्रत्यगेकारसंपूर्णमनंतंसर्वतोमुखं॥अहेय ७
मनुपादेयमनाधेयमनाश्रयं॥निर्गुणंनिष्क्रियंसूक्ष्मंनि

र्विकल्पंनिरंजनं॥अनिरूप्यस्वरूपयन्मनोवाचामगोचरं 331
॥सत्समृद्धंस्वतस्सिद्धंशुद्धंबुद्धमनीदृशं॥एकमेवाद्वयंब्र 1940
ह्मनेहनानास्तिकिंचन॥स्वानुभूत्यास्वयंज्ञात्वास्वमात्मा
नमखंडितं॥ससिद्धिस्ससुखंतिष्ठनिर्विकल्पात्मनात्मनि
॥क्वगतंकेनवानीतंकुत्रलीनमिदंजगत्॥अधुनैवमयादृ
ष्टंनास्तिकिंमहदद्भुतं॥किंहेयंकिमुपादेयंकिमन्यत्किं
विलक्षणं॥अखंडानंदपीयूषपूर्णब्रह्ममहार्णवे॥नकिं
चिदत्रपश्यामिनशृणोमिनवेद्म्यहं॥स्वात्मनैवसदानंद

रूपेणास्मि स्वलक्षणः॥असंगोहमनंगोहमलिंगोहमहंह
रिः॥प्रशांतोहमनंतोहंपरिपूर्णश्चिरंतनः॥अकर्ताहमभो
क्ताहमविकारोहमव्ययः॥शुद्धबोधस्वरूपोहंकेवलोहंस
दाशिवः॥एतांविद्यामपांतरतमायददौ॥अपांतरतमोब्र
ह्मणददौ॥ब्रह्मागोरांगिरसेददौ॥घोरांगिरारैक्कायददौ॥
रैक्कारामायददौ॥रामस्सर्वेभ्योभूतेभ्योददानित्येतंनिर्वा
णानुशासनंवेदानुशासनमित्युपनिषत्॥ ७ ॥इतिअ
ध्यात्मोपनिषत्समाप्तः॥ ७ ॥शके १७५५ विजय॥

275/1920

॥राम अथमैत्रायणीयउपनिषत्प्रारंभः॥

143282

मैत्रायणी श्रीगणेशायनमः॥ आप्यायंत्विति शांतिः॥ मैत्रायणीकौषी पउ.
१ तकीबृहज्जाबालतापिनी॥ कालाग्निरुद्रमैत्रेयोसुबालक्षुरि
मंत्रिका॥ बृहद्रथोवैनामराजाराज्येज्येष्ठंपुत्रंनिधापयित्वेद
मशाश्वतंमन्यमानः शरीरंवैराग्यमुपेतोरण्यंनिर्जगामसतत्र
परमंतपआस्थायादित्यमीक्षमाणऊर्ध्वबाहुस्तिष्ठत्यंतेसहस्र
स्यमुनेरंतिकमाजगामाग्निरिवाधूमकस्तेजसानिर्दहंनिवात्म १
वित्भगवांश्छाकायन्यउत्तिष्ठोत्तिष्ठवरंवृणीष्वेतिराजानमब्रवी

त्सतस्मैतेनमस्कृत्योवाचभगवंनाहमात्मवित्वंतत्त्ववित्श्रुणु 274/1970
मोवयंसत्वंनोब्रूहीत्येतद्वृत्तंपुरस्तादशक्यंमापृच्छप्रश्नमैक्ष्वाका
न्यान्कामान्वृणीष्वेतिशाकायन्यशिरसास्यचरणावभिमृश
नै मानोराजेमांगाथांजगाद॥ १ ॥भगवन्नस्थिचर्मस्नायुमज्जा
मांसशुक्रशोणितश्लेष्माश्रुदूषिकाविण्मूत्रवातपित्तकफसंघा
तेदुर्गंधेनिःसारेकिंकामोपभोगैः॥ २ ॥कामक्रोधलोभमोह
भयविषादेर्ष्येष्टवियोगानिष्टसंप्रयोगक्षुत्पिपासाजरामत्य

मैत्रायणी रोगशोकाद्यैरभिहतेस्मिन्शरीरेकिंकामोपभोगैः॥ ३ ॥सर्वंचे यउप॰
२ दंक्षयिष्णुपश्यामोयथेमेदंशमशकादयस्तृणवन्नश्यतयोद्भूतप्रध्वं
सिनः॥ ४ ॥अथकिमेतैर्वापरेन्येमहाधनुर्धराश्चक्रवर्तिनःकेचि
त्सुद्युम्नभूरिद्युम्नेंद्रद्युम्नकुवलयाश्वयवनाश्ववध्रियाश्वाश्वपति
शशिबिंदुर्हरिश्चंद्रांबरीषानाक्तुस्वयातियेयातिरनरण्योक्षसेना
दयोथमरुत्तभरतप्रभृतयोराजानोमिषतोबंधुवर्गस्यमहतींश्रि २
यंत्यक्त्वास्माल्लोकादमुंलोकंप्रयांति॥ ५ ॥अथकिमेतैर्वापरेन्ये

गंधर्वासुरयक्षराक्षसभूतगणपिशाचोरगग्रहादीनांनिरोधनं 279
पश्यामः॥ ६ ॥अथकिमेतैर्वान्यानांशोषणंमहार्णवानांशि
खरिणांप्रपतनंध्रुवस्यप्रचलनमस्थानंवातरूणांनिमज्जनंपृ 1970
थिव्याःस्थानादपसरणंसुराणांसोहमित्येतद्विधेस्मिन्संसा
रेकिंकामोपभोगैर्यैरेवाश्रितस्यासकृदावर्तनंदृश्यतइत्युद्धर्तुम
र्हसीत्यंधुदपानस्थोभेकइवाहमस्मिन्संसारेभगवन्स्त्वंनोग
तिस्त्वंनोगतिरिति॥ ७ ॥प्रथमःप्रपाठकः॥ ॥भगवन्शाका

मैत्रायणी यन्यस्सुप्रीतोब्रवीद्राजानंमहाराजबृहद्रथेक्ष्वाकुवंशध्वजशी पउ॰
२ घ्रात्मज्ञः कृतकृत्यस्त्वंमरुंनाम्नोविश्रुतोसीत्यत्ययंवावखल्वात्मा
तेकतमोभगवान्सइतितंहोवाचेति॥ १ ॥यएषोच्छ्वासावष्टं
भनेनोर्ध्वमुत्क्रांतोव्यथमानोव्यथमानस्तमःप्रणुदत्येषआत्मे
त्याहभगवानथयएषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्यो
तिरुपसंपद्यस्वेनरूपेणाभिनिष्पद्यतएषआत्मेतिहोवाचएतद ३
मृतमभयमेतद्ब्रह्मेति॥ २ ॥अथखल्वियंब्रह्मविद्यासर्वोपनि

य सर्वत्र चतुर्थ स्वरा मंद्रस्वराश्च प्रस्तावा चतुर्थ मंद्रातिस्वार्या
स्वराश्च भवंति प्रथमस्वराश्च द्वितीयस्वराश्च प्रथमाद्वितीयत्वाति

379
1970

संहि॰ ३ यस्वराश्चभवंतिरथंतरेन्वक्षरंभकारान्स्वरवंतिव्यंजनानियथा
क्षरंदर्शयेत्तद्यथास्वरेणसर्वाणिव्यंजनानिव्याप्तान्येवंसर्वान्का
मानवाप्नोतियश्चैवंवेदयस्यैतस्वरवंतःप्रयुज्यंतेयश्चैवंविद्वान्
प्रयुज्यंतेयथाथचाग्निचंद्रसूर्याभास्वंतोपहततमस्कास्तद्दुद्गा
तृयजमानौभवतएवंग्रात्याहभात्यग्निर्भातिचंद्रभातिसूर्योभा
तिज्योतींषिभातिरथंतरमितिभकाराणामेवदीप्तंदर्शयतिस्वर
वतांरथंतरस्यस्तोभानांस्वरवंतप्रयोक्तव्याइतियत्रतुव्यंजनवंतः ३
प्रयुज्येरन्रक्षोधुकावेवध्याइनावप्रजसांद्दृद्गातृयजमानोस्या
तांतस्मादन्वक्षरंप्रयुंजानस्वरवंतिव्यंजनानियथाक्षरंदर्शयेत् २॥

/

अथैतेआनुदेशिक्यासंहितयाज्यनकर्मणाचरिताभवतांततो
निधनसामान्यदंतस्साभिकानिनिधनानिसंप्रसारयंतिचतु
र्थोदात्ततमान्स्वरान्ध्यंतरानहृहंतिप्राग्रुपायान्चत्समानपुरु
षवचनेतृतीयप्रभृतीनामुदात्ततमःकश्चित्स्वराभवतितमुद्
हइत्याचक्षतेतथाचयशोक्तियत्तरण्येगेयंचाधीमहग्रामगेयं
चलांगलानामवैकेवक्रुक्रमनुदात्तनुदात्तंचानुदात्तमहट्ठूट्
हूंचाहट्ठूप्रकृष्टकृष्टंचाक्रुष्टमित्येवंस्ताभ्यतमंभवत्यथापिया
ज्ञिकायशेयुक्ताअनुदिशंत्यदात्तानुदात्तयोरुदात्तंसंवतट्
हाहट्ठयोरथ्यंकृष्टाकृष्टयोरक्रुष्टमित्येवंस्ताभ्यतमंभवति

401
1970

अथैते आनुदेशिक्यो संहितयाज्येनकर्मणाचरिताभवंतीततो
निधनसामान्यदंतस्सामिकानिनिधनानिसंप्रसारयंतिचतु
र्थोदात्ततमान्स्वरान्ध्यंतरानहृहंतिप्रागुपायांनचत्समानपुरु
षवचनेत्तृतीयप्रभृतीनामुदात्ततमः कश्चित्स्वराभवतितमुह्
हइत्याचक्षतेतथाचयशेक्रियतेतरण्येगेयंचाधीमहेग्रामगेयं
चलांगलानामवैकेबकुक्कमनुदात्तनुदात्तंचानुदात्तेमहर्दुहे
र्दुंचाहर्दुःप्रकृष्टकृष्टंचाकृष्टमित्यवंस्ताव्यतमंभवत्यथापिया
ज्ञिकायशेयुक्ता अनुदिशांत्कदात्तानुदात्तयोरुदात्तंसेवतह
द्वाहृद्वयोरहृत्थंकृष्टाकृष्टयोरकृष्टमित्यवंस्ताव्यतमंभवति

U01 / 1970

संहि॰ विद्याहवैब्राह्मणमाजगामतवाहमस्मित्वमापालयस्वाहान
४ हितेमांतिनेनैवमादागोपायमाश्रेयसेतेहमहमस्मीतिविद्यया
सोधियतनविद्यामृषरेवपतब्रह्मचारीधनदायीमेधावीश्रोत्रि
यःप्रियाविद्ययावाविद्यांयःप्राहत्तानितीर्थानिषण्णमेत्यथैष
आर्चिकोनिगदोभवतियआतृणोत्यवितथेनकर्णावतृत्तं
कुर्वन्नमृतंसंप्रयच्छंऽस्तमन्येतपितरंमातरंचतस्मैनद्रुह्येत्
कृतमस्यनाहग्निशिवकांसंदहतिब्रह्मपृष्ठमनादृतंतस्मैब्रह्मन
प्रब्रूयातछक्यभामकुर्वततिसंसिध्यिमपिगच्छेतविद्यासहत्रा ४
नवांनत्वनामसतदद्यातमतश्चनविमानयदित्यथेतावदस्याष्टा

उपनिषदोभवंतिविनिश्चोपसत्पश्वदमश्चाश्रद्धाचसंपृश्यश्चा
नाकाशीकरणंचयोगश्चाचार्यगुरुशुश्रूषाचेतितदेतत्कोरुंडे
र्वचनंवेदयंतेत्रिभिःपर्यायैर्यःसंपूर्णंपश्यतिश्छंदस्त्रोदेवतातो
निगमनइतिसमंत्रदर्शीभवत्यथयएतैर्यस्संपूर्णंपश्यतिसगा
थादर्शीभवतितिखल्विमएवमेवपूर्वैराचार्यैःप्रोक्ताधर्माःप्रोक्ता
धर्माः॥ २ ॥दानेनसर्वान्कामानवाप्नोतिचिरजीवित्वंब्रह्मचा
रीरूपवानहिंऽस्वोपपद्यतेस्वर्ग्यंपर्णाशनाद्दिविचरःपयोभक्ष
स्थानवीरासनाविन्नवान्पितृमातृगुरुशुश्रूषाध्यानवान्स्वर्गी
यःकांचनदातायावान्नुवैरसस्नावानात्मासएषइवएवलोकादयं

403/1970

संहि॰ सलोकस्सं प्रतिष्ठितइवभवति प्रतिष्ठितइवत्ध्येवं लोकोथयदुत्तरंसा
५ द्यौमूर्तिमत्स्वगृहेष्वभिजायतेत्रीण्याकुरतिदानानिगावःपृथ्वीसरस्व
तीनरकादुद्धरंत्येतेजपध्रंपनदोहनात्स्पर्शनात्षट्भागंकरकंयः
प्रयच्छतिअपिपासितश्चम्रियतेसोमपश्चाभिजायतेसोमपश्चाभिजा
येत॥ ४ ॥अथहिरण्यमेवापःकनकोभवतिसहस्रंलभतेथैषा
यजनीयेहनिसप्तश्छंदाद्वेषाग्निरुपसमाहिताभवतिब्रह्मचारीभै
क्षंचरतिनिर्विघ्नंलभतेतिष्ठंत्यहःशेषाभवतिव्रतमितिसारस्वतमेनं
प्रजापतिमपृच्छत्पृच्छामित्वामीतिवामितिवासर्वत्रदाप्रतिग्रहःसो ५
मयाज्यपूतोभवतिसखलुतएतंप्रजापतिर्वाइदमेकमंनमक्षिता

/

संहि॰ युःपुरुषोवाचमीश्वरोभिजायतेनाकाशीकरणंचचतुर्भिश्चोभव
६ तियएवंवेदयएवंवेद॥ ५ ॥संहितोपनिषत्समाप्तं॥ ॥ ६

405/1970

॥इति संहितोपनिषत्समाप्ता॥

॥अथ श्रारभोपनिषत् प्रारंभः॥

407
1970

श्रीगणेशायनमः॥ भद्रंकर्णेभिरितिशांतिः॥ अथहैनंपैप्पला
दाब्रह्मर्षयमुवाच॥ भोभगवन्ब्रह्मविष्णुरुद्राणांमध्येकोवाअ
धिकतरध्येयस्यात्तत्त्वमेवनोब्रूहीति॥ तस्मैसहोवाच॥ पि
तामहश्चहेपैप्पलादश्रुणुवाक्यमेतत्॥ बहुनिपुण्यानिकृता
नियत्रनैवलभ्यःपरमेश्वरोसौ॥ यस्यांगजोहंहरिरुद्रमुख्याः
मोहानगानंतिसुरेंद्रमुख्याः॥ प्रभुंवरेण्यंपितरंमहेशंयोब्र
ह्माणंविदधातितस्मै॥ वेदांश्चसर्वान्प्रहिणोतिचाग्र्यंतंवै ॥१॥
प्रभुंपितरंदेवतानां॥ ममापिविष्णोर्जनकंदेवमीड्यंयोंत

कालेसर्वलोकान्संजहार॥ सएकश्रेष्ठश्चपरिष्ठश्च॥ योघो
रंवेषमास्थायशरभाख्यंमहेश्वरः॥ नृसिंहंलोकहंतारंसंज
घानमहाबलः॥ हरिंहरंतंपादाभ्यांअनुयांतिसुरेश्वराः॥ मा
वधीःपुरुषंविष्णुंविक्रमस्त्वमहानसि॥ कृपयाभगवान्विष्णुं
विददारनखैःखरैः॥ चर्मांबरोमहावीरोवीरभद्रोबहूवह॥ स
एकोरुद्रोध्येयःसर्वेषांसर्वसिद्धये॥ योब्रह्मणःपंचरुद्रहंता त
स्मैरुद्रायनमोअस्तु॥ योविस्फुलिंगेनललाटजेनसर्वंजगत्भ
स्मसात्करोति॥ पुनश्चसृष्ट्वापुनरप्यरक्षादेवंस्वतंत्रंप्रकटीक

409/1970

शरभउ॰

रोति॥तस्मैरुद्रायनमोअस्तु॥योवामपादेनजघानकालंघोरंप
पेपहालाहलदहंतं॥तस्मैरुद्रायनमोअस्तु॥योवामपादार्चित
विस्नुनेत्रस्तस्मैददौचक्रमतीवहृष्टः॥तस्मैरुद्रायनमोअस्तु॥योद
क्षयज्ञेसुरसंघान्विजित्यविस्नुंबबंधोरगपाशेनवीरः॥तस्मैरु
द्रायनमोअस्तु॥योलीलयैवत्रिपुरंददाहविस्नुंकविंसोमसूर्या
ग्निनेत्रः॥सर्वेदेवाःपशुतामवापुःस्वयंतस्मात्पशुपतिर्बभूव
तस्मैरुद्रायनमोअस्तु॥योमत्स्यकूर्मादिवराहसिंहान्विस्नुंक्र ॥७॥
मंतंवामनमादिविस्नुं॥विविल्सीवंपीडयमानंसुरेशंभस्मीकृत्य

मन्मथंयमंच॥तस्मैरुद्रायनमोअस्तु॥एवंप्रकारेणबहुधाप्रतु
ष्ट्वाक्षमापयामासुःनीलकंठंमहेश्वरं॥तापत्रयसमुद्भूतंजन्मम
त्युजरादिभिः॥नानाविधानिदुःखानिजहारपरमेश्वरः॥एवमं
गीकरोच्छिवःप्रार्थनंसर्वदेवानां॥शंकरोभगवानाद्योररक्षसक
लाःप्रजाः॥पादांभोरुहद्वंद्वमर्च्यतेविस्नुनासह॥स्तुत्वास्तुत्वंमहे
शानमवाङ्मनसगोचरं॥भक्त्यानंम्रतनोर्विस्नोःप्रसादमकरो
द्विभुः॥यतोवाचोनिवर्तंतेअप्राप्यमनसासह॥आनंदंब्रह्म
णोविद्वान्नबिभेतिकदाचनेति॥अणोरणीयान्महतोमहीया

411/1970

नात्मागुहायांस्पजंतोर्निहितोगुहायां॥तमक्रतुंपश्यतिवीतशो॰
कोधातुःप्रसादान्महिमानमीशं॥वसिष्ठवैयासिकवामदेव वि॰
रिंचिमुख्यैःहृदिभाव्यमानः॥सनत्सुजातादिसनातनाद्यैरी॰
ड्योमहेशोभगवानादिदेवः॥सत्योनित्यस्सर्वसाक्षीमहेशोनि॰
त्यानंदोनिर्विकल्पोनिराख्यः॥अचिंत्यशक्तिर्भगवान्गिरीशः
स्वाविद्ययाकल्पितमानभूयः॥अतिमोहकरीमायाममविस्मो॰
श्वसुप्रत॥तस्यपादांबुजध्यानात्दुस्तरासुसराभवेत्॥विष्णु॰ ॥२॥
र्विश्वजगद्योनिस्वाशांभूतैस्सवैस्सह॥ममांशसंभवोभूत्वापा॰

लयत्यखिलंजगत्॥विनाशंकालतोयातितनोन्यत्सकलंमृषा
तस्मैमहाग्रासायमहादेवायशूलिने॥महेश्वरायमृडायत॰।
स्तु॥एकोविष्णुर्महद्भूतं॰व्ययः॥चतुर्भिश्चचतुर्भिश्चद्वाभ्यां
पंचभिरेवच॥हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदतु॥ब्रह्मार्पणं
ब्रह्महविब्रह्माग्नौब्रह्मणाहुतं॥ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमा
धिना॥शराजीवास्तदंगेषुभाविनित्यंहरिस्वयं॥ब्रह्मैवशरभस्सा
क्षात्मोक्षदोयंमहामुने॥मायावशादेवदेवामोहितामम ता॰
रिभिः॥तस्यमाहात्म्यलेशांशुवक्तुंकेनाप्यशक्यते॥परात्परत

413
1970

रंब्रह्म यत्परात्परतो हरिः॥ तत्परात्परतो धीशस्तस्मात्तुल्यो ऽ
धिकोनहि॥ एकएवशिवो नित्यस्ततोन्यत्सकलंमृषा॥ तस्मा
त्सर्वान्परित्यज्य ध्येयान्विष्ण्वादिकान्सुरान्॥ शिवएवसदा
ध्येयस्सर्वसंसारमोचकः॥ तस्मैमहाग्रासाय महेश्वराय नमः
पैप्पलादंमहाशास्त्रंनदेयंयस्यकस्यचित्॥ नास्तिकायकृत
घ्नाय दुर्वृत्ताय दुरात्मने॥ दांभिकाय नृशंसाय शठायानृतभा
षिणे॥ सुव्रताय सुभक्ताय सुवृत्ताय सुशीलिने॥ गुरुभक्ताय ॥४॥
शांताय दांताय ऋजुमानसे॥ शिवभक्ताय दातव्यं ब्रह्मकल्पो

क्तधीमते॥ स्वभक्तायैवदातव्यं अकृतघ्नाय सुव्रत॥ नदातव्यं स
दा गोप्यं यत्नेनैव द्विजोत्तम॥ एतत्पैप्पलादं महाशास्त्रं योधी
ते श्रावयेद्द्विजः॥ सजन्ममरणेभ्यो मुक्तोभवति॥ गर्भवासाद्विमु
क्तोभवति॥ सुरापानात्पूतोभवति॥ स्वर्णस्तेयात्पूतोभवति
ब्रह्महत्यायात्पूतोभवति॥ गुरुतल्पगमनात्पूतोभवति॥ सस
र्वान्वेदानधीतोभवति॥ ससर्वदेवाध्यातोभवति॥ ससमस्तपा
तकोपपातकात्पूतोभवति॥ तस्मादविमुक्तमाश्रितोभवति
सततंशिवप्रियोभवति॥ सशिवसायुज्यमेति॥ नसपुनरावर्त

415/1970

तेनसपुनरावर्त्तते॥ ॥इत्याहभगवान्ब्रह्मेत्युपनिषत्॥ ॥
भद्रंकर्णेभिरितिशांतिः॥ इतिशरभोपनिषत्समाप्तः॥ छ॥

॥५॥

417/1970

419
1970

श्रीगणेशायनमः॥श्रीमद्रामचंद्रायनमः॥मुक्तिकोपनिष
त्॥ॐपूर्णमदइतिशांतिः॥अयोध्यानगरेरम्येरत्नमंडप
मध्यमे॥सीताभरतसौमित्रिशत्रुघ्नाद्यैःसमन्वितं॥सनका
द्यैर्मुनिगणैर्वसिष्ठाद्यैःशुकादिभिः॥अन्यैर्भागवतैश्चा
पिस्तूयमानमहर्निशं॥धीविक्रियासहस्राणांसाक्षिणंनि
र्विकारिणं॥स्वरूपध्याननिरतंसमाधिविरमेहरिं॥भक्त्या
शुश्रूषयारामंस्तुवन्प्रपच्छमारुतिः॥रामत्वंपरमात्मासि
सच्चिदानंदविग्रहः॥इदानींत्वांरघुश्रेष्ठप्रणमामिमुहुर्मु

401/1920

मुक्ति० कुर्वंत्वद्रूपंतांतुमिछामितत्त्वतोराममुक्तये॥ अनायासेनये
नाहंमुच्येयभवबंधनात्॥ कृपयावदमेरामयेनमुक्तोभवा
म्यहं॥ साधुपृष्टंमहाबाहोवदामिशृणुतत्त्वतः॥ वेदांतेसुप्र
तिष्ठोहंवेदांतंसमुपाश्रय॥ वेदांताःकेरघुश्रेष्ठवर्त्तंतेकुत्र
तद्वद॥ हनुमन्शृणुवक्ष्यामिवेदांतस्थितिमंजसा॥ निश्वा
सभूतामेविष्णोर्वेदाजातासुविस्तराः॥ तिलेषुतैलवद्वेदे
वेदांतःसुप्रतिष्ठितः॥ रामवेदाःकतिविधाःतेषांशाखाः ॥१॥
श्चराघव॥ तासूपनिषदःकास्युःकृपयावदतत्त्वतः॥ ऋ

ग्वेदादिविभागेनवेदाश्चत्वारईरिताः॥ तेषांशाखात्वनेका
स्युस्तासूपनिषदस्तथा॥ ऋग्वेदस्यतुशाखास्युरेकविंशति
संख्यया॥ नवाधिकशतंशाखायजुषोमारुतात्मज॥ सहस्र
संख्ययाजाताःशाखाःसाम्नःपरंतप॥ अथर्वणस्यशाखाः
स्युःपंचाशद्भेदतोहरे॥ एकैकस्यास्तुशाखायाएकैकोपनि
षन्मता॥ तासामेकामृचंयेनपठ्यतेभक्तितोमयि॥ समत्सा
युज्यपदवींप्राप्नोतिमुनिदुर्लभां॥ रामकेचिन्मुनिश्रेष्ठामु
क्तिरेकेतिचक्षिरे॥ केचित्त्वन्नामभजनात्काश्यांतारोपदेश

423/1970

नः॥ अन्ये तु सांख्ययोगेन भक्तियोगेन चापरे॥ अन्ये वेदांत
वाक्यार्थविचारात्परमर्षयः॥ सालोक्यादिभागेन चतुर्धा मु
क्तिरीरिता॥ सहोवाच श्रीरामः॥ कैवल्यं मुक्तिरेकैकपार
मार्थिकरूपिणी॥ दुराचाररतो वापि मन्नामभजनात्कपे
सालोक्यमुक्तिमाप्नोति नत्तु लोकांतरादिकं॥ काश्यां तु ब्र
ह्मनालेऽस्मिन्मृतो मत्तारमाप्नुयात्॥ पुनरावृत्तिरहिता
मुक्तिं प्राप्नोति मानवः॥ यत्र कुत्रापि वा काश्यां मरणे समहे ॥२॥
श्वरः॥ जंतोर्दक्षिणकर्णे तु मत्तारं समुपादिशत्॥ निर्धूता

शेषपापौघो मत्सारूप्यं भजत्ययं॥ सैव सालोक्यसामीप्यमु
क्तिरित्यभिधीयते॥ सदाचाररतो भूत्वा द्विजो नित्यमनन्यधीः
मयि सर्वात्मके भावो मत्सामीप्यं भजत्ययं॥ सैव सालोक्यसा
रूप्यसामीप्यामुक्तिरिष्यते॥ गुरूपदिष्टमार्गेण ध्यायन्मद्रू
पमव्ययं॥ मत्सायुज्यं द्विजः सम्यक् भजेद्भ्रमरकीटवत्॥ सै
व सायुज्यमुक्तिः स्यात् ब्रह्मानंदकरी शिवा॥ चतुर्विधा च या मु
क्तिर्मदुपासनया भवेत्॥ इयं कैवल्यमुक्तिस्तु केनोपायेन
सिध्यति॥ मांडूक्यमेकमेवालं मुमुक्षूणां विमुक्तये॥ तथाप्य

425
1920

सित्थंचेतत्त्वानंदशोपनिषदंपठन्॥ ज्ञानंलब्धाचिरादेवमा॰
मकंधाममयास्यसि॥ तथापिदृढतानोचेद्विज्ञानस्यांजनीसुत
द्वात्रिंशाख्योपनिषदःसमभ्यस्यनिवर्तय॥ विदेहमुक्तिविर
लाचेदष्टोत्तरशतंपठन्॥ तासांक्रमंसशांतिंचशृणुवक्ष्या॰
मितत्त्वतः॥ ईशकेनकठप्रश्नमुंडमांडूक्यतित्तिरिः॥ ऐतरेयंच
छांदोग्यंबृहदारण्यकंतथा॥ ब्रह्मकैवल्यजाबालश्वेताश्वोहं
सआरुणिः॥ गर्भोनारायणोहंसोबिंदुर्नादशिरःशिखा॥ मैत्रा ॥२॥
यणीकौषतकीबृहज्जाबालतापिनी॥ कालाग्निरुद्रमैत्रेयसु

बालक्षुरिमंत्रिका॥ सर्वसारंनिरालंबंरहस्यंवज्रसूचिकं॥
तेजोनादध्यानविद्यायोगतत्त्वात्मबोधकं॥ परिव्राट्त्रिशि
खीसीताचूडानिर्वाणमंडलं॥ दक्षिणाशरभंस्कंदंमहाना
रायणाद्वयं॥ रहस्यंरामतपनंवासुदेवंचमुद्गलं॥ शांडिल्यं
पैंगलंभिक्षुमहच्छारीरकंशिखा॥ तुरीयातीतसन्यासपरि
व्राजाक्षमालिका॥ अव्यक्तैकाक्षरंपूर्णासूर्याक्ष्यध्यात्मकुंडि
का॥ सावित्र्यात्मापाशुपतंपरंब्रह्मावधूतकं॥ त्रिपुरातपनं
देवीत्रिपुराकठभावना॥ हृदयंकुंडलीभस्मरुद्राक्षगणद

427/1970

मुक्ति॰

र्शनं॥तारसारमहावाक्यपंचब्रह्माग्निहोत्रकं॥गोपालतप
नंकृष्णंयाज्ञवल्क्यंवराहकं॥शाट्यायनीहयग्रीवंदत्तात्रेयं
चगारुडं॥कलिजाबालिसौभाग्यरहस्यऋचमुक्तिका॥एव
मष्टोत्तरशतंभावनात्रयनाशनं॥ज्ञानवैराग्यदंपुंसांवास॰
नात्रयनाशनं॥पूर्वोत्तरेषुविहिततत्तच्छांतिपुरःसरं॥वेद॰
विद्याव्रतस्नातदेशिकस्यमुखात्स्वयं॥गृहीत्वाष्टोत्तरशतं
येपठंतिद्विजोत्तमाः॥प्रारब्धक्षयपर्यंतंजीवन्मुक्ताभवंति ॥४॥
ते॥ततःकालवशादेवप्रारब्धेतुक्षयंगते॥वैदेहीमामकीं॰

मुक्तिंयांतिनास्त्यत्रसंशयः॥सर्वोपनिषदांमध्येसारमष्टोत्त
रशतं॥सकृच्छ्रवणमात्रेणसर्वाघौघनिकृंतनं॥मयोपदिष्टं
शिष्यायतुभ्यंपवननंदन॥इदंशास्त्रंमयादिष्टंगुह्यमष्टोत्त
रशतं॥ज्ञानतोज्ञानतोवापिपठतांबंधमोचकं॥राज्यंदेयंध
नंदेयंयाचतःकामपूरणं॥इदमष्टोत्तरशतंनदेयंयस्यकस्य
चित्॥नास्तिकायकृतघ्नायदुराचाररतायवै॥मद्भक्तिविहि॰
नायावैशास्त्रगर्तेषुमुह्यते॥गुरुभक्तिविहीनायदातव्यंनक
दाचन॥सेवापरायशिष्यायहितपुत्रायमारुते॥मद्भक्तायसु

429
1970

शीलाय कुलीनाय सुमेधसे॥ सम्यक्परीक्ष्य दातव्यं एवमष्टोत्तरं
शतं॥ यः पठेच्छृणुयाद्वापि समामेति न संशयः॥ तदेतदृचाभ्यु
क्तं विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिष्टेहमस्मि॥ अ
सूयकायानृजवे शठाय न मा ब्रूया द्वीर्यवती तथा स्यां॥ यमेव षवि
द्याः श्रुतमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नं॥ अस्मा इमामुपसंन्न
य सम्यक्परीक्ष्य दद्याद्वैष्णवीमात्मनिष्ठामिति॥ अथ हैनं श्रीरा
मचंद्रं॥ मारुतिः॥ पप्रच्छ ऋग्वेदादिविभागेन पृथक्शांतिमनुब्र ॥५॥
हीति॥ स होवाच श्रीरामः॥ ऐतरेयकौषीतकीनादबिंदात्मप्रबो

धनिर्वाणमुद्गलाक्षमालिका॥ त्रिपुरासौभाग्यबह्वृचानां दशासं
ख्याकानामुपनिषदां वाङ्मे मनसीति शांतिः॥ ईशावास्यबृहदारण्य
कजाबालहंसपरमहंससुबालमंत्रिकानिरालंबत्रिशिखीब्राह्मण
मंडलब्राह्मणाद्वयतारपैंगलभिक्षुतुरीयातीताध्यात्मतारसारयाज्ञ
वल्क्यशाट्यायनीमुक्तिकानां शुक्लयजुर्वेदगतानामेकोनविंशतिसं
ख्याकानामुपनिषदां पूर्णमद इति शांतिः॥ कठवल्लीतैत्तिरीयक
ब्रह्मकैवल्यश्वेताश्वतरगर्भनारायणामृतबिंदुमृतनादकाला
ग्निरुद्रक्षुरिकासर्वसारशुकरहस्यतेजोबिंदुध्यानबिंदुब्रह्मवि

431/1970

ध्यायोगतत्वदक्षिणामूर्तिस्कंदशारीरकयोगशिखैकाक्षराक्ष्यवधू
तकठरुद्रहृदययोगकुंडलिनिपंचब्रह्मप्राणाग्निहोत्रवराहक
लिसंतारणसरस्वतीरहस्यानांकृष्णयजुर्वेदगतानांद्वात्रिंशत्सं
ख्याकानामुपनिषदांसंहनाववत्विति शांतिः॥केनछांदोग्यारुणि
मैत्रायणिमैत्रेयवज्रसूचिकयोगचूडामणिवासुदेवमहःसन्न्
यासाव्यक्तकुंडिकासावित्रीरुद्राक्षजाबालदर्शनजाबालिनांसा
मवेदगतानांषोडशसंख्याकानामुपनिषदामाप्यायंत्विति शांतिः ॥६॥
प्रश्नमुंडकमांडूक्याथर्वशिखाबृहज्जाबालनृसिंहतापिनीनारद

परिव्राजकसीताशरभमहानारायणरामरहस्यरामतापिनी
शांडिल्यपरमहंसपरिव्राजकान्नपूर्णासूर्यात्मापाशुपतपरब्र
ह्मत्रिपुरातपनदेवीभावनाभस्मजाबालगणपतिमहावाक्यगो
पालतपनकृष्णहयग्रीवदत्तात्रेयगारुडानामथर्ववेदगतानामे
कोनत्रिंशत्संख्याकानामुपनिषदांभद्रंकर्णेभिरिति शांतिः॥मुमु
क्षवःपुरुषाःसाधनचतुष्टयसंपन्नाःश्रद्धावंतंसत्कुलभवंश्रोत्रियं
शास्त्रवात्सल्यंगुणवंतमकुटिलंसर्वभूतहितेरतंदयासमुद्रंसद्गु
रुंविधिवदुपसंगम्योपहारपाणयअष्टोत्तरशतोपनिषदंविधि

553 / 1970

वदधीत्यश्रवणमनननिदिध्यासनानिनैरंतर्येणकृत्वाप्रारब्ध
क्षयाद्देहत्रयभंगंप्राप्योपाधिविनिर्मुक्तघटाकाशवत्परिपूर्णः
ताविदेहमुक्तिःसैवकैवल्यमुक्तिरितिअतएवब्रह्मलोकस्थाअ
पिब्रह्ममुखाद्वेदांतश्रवणादिकृत्वातेनसहकैवल्यंलभंते अतः
सर्वेषांकैवल्यमुक्तिः ज्ञानमात्रेणोक्ता नकर्मसांख्योपासना
दिभिरित्युपनिषत् प्रथमोध्यायः अथहैनंश्रीरामचंद्रं
मारुतिःपप्रच्छकेयंजीवन्मुक्तिःकिंवातत्रप्रमाणंकथंवात
त्सिद्धिः सिध्यावाकिंप्रयोजनमिति सहोवाचश्रीरामःपु

रुषस्यकर्तृत्वभोक्तृत्वसुखदुःखादिलक्षणश्चित्तधर्मःक्लेश
रूपत्वाद्बंधोभवति तन्निरोधनंजीवन्मुक्तिः उपाधिविवि
निर्मुक्तघटाकाशवत्प्रारब्धक्षयाद्विदेहमुक्तिः जीवन्मुक्ति
विदेहमुक्त्योरष्टोत्तरशतोपनिषदः प्रमाणंकर्तृत्वादिदुः
खनिवृत्तिद्वारानित्यानंदावाप्तिःप्रयोजनंभवति तत्पुरुष
प्रयत्नसाध्योभवति यथापुत्रकामेष्टिनापुत्रवाणिज्यादि
नावित्तंज्योतिष्टोमेनस्वर्गंतथापुरुषप्रयत्नसाध्यवेदांतश्र
वणादिजनितसमाधिनाजीवन्मुक्त्यादिलाभोभवति सर्व

435/1970

मुक्ति° वासनाक्षयात्तल्लाभः॥अत्रश्लोकः॥उत्स्वात्मंशास्त्रितंचेतिपौ
रुषंद्विविधंस्मृतं॥तत्रोच्छास्त्रमनर्थायपरमार्थायशास्त्रितं॥
लोकवासनयाजंतोःशास्त्रवासनयापिच॥देहवासनयाज्ञानं
यथावन्नैवजायते॥द्विविधोवासनाव्यूहिःशुभश्चैवाशुभश्चते
वासनायेनशुद्धेनतत्रचेदनुनीयसे॥तत्क्रमेणाशुतेनैवमामकं
पदमाप्नुहि॥अथचेदशुभोभावःसंयोजयतिसंकटे॥प्राक्तन
स्तदसौयत्नात्जेतव्योभवताकपे॥शुभाशुभाभ्यांमार्गाभ्यांव ॥८॥
संतीवासनासरित्॥पौरुषेणप्रयत्नेनयोजनीयाशुभेपथि

अशुभेषुसमाविष्टंशुभेष्वेवावतारयेत्॥अशुभाच्चालितंयाति
शुभंतस्मादपीतरत्॥पौरुषेणप्रयत्नेनलालयेच्चित्तबालकं॥
द्रागभ्यासवशाद्यातियदातेवासनोदयं॥तदाभ्यासस्यसाफल्यं
विद्धित्वमरिमर्दन॥संदिग्धायामपिभृशंशुभामेवसमाचर॥
शुभायांवासनावृद्धौनदोषायमरुत्सुत॥वासनाक्षयविज्ञान
मनोनाशमहामते॥समकालंचिराभ्यस्ताभवंतिफलभागिः
नः॥त्रयमेतेसमंधामंनाभ्यस्तावपुनःपुनः॥तावन्नपदसंप्राप्ति
भवत्यपिसमाशतैः॥एकैकशोनिषेव्यंतेयद्योतेचिरमप्यलं॥त

437/1970

नसिद्धिंप्रयच्छंतिमंत्राःसंकीर्णतास्त्व॥त्रिभिरेतैश्चिराभ्यस्तैः
हृदयग्रंथयोदृढाः॥निःशंकमेवत्रुट्यंतिबिसच्छेदाद्गुणाइव॥ज
न्मांतरशताभ्यस्तामिथ्यासंसारवासना॥साचिराभ्यासयोगे
नविनानक्षीयतेक्वचित्॥तस्मात्सौम्यप्रयत्नेनपौरुषेणविवे
किना॥भोगेच्छांदूरतस्त्यक्त्वात्रयमेवसमाश्रय॥तस्माद्वासनया
युक्तंमनोबन्धंविदुर्बुधाः॥सम्यग्वासनयात्यक्तंमुक्तमित्यभि
धीयते॥मनोनिर्वासनीभावमाचराशुमहाकपे॥सम्यगालोक ॥१॥
नासम्यग्वासनाप्रविलीयते॥वासनाविलयेसम्यक्शममा

यातिदीपवत्॥वासनांसंपरित्यज्यमयिचिन्मात्रविग्रहे॥य
स्तिष्ठतिगतव्यग्रःसोहंसच्चित्सुखात्मकः॥समाधिमथकर्मा
णिमाकरोतुकरोतुवा॥हृदयेनात्तसर्वेहोमुक्तएवोत्तमाश
यः॥नैष्कर्म्येणनतस्यार्थस्तस्यार्थोस्तिनकर्मभिः॥नसमाधा
नजाप्याभ्यांयस्यनिर्वासनंमनः॥सम्यक्तवासनान्मौनादृते
नास्त्युत्तमंपदं॥वासनाहीनमप्येतत्तच्चक्षुरादीन्द्रियंस्वतः
प्रवर्त्ततेबहिस्स्वार्थेवासनामात्रकारणं॥अयत्नोपनतेष्व
क्षिदृग्द्रव्येषुयथापुनः॥निरागमेवपततितद्वत्कार्येषुधीर

439/1970

मुक्ति०

धीः॥भावसंवित्प्रकटितामनुरूपांच मारुते॥चित्तस्योत्पत्तिप
रमांवासनांमुनयोविदुः॥दृढाभ्यस्तपदार्थैकभावनादतिचं
चलं॥चित्तंसंजायतेजन्मजरामरणकारणं॥वासनावशा
तःप्राणस्पंदस्तेनचवासना॥क्रियतेचित्तबीजस्यतेनबीः
जांकुरक्रमः॥द्वेबीजेचित्तवृक्षस्यप्राणस्पंदनवासने॥एकः
स्मिंश्चतयोःक्षीणेक्षिप्रंद्वेअपिनश्यतः॥असंगव्यवहार ॥१०॥
त्वाद्भवभावनवर्जनात्॥शरीरनाशदर्शित्वाद्वासनानप्रव
र्तते॥वासनासंपरित्यागाच्चित्तंगच्छत्यचिंतनं॥अवासन

त्वात्सततंयदानमनुतेमनः॥अमनस्तातदोदेतिपरमोपशः
मप्रदा॥अव्युत्पन्नमनायावद्भवानज्ञानतत्पदः॥गुरुशास्त्र
प्रमाणस्तुनिर्णितंतावदाचर॥ततःपक्वकषायेननूनंविज्ञा
तवस्तुना॥शुभोप्यसान्वयोत्याज्यावासनौघोनिराधिना॥द्वि
विधश्चित्तनाशोस्तिसरूपारूपएवच॥जीवनामौसरूपःस्या
दरूपादेवमुक्तिगः॥अस्यनाशमिदानींत्वंपावनेश्रृणुसाद
रं॥चित्तनाशाभिधानंहियदातेविद्यतेपुनः॥मैत्र्यादिभिर्गु
णैर्युक्तंशांतिमेतिनसंशयः॥भूयोजन्मविनिर्मुक्तंजीवन्मु 441/1970

मुक्ति॰ क्तस्य तन्मनः॥सरूपोसौ मनोनाशोजीवन्मुक्तस्य विद्यते॥अरू
पस्तु मनोनाशो वैदेही मुक्तिगो भवेत्॥सहस्रांकुरशाखात्मफ
लपल्लवशालिनः॥अस्य संसारवृक्षस्य मनोमूलमिदं स्थितं
संकल्प एव तन्मन्ये संकल्पोपशमेन तत्॥शोषयाशु यथा शो
षमेति संसारपादपः॥उपाय एक एवास्ति मनसः स्वस्य निग्र
हे॥मनसोभ्युदयो नाशो मनोनाशो महोदयः॥ज्ञमनो नाश
मभ्येति मनोज्ञस्य हि शृंखला॥तावंनिशीव वेताला वल्गंति हृ ॥११॥
दि वासनाः॥एकतत्वदृढाभ्यासाद्यावन्न विजितं मनः॥प्रक्षी

णचित्तदर्पस्य निगृहीतेंद्रियद्विषः॥पद्मिन्य इव हेमंते क्षीयंते
भोगवासनाः॥हस्तं हस्तेन संपीड्य दंतैर्दंतान्विचूर्ण्य च॥अंगा
न्यंगैः समाक्रम्य जयेदादौ स्वकं मनः॥उपविश्योपविश्यैकां चि
तकेन मुहुर्मुहुः॥न शक्यते मनो जेतुं विना युक्तिमनिंदितां॥अ
अंकुशेन विना मत्तो यथा दुष्टमतंगजः॥अध्यात्मविद्याधि
गमः साधुसंगतिरेव च॥वासनासंपरित्यागः प्राणस्पंदनि
रोधनं॥एतास्ता युक्तयः पुष्टाः संति चित्तजये किल॥सतीषु
युक्तिष्वेतासु हठान्नियमयंति ते॥चेतसो दीपमुत्सृज्य विलो

443/1970

न्वंति न मोजनैः॥ विमूढाः कर्तुमुद्युक्ता ये हठाच्चेतसो जयं॥ ३
ते निबध्नंति नागेंद्रमुन्मुक्तं बिसतंतुभिः॥ द्वे बीजे चित्तवृक्षस्य
वृत्तिव्रततिधारिणः॥ एकं प्राणपरिस्पंदो द्वितीयं दृढभावना॥
सा हि सर्वगता संवित्प्राणस्पंदेन चाल्यते॥ चित्तैकाग्र्याद्यतो
ज्ञानमुक्तं समुपजायते॥ तत्साधनमथो ध्यानं यथावदुपदि
श्यते॥ विलय्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात्॥ परिशि
ष्टं च चिन्मात्रं चिदानंदं विचिंतय॥ अपानेस्तं भते प्राणो या ॥९७॥
वन्नाभ्युदितो हृदि॥ तावत्सा कुंभकावस्था योगिभिर्यानुभूय

ते॥ बहिरस्तंगते प्राणे यावन्नापान उद्गतः॥ तावत्पूर्णसमावस्थां ब
हिष्ठां कुंभकं विदुः॥ ब्रह्माकारमनोवृत्तिप्रवाहो हंकृतिं विना॥ संप्र
ज्ञातसमाधिः स्याद्ध्यानाभ्यासप्रकर्षतः॥ प्रशांतवृत्तिकं चित्तं प
रमानंददीपकं॥ असंप्रज्ञातनामायं समाधिर्योगिनां प्रियः॥ प्र
भाशून्यं मनःशून्यं बुद्धिशून्यं चिदात्मकं॥ अतद्व्यावृत्तिरूपोसौ स
माधिर्मुनिभावितः॥ ऊर्ध्वपूर्णमधःपूर्णं मध्यपूर्णं शिवात्मकं॥ सा
क्षाद्विधिमुखो ह्येष समाधिः पारमार्थिकः॥ दृढभावनया त्यक्तपूर्वा
पर विचारणं॥ यदादानं पदार्थस्य वासना सा प्रकीर्तिता॥ भावितं ती

445
1970

व्रसंवेगात् आत्मनायत्तदेवसः॥भवत्याशुकपिश्रेष्ठविगतेतरवा
सनः॥तादृक्रूपो हि पुरुषो वासना विवशीकृतः॥संपश्यति यदैवै
तत् सद्यस्त्विति विमुच्यति॥वासनावेगवैचित्र्यात्सद्यस्त्विति विमु
च्यति॥वासनावेगवैचित्र्यात् स्वरूपं पञ्जहाति तत्॥भ्रांतं पश्य
ति दुर्दृष्टिः सर्वदेववशादिव॥वासना द्विविधा प्रोक्ता शुद्धा च मलि
ना तथा॥मलिना जन्महेतुस्यात् शुद्धा च जन्मविनाशिनी॥अज्ञा
न सुघनाकाशघनाहंकारशालिनी॥पुनर्जन्मकरी प्रोक्ता मलिना ॥२५॥
वासना बुधेः॥पुनर्जन्मांकुरं त्यक्त्वा स्थितिसंभ्रष्टबीजवत्॥बहुशा

स्त्रकथाकंथारोमंथेन वृथैव किं॥अन्वेष्टव्यं प्रयत्नेन मारुते ज्योतिरां
तरं॥दर्शनादर्शने हित्वा स्वयं केवलरूपतः॥य आस्ते कपिशार्दूलब्रह्म
न ब्रह्मवित्स्वयं॥अधीत्य चतुरो वेदान्सर्वशास्त्राण्यनेकशः॥ब्रह्मतत्त्वं
न जानाति दर्वी पाकरसं यथा॥स्वदेहाशुचिगंधेन न विरज्येत यः पु
मान्॥विरागकारणं तस्य किमन्यदुपदिश्यते॥अत्यंतमलिनो दे
हो देही चात्यंतनिर्मलः॥उभयोरंतरं ज्ञात्वा कस्य शौचं विधीयते॥बं
धो हि वासना बंधो मोक्षः स्याद्वासनाक्षयः॥वासनां संपरित्यज्य मो
क्षार्थित्वमपि त्यज॥मानसीवासनां पूर्वं त्यक्त्वा विषयवासनां॥मै

447/1970

मुक्ति०

व्याधीवासनानामनिग्रण्हामलवासनाः॥ताअप्यंतःपरित्यज्य
ताशिर्व्यवहरंनपि॥जंतुःशांतसमस्तेहोभवचिन्मात्रवासना॥का
मप्यधःपरित्यज्यमनोबुद्धिसमन्विता॥शेषस्थिरसमाधानोमधि
त्वंभवमारुते॥अशब्दमस्पर्शमरूपमव्ययंतथारसंनित्यमगंध
वच्चयत्॥अनामगोत्रंममरूपमीदृशंअजस्वरूपंपवनात्मजा
र्त्तिहं॥चिद्वस्वरूपंगगनोपमंपरंसकृद्विभातंत्वजमेकमक्षरं॥
अलेपगंसर्वगतंयदद्वयंतदेवचाहंसकलंविमुक्त॥ॐदिवि
स्तःशुद्धोहमविक्रियात्मकोनमेस्तिकिंचिद्विषयस्वभावतः॥पु ॥२४॥
रस्तिरश्चोर्ध्वमधश्चसर्वतःसपूर्णभूमाहमितीहभावय॥अ

जोमरश्चैवतथाजरोमृतस्वयंप्रभःसर्वगतोहमव्ययः॥नकारणं
कार्यमतीत्यनिर्मलःसदैवतृप्तोहमितीहभावय॥जीवन्मुक्तप
दंत्यक्त्वासदेहेकालसात्कृते॥विशत्यदेहमुक्तत्वंपवनोस्पंदता
मिव तदेतदृचाभ्युक्तं॥तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः
दिवीवचक्षुराततं॥तद्विप्रासोविपन्यवोजागृवांसःसमिंधते
विष्णोर्यत्परमंपदं॥ॐसत्यमित्युपनिषत्॥इतिमुक्तिकोप
निषत्समाप्ताः॥श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचंद्रा
र्पणमस्तु॥ शुभंभवतु॥ ॥छ॥ ॥छ॥

449/1970

॥इति मुक्तिकोपनिषत्संपूर्णमस्तु॥

॥३५॥

॥अथ अमृतनादोपनिषत्प्रारंभः॥

451/1970

श्रीगणेशायनमः॥ ॐ सहनाववत्विति शांतिः॥ शास्त्राण्यधी
त्यमेधावीअभ्यस्य च पुनःपुनः॥ परमंब्रह्मविज्ञाय उल्कावन्ता
न्यथोत्सृजेत्॥ ॐकाररथमारुह्यविष्णुंकृत्वाधिसारथीं॥ ब्रह्म
लोकपदान्वेषीरुद्राराधनतत्परः॥ तावत्रथेनगंतव्ययावद्रथ
पथिस्थितः॥ स्थात्वारथवथस्थानंरथमुत्सृज्यगच्छति॥ मात्रालिं
गपदंत्यक्त्वाशब्दव्यंजनवर्जितं॥ अस्वरेणमकारेणपदंसूक्ष्मंहिग
च्छति॥ शब्दादिविषयान्पंचमनश्चैवातिचंचलं॥ चिंतयेदात्मनोरश्मी १
न्प्रत्याहारस्सउच्यते॥ प्रत्याहारस्तथाध्यानंप्राणायामोथधारणा॥

तर्कश्चैवसमाधिश्च षडंगोयोगउच्यते॥ यथापर्वतधातूनांदह्यंतेध
मतामलाः॥ तथेंद्रियकृतादोषादह्यंतेप्राणधारणात्॥ प्राणापाने
देहद्दोषान्धारणाभिश्चकिल्बिषं॥ किल्बिषंहिक्षयंतीत्वारुचिरं
चैवचिंतयेत्॥ रुचिरंरेचकंचैववायोराकर्षणंतथा॥ प्राणायामा
स्त्रयःप्रोक्तारेचपूरककुंभकाः॥ सव्याहृतींप्रणवांगायत्रीशिरसा
सह॥ त्रिःपठेदायतःप्राणःप्राणायामःसउच्यते॥ उत्क्षिप्यवायु
माकाशंशून्यंकृत्वानिरात्मकं॥ शून्यभावेनियुंजीयाद्रेचकस्येय
तिलक्षणं॥ वक्त्रेणोत्पलनालेनतोयमाकर्षयेन्नरः॥ एवंवायुर्ग

453/1970

अमृतना हीतव्यः पूरकस्येतिलक्षणं॥नोछ्ससेंनचनिछ्ससेंनचगात्राणि दोप.
२ चालयेत्॥एवंभावंनियुंजीयात्कुंभकस्येतिलक्षणं॥अंडवत्प
श्यरूपाणिशब्दंबधिरवच्छृणु॥काष्ठवत्पश्यवेदेहंप्रशांतस्येति
लक्षणं॥मनःसंकल्पकंध्यात्वासंक्षिप्यात्मनिबुद्धिमान्॥धारयि
त्वातथात्मानंधारणापरिकीर्तिता॥आगमस्याविरोधेनऊहनंतर्क
उच्यते॥समंमन्येतयंलब्ध्वाससमाधिःप्रकीर्तितः॥भूमोदर्भास
नेरम्येसर्वदोषविवर्जिते॥कृत्वामनोमयींरक्षांजप्त्वावैरथमंड २
ले॥पद्मकंस्वस्तिकंवापिभद्रासनमथापिवा॥बध्वायोगासनंसम्य

क्उत्तराभिमुखस्थितः॥नासिकापुटमंगुल्याःविधायैकेनमा
रुतं॥आकृष्यधारयेदग्निंशब्दमेवविचिंतयेत्॥ॐमित्येकाक्षरं
ब्रह्मओमित्येतंनरेचयेत्॥दीप्यमंत्रेणबहुधाकुर्यादामलमुक्त
ये॥पश्चाध्यायेतपूर्वोक्तंक्रमशोमंत्रविद्बुधः॥स्थूलातिस्थूलसू 455/1970
क्ष्मंचनाभेरूर्ध्वमुपक्रमः॥तिर्यगूर्ध्वमधोदृष्टिंविहायचमहाम
तिः॥स्थिरस्थायीविनिष्कंपःसदायोगंसमभ्यसेत्॥तालमात्रा
दिनिष्कंपोधारणायोजनंतथा॥द्वादशमात्रोयोगस्तुकालतो
नियमस्मृतः॥अघोषमव्यंजनमस्वरंच॥यत्तालुकंठोष्ठमना

सिकंचयत्॥अरेफजायतसुभयोष्मवर्जितंयदक्षरंनक्षरतेकथं
चित्॥येनासौपश्यतेमार्गंप्राणस्तेनाभिगछति॥अतस्यमभ्य
सेनित्यंयन्मार्गगमनायवै॥हृद्द्वारंवायुद्वारंचमूर्ध्निद्वारमथाप
रं॥मोक्षद्वारंबिलंचैवसुषिरंमंडलंविदुः॥भयक्रोधमलथाल
स्यमतिस्वप्नातिजागरं॥अत्याहारमनाहारंनित्यंयोगीविवर्जये
त्॥अनेनविधिनासम्यक्नित्यमभ्यस्यतेक्रमात्॥स्वयमुत्पद्य
तेज्ञानंत्रिभिर्मासैर्नसंशयः॥चतुर्भिःपश्यतेदेवान्पंचभिर्वित
तःक्रमः॥इछयाप्नोतिकैवल्यंषष्ठेमासिनसंशयः॥पार्थिवःपंच २

मात्रस्तुचतुर्मात्रस्तुवारुणः॥आग्नेयस्तुत्रिमात्रोसौवायव्यस्तु
द्विमात्रकः॥एकमात्रस्तथाकाशोत्यर्द्धमात्रंतुविचिंतयेत्॥संधिं
कृत्वातुमनसाचिंतयेदात्मनात्मनि॥त्रिंशत्वार्धांगुलप्राणायत्र
प्राणैःप्रतिष्ठितः॥एषप्राणइतिख्यातोबाह्यप्राणस्यगोचरः॥अ
शीतिश्चशतंचैवसहस्राणित्रयोदश॥लक्षश्चैकोविनिश्वासो
अहोरात्रप्रमाणतः॥प्राणआद्योहृदिस्थानेअपानस्तुपुनर्गुदे
॥समानोनाभिदेशेतुउदानःकंठमाश्रितः॥व्यानःसर्वेषुचांगे
षुव्याप्यतिष्ठतिसर्वदा॥अथवर्णास्तुपंचानांप्राणादीनामनुक्र

457/1970

अमृतनादोप॰ मात्॥रक्तवर्णो मणिप्रख्यः प्राणवायुः प्रकीर्तितः॥ अपानस्तस्य
४ मध्येतु इंद्रगोपसमप्रभः॥ समानस्तु द्वयो मध्ये गोक्षीरधवलप्र
भः॥ आपांडर उदानश्च व्यानेत्यार्चिसमप्रभः॥ यस्येदं मंडलं
भित्वा मारुतो याति मूर्धतः॥ यत्र तत्र म्रियेद्वापि न स भूयोपि
जायते न स भूयोपि जायते इत्युपनिषत्॥ ॥अमृतनादोपनि
षत्समाप्तः॥ ॥ ७ शके १७५५ विजयनाम संवत्॥ ॥

४

श्रीगणेशाय नमः॥ ॐ सह नाववत्विति शांतिः॥ तेजो बिंदुपरं ध्या
नं विश्वात्मा हृदि संस्थितं॥ अणुवं शांभवं शांतं स्थूलं सूक्ष्मं परं
च यत्॥ दुःखाढ्यं च दुराराध्यं दुष्प्रेक्ष्यं मुक्तमव्ययं॥ दुर्लभं तत्त्व
यं ध्यानं मुनीनां च मनीषिणां॥ यताहारो जितक्रोधो जितसंगो
जितेंद्रियः॥ निर्द्वंद्वो निरहंकारो निराशीरपरिग्रहः॥ अगम्या
गमकर्ता यो गम्यागमन मानसः॥ मुखे त्रीणि च विंदंति त्रिधामा
हं स उच्यते॥ परं गुह्य न मं विद्धि ह्यस्तं तं द्वि निराश्रयः॥ सोमरूप
कला सूक्ष्मा न द्विष्णोः परमं पदं॥ त्रिवक्त्रं त्रिगुणं स्थानं त्रिधातुं
रूपवर्जितं॥ निश्चलं निर्विकल्पं च निराकारं निराश्रयं॥ उपा

459/1970

धिरहितस्थानं वाङ्मनोतीतगोचरं॥ स्वभावं भावसंग्राह्यं संघा
तवपदच्युतं॥ अनानानंदनातीतं दुष्प्रेक्ष्यं मुक्तमव्ययं॥ चिंत्यमे
वं विनिर्मुक्तं शाश्वतं ध्रुवमच्युतं॥ सद्ब्रह्मणस्तदध्यात्मं तद्विष्णो
स्तत्परायणं॥ अचिंत्यं चिन्मयात्मानं यद्व्योम परमं स्थितं॥ अशू
न्यं शून्यभावं तु शून्यातीतं हृदि स्थितं॥ न ध्यानं च न च ध्याता न ध्ये
यो ध्येय एव च॥ सर्वं च न परं शून्यं न परं नापरात्परं॥ अचिंत्यमप्र
बुद्धं च न सत्यं न परं विदुः॥ मुनीनां संप्रयुक्तं च न देवा न परं विदुः॥ लो ॥९॥
भं मोहं भयं दर्पं कामं क्रोधं च किल्बिषं॥ शीतोष्णे क्षुत्पिपासे च सं

कल्पकविकल्पकं॥ न ब्रह्मकुलदर्पं च न मुक्तिग्रंथिसंचयं॥ न भ
यं च सुखं दुःखं तथा मानापमानयोः॥ एतद्भावविनिर्मुक्तं तद्ग्र
ह्म ब्रह्म तत्परं॥ यमो हि नियमस्त्यागो मौनं देशश्च कालतः॥
आसनं मूलबंधश्च देहसाम्यं च दृक्स्थितिः॥ प्राणसंयमनं चैव
प्रत्याहारश्च धारणा॥ आत्मध्यानं समाधिश्च प्रोक्तान्यंगा
नि वै क्रमात्॥ सर्वं ब्रह्मेति वै ज्ञानादिंद्रियग्रामसंयमः॥ यमो
यमिति संप्रोक्तोऽभ्यसनीयो मुहुर्मुहुः॥ सजातीयप्रवाहश्च वि
जातीयतिरस्कृतिः॥ नियमो हि परानंदो नियमात्क्रियते बुधैः॥

461/1970

तेजोप॰

त्यागः प्रपंचरूपस्य सच्चिदात्मावलोकनात्॥ त्यागो हि महतां पू
ज्यः सद्यो मोक्षः प्रदायकः॥ यस्माद्वाचो निवर्तंते अप्राप्य मनसा
सह॥ यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा जडैः॥ वाचो यस्मान्नि
वर्तंते तद्वक्तुं केन शक्यते॥ प्रपंचो यदि वक्तव्यः सोपि शब्दवि
वर्जितः॥ इति वा तद्भवेन्मौनं सर्वसहजसंज्ञितं॥ गिरा मौनं तु बा
लानामयुक्तं ब्रह्मवादिनां॥ आदावंते च मध्ये च जनो यस्मिन्न
विद्यते॥ येनेदं सततं व्याप्तं स देशो विजनः स्मृतः॥ कल्पना सर्व ॥२॥
भूतानां ब्रह्मादीनां निमेषतः॥ कालशब्देन निर्दिष्टं त्यखंडानं

द मद्वयं॥ सुखेनैव भवेद्यस्मिन् अजस्रं ब्रह्मचिंतनं॥ आसनं त
द्विजानीयादन्यत्सुखविनाशनं॥ सिद्धये सर्वभूतादि विश्वाधि
ष्ठानमद्वयं॥ तस्मिन्सिद्धिं गताः सिद्धाः तत्सिद्धासनमुच्यते॥
यन्मूलं सर्वलोकानां यन्मूलं चित्तबंधनं॥ मूलबंधः सदा सेव्यो
योग्योसौ ब्रह्मवादिनां॥ अंगानां समतां विद्यात् समे ब्रह्मणि
लीयते॥ नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत्॥ दृष्टिं ज्ञान
मयीं कृत्वा पश्येद्ब्रह्ममयं जगत्॥ सा दृष्टिः परमोदारा न नासा
ग्रावलोकनी॥ द्रष्टृदर्शनदृश्यानां विरामो यत्र वा भवेत्॥ दृष्टि

463/1970

तेजोप॰ स्तत्रैव कर्त्तव्या न नासाग्रावलोकनी॥ चित्तादिसर्वभावेषु ब्रह्म॰
त्वेनैव भावनात्॥ निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते॥ नि
षेधनं प्रपंचस्य रेचकाख्यः समीरितः॥ ब्रह्मैवास्मीति या वृत्तिः
पूरको वायुरुच्यते॥ ततस्तद्वृत्तिनैश्चल्यं कुंभकं प्राणसंयमः॥ अ
यं चापि प्रबुद्धानां अज्ञानां प्राणपीडनं॥ विषयेष्वात्मतां दृष्ट्वा
मनसश्चित्तरंजकं॥ प्रत्याहारः स विज्ञेयो भ्यसनीयो मुहुर्मुहुः
यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात्॥ मनसा धारणं चै ॥२॥
व धारणा सा परा मता॥ ब्रह्मैवास्मीति सद्वृत्त्या निरालंबतया॰

स्थितिः॥ ध्यानशब्देन विख्यातः परमानंददायकः॥ निर्विकारत
या वृत्त्या ब्रह्माकारतया पुनः॥ वृत्तिविस्मरणं सम्यक्समाधिर 465/1770
भिधीयते॥ इमं चाकृत्रिमानंदं तावत्साधु समभ्यसेत्॥ लक्ष्यो या
वत्क्षणात्पुंसः प्रत्यक्त्वं संभवेत्स्वयं॥ ततः साधननिर्मुक्तः सिद्धो
भवति योगिराट्॥ तत्स्वरूपं भवेत्तस्य विषयो मनसा गिरां॥ स॰
माधौ क्रियमाणे तु विघ्नान्यायांति वै बलात्॥ अनुसंधानरा॰
हित्यमालस्यं भोगलालसा॥ लयस्तमश्च विक्षेपस्तेजस्वेदश्च
शून्यता॥ एवं हि विघ्नबाहुल्यं त्याज्यं ब्रह्मविशारदैः॥ भाववृत्त्या॰

हि भावत्वं शून्यवृत्त्या हि शून्यता॥ ब्रह्मवृत्त्या हि पूर्णत्वं तथा पूर्ण
त्वमभ्यसेत्॥ ये हि वृत्तिं विहायैनां ब्रह्माख्यां पावनीं परां॥ वृथै
व ते तु जीवंति पशुभिश्च समा नराः॥ ये तु वृत्तिं विजानंति ज्ञा
त्वा वै वर्द्धयंति ते॥ ते वै सत्पुरुषा धन्या वंद्यास्ते भुवनत्रये॥ ये
षां वृत्तिः समा वृत्तिः परिपक्वा च सा पुनः॥ ते वै सद्ब्रह्मतां प्रा
प्ता नेतरे शब्दवादिनः॥ कुशला ब्रह्मवार्त्तायां वृत्तिहीनाः सु
रागिणः॥ तेप्यज्ञानतमा नूनं पुनरायांति यांति च॥ निमि ॥ ४ ॥
षार्द्धं न तिष्ठंति वृत्तिं ब्रह्ममयीं विना॥ यथा तिष्ठंति ब्रह्मा

याः सनकाद्याः शुकादयः॥ कारणं यस्य वै कार्यं कारणं तस्य
जायते॥ कारणं तत्त्वतो नश्येत्कार्याभावे विचारतः॥ अथ
शुद्धं भवेद्वस्तु यद्वै वाचामगोचरं॥ उदेति शुद्धचित्तानां वृत्ति
ज्ञानं ततः परं॥ भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मकं॥
दृश्यं त्वदृश्यतां नीत्वा ब्रह्माकारेण चिंतयेत्॥ विद्वान्नि
त्यं सुखे तिष्ठेद्धिया चिद्रसपूर्णया इति॥ प्रथमोध्यायः॥ १
अथ कुमारः शिवं पप्रच्छाखंडैकचिन्मात्रस्वरूपमनुब्रू
हीति परमशिवः॥ अखंडैकरसं दृश्यमखंडैकरसं जगत्॥

467/1970

अखंडैकरसंभावमखंडैकरसंस्वयं॥अखंडैकरसंमंत्रंअखंडैक
रसा:क्रिया:॥अखंडैकरसंज्ञानंअखंडैकरसंजलं॥अखंडैक
रसाभूमिरखंडैकरसंजगत्॥अखंडैकरसंशास्त्रमखंडैकर
संत्रयी॥अखंडैकरसंब्रह्मचाखंडैकरसंव्रतं॥अखंडैकरसो
जीवमखंडैकरसोह्यजः॥अखंडैकरसोब्रह्मा अखंडैकरसोह
रि:॥अखंडैकरसोरुद्र: अखंडैकरसोस्म्यहं॥अखंडैकरसो
ह्यात्मात्यखंडैकरसोगुरुः॥अखंडैकरसोलक्ष्यमखंडैकर ॥५॥
संमहः॥अखंडैकरसोदेहमखंडैकरसंमनः॥अखंडैकरसं

चित्तमखंडैकरसंसुखं॥अखंडैकरसंविद्याअखंडैकरसोव्ययः
अखंडैकरसंनित्यमखंडैकरसंपरं॥अखंडैकरसंकिंचिदखं 464/1470
डैकरसंपरं॥अखंडैकरसादन्यंनास्तिनास्तिषडानन॥अखं
डैकरसांनास्ति अखंडैकरसांनहि॥अखंडैकरसाकिंचिदखं
डैकरसादहं॥अखंडैकरसंस्थूलंसूक्ष्मंचाखंडरूपकं॥अखं
डैकरसंवेद्यमखंडैकरसोभवान्॥अखंडैकरसंगुह्यमखं
डैकरसादिकं॥अखंडैकरसोज्ञाताज्ञात्यखंडैकरसास्थितिः॥
अखंडैकरसामाताअखंडैकरस:पिता॥अखंडैकरसोभ्राता

अखंडैकरसः पतिः॥अखंडैकरसं सूत्रमखंडैकरसो विराट्॥अ
अखंडैकरसं गात्रमखंडैकरसं शिरः॥अखंडैकरसं चान्तरखं
डैकरसं हविः॥अखंडैकरसं पूर्णमखंडैकरसामृतं॥अखंडै
करसं गोत्रमखंडैकरसं गृहं॥अखंडैकरसं गोप्यमखंडैकर
सं शशि॥अखंडैकरसास्तारा अखंडैकरसो रविः॥अखंडैक
रसं क्षेत्रमखंडैकरसा क्षमा॥अखंडैकरसः शांतमखंडैक
रसो गुणः॥अखंडैकरसः साक्षी अखंडैकरसः सुहृत्॥अखं
डैकरसो बंधुरखंडैकरसः सखा॥अखंडैकरसो राजा अखं ॥६५॥
डैकरसं पुरं॥अखंडैकरसं राज्यमखंडैकरसाः प्रजाः॥अखं

डैकरसं तारमखंडैकरसो जपः॥अखंडैकरसं ध्यानमखंडै 471/1970
करसं पदं॥अखंडैकरसं ग्राह्यमखंडैकरसं महत्॥अखंडै
करसं ज्योतिरखंडैकरसं धनं॥अखंडैकरसं भोज्यमखंडै
करसं हविः॥अखंडैकरसो होममखंडैकरसो जयः॥अखं
डैकरसं स्वर्गमखंडैकरसं स्वयं॥अखंडैकरसं भोज्यमखंडै
करसं हविः॥अखंडैकरसं सर्वं चिन्मात्रमिति भासते॥चि
न्मात्रमेव चिन्मात्रमखंडैकरसो रसः॥भववर्जितचिन्मात्रं स
र्वं चिन्मात्रमेव हि॥इदं सर्वं च चिन्मात्रं अयं चिन्मयमेव हि॥
आत्मभावं च चिन्मात्रमखंडैकरसं विदुः॥स सर्वलोकं चिन्मा

त्रं च कामं नाम चिन्मयं आकाशो भूजलं वायुरग्निर्ब्रह्म हरिः शि
वः यत्किंचिद्यन्यकिंचिच्च सर्वं चिन्मात्रमेव हि अखंडैकरसं सर्वं
यद्य चिन्मात्रमेव हि भूतं भव्यं भविष्यच्च सर्वं चिन्मात्रमेव हि द्र
व्यं कालं च चिन्मात्रं ज्ञानं ज्ञेयं चिदेव हि असच्च सच्च चिन्मात्रं आ
द्यंतं चिन्मयं सदा आदिरंतश्च चिन्मात्रं गुरुशिष्यादि चिन्मयं
दृक् दृश्यं यदि चिन्मात्रं अस्ति चेच्चिन्मयं सदा सर्वाश्चर्यं हि चि
न्मात्रं देहश्चिन्मात्रमेव हि लिंगं च कारणं चैव चिन्मात्रान्न हि विद्य
ते अहं त्वं चैव चिन्मात्रं मूर्तामूर्तादि चिन्मयं पुण्यं पापं च चिन्मा ७

त्रं जीव चिन्मात्रविग्रहं चिन्मात्रान्नास्ति संकल्पः चिन्मात्रान्नास्ति
वेदनं चिन्मात्रान्नास्ति मंत्रादि चिन्मात्रान्नास्ति देवता चिन्मा
त्रान्नास्ति दिक्पालाश्चिन्मात्राद्व्यवहारिकं चिन्मात्रात्परमं ब्र
ह्म चिन्मात्रान्नास्ति कोपि हि चिन्मात्रान्नास्ति माया च चिन्मात्रान्ना
स्ति पूजनं चिन्मात्रान्नास्ति मंतव्यं चिन्मात्रान्नास्ति सत्यकं चिन्मा
त्रान्नास्ति कोशादि चिन्मात्रान्नास्ति वेवस चिन्मात्रान्नास्ति सत्यं च
चिन्मात्रान्नास्त्यमौनकं चिन्मात्रान्नास्ति वैराग्यं सर्वं चिन्मात्रमेव हि
यच्च यावच्च चिन्मात्रं यच्च यावच्च दृश्यते यच्च यावच्च दूरस्थं सर्वं चिन्मा

473/1970

त्रमेवहि यच्चयावच्च भूतादियच्चयावच्चलक्ष्यते यच्चयावच्चवेदां
ताःसर्वंचिन्मात्रमेवहि चिन्मात्रान्नास्तिगमनंचिन्मात्रान्नास्तिमो
क्षकं चिन्मात्रान्नास्तिलक्ष्यंचसर्वंचिन्मात्रमेवहि अखंडैकरसं
ब्रह्मचिन्मात्रान्नास्तिविद्यते शास्त्रेमयित्वयीशेचत्यखंडैकरसो
भवान् इत्येकरूपकतयायोवाजानात्यहंत्विति सकृज्ज्ञानेनमुः
क्तिस्यात्सम्यक्ज्ञानेस्वयंगुरुरिति द्वितीयोध्यायः कुमारः
पितरमात्मानुभवमनुब्रूहितिपप्रच्छसहोवाचपरःशिवः परंब्र ८
ह्मस्वरूपोहंपरमानंदमस्म्यहं केवलंज्ञानरूपोहंकेवलंपरमोस्म्य

हं केवलंशांतरूपोहंकेवलंचिन्मयोस्म्यहं केवलंनित्यरूपोहंकेव
लंशाश्वतोस्म्यहं केवलंसत्वरूपोहंमहंत्यक्तोत्येहमस्म्यहं केवलं
सत्व।सर्वहीनस्वरूपोहंचिदाकाशमयोस्म्यहं केवलंतुरीयरूपो
स्मितुरीयातीतोस्मिकेवलः सदाचैतन्यरूपोस्मिचिदानंदमयोः
स्म्यहं केवलाकाररूपोस्मिशुद्धरूपोस्म्यहंसदा केवलंज्ञानरूः
पोस्मिकेवलंप्रियमस्म्यहं निर्विकल्पस्वरूपोस्मिनिरीहोस्मि
निरामयः सदासंगस्वरूपोस्मिनिर्विकारोहमव्ययः सदैकर
सरूपोस्मिसदाचिन्मात्रविग्रहः अपरिच्छिन्नरूपोस्मित्यनंः

475/1970

तानंदरूपवान् सत्परानंदरूपोस्मि चित्परानंदमस्म्यहं अंन
रांतररूपोहमवाङ्मनसगोचरः आत्मानंदस्वरूपोहंसत्यानं
दोस्म्यहंसदा आत्मारामस्वरूपोस्मित्यहमात्मासदाशिवः आ
त्मप्रकाशरूपोस्मित्यात्मज्योतिरसोस्म्यहं आदिमध्यांतहीनो
स्मित्याकाशसदृशोस्म्यहं नित्यशुद्धचिदानंदसत्तामात्रोहम
व्ययः नित्यशुद्धविशुद्धैकसच्चिदानंदमस्म्यहं नित्यशेषस्वरू
पोस्मिसर्वातीतोस्म्यहंसदा रूपातीतस्वरूपोस्मिपरमाकाश १
विग्रहः भूमानंदस्वरूपोस्मिभाषाहीनोस्म्यहंसदा सर्वाधिष्ठा

नरूपोस्मिसर्वदाचिद्घनोस्म्यहं देहभावविहीनोस्मिचिंताही 477/1970
नोस्मिसर्वदा चित्तवृत्तिविहीनोस्मिचिदात्मैकरसोस्म्यहं स
र्वदृश्यविहीनोहंदृग्रूपोस्म्यहमेवहि सर्वदापूर्णरूपोस्मि
नित्यतृप्तोस्म्यहंसदा अहंब्रह्मैवसर्वस्यादहंचैतन्यमेवहि
अहमेवाहमेवास्मिभूमाकाशस्वरूपवान् अहमेवमहाना
त्मात्यहमेवपरात्परः अहमन्यवदाभामित्यहमेवशरीरवत्
अहंशिष्यवदाभामित्यहंलोकत्रयाश्रयः अहंकालत्रयाती
तोत्यहंवेदैरुपासितः अहंशास्त्रेणनिर्णीतअहंचित्तेष्ववस्थि

तः मत्यर्त्कनास्तिकिंचिद्वा मत्यर्त्कपृथिवीचवा मयानिरिक्तंय
च्चद्वानतत्रास्तीतिनिश्चिनु अहंब्रह्मास्मिसित्योस्मिनित्य
शुद्धोस्म्यहंसदा निर्गुणःकेवलात्मास्मिनिराकारोस्म्यहंस
दा केवलंब्रह्ममात्रोस्मित्यजरोस्म्यपरोस्म्यहं स्वयमेवस्वयं
भामिस्वयमेवसदात्मकं स्वयमेवात्मनिस्वरूस्वयमेवपराग
तिः स्वयमेवस्वयंज्योतिस्वयमेवस्वयंमहः स्वस्यात्मनिस्व
यंरंस्येस्वात्मन्यवविलोकये स्वात्मन्येवसुखासीनःस्वात्ममा १०
त्रावशेषकः स्वचैतन्यस्वयंस्थास्येस्वात्मराज्येसुखरमे स्वा

त्मसिंहासनेस्थित्वास्वात्मन्योन्यंनचिंतये चिद्रूपमात्रंब्रह्मैव
सच्चिदानंदमद्वयं आनंदघनएवाहमहंब्रह्मास्मिकेवलं
सर्वदासर्वशून्योहंसदात्मानंदवानहं नित्यानंदस्वरूपोह
मात्माकाशोस्मिनित्यदा अहमेवत्वदाकाशो चिदानिग्म
स्वरूपवान् आत्मनात्मनिवृसोस्मित्यरूपोस्म्यहमव्ययः
एकसंख्याविहीनोस्मिनित्यमुक्तस्वरूपवान् आत्मनात्म
नितृप्तोस्मित्यरूपोस्म्यहमव्ययः आकाशादपिसूक्ष्मोह
माद्यंताभाववानहं सर्वप्रकाशरूपोहंपरावरसुखोस्म्यहं

479/1970

सत्तामात्रस्वरूपोहंशुद्धमोक्षस्वरूपवान् सत्यनंदस्वरूपोहंज्ञा
नानंदघनोस्म्यहं विज्ञानमात्ररूपोहंसच्चिदानंदलक्षणः ब्रह्म
मात्रमिदंसर्वंब्रह्मणोन्यंनकिंचन तदेवाहंसदानंदंब्रह्मैवाहंस
नातनं त्वमित्येतत्तदित्येतन्मत्तोन्यंनास्तिकिंचन चिच्चैतन्यस्व
रूपोहंअहमेवपरःशिवः अतिभावस्वरूपोहमहमेवसुखात्म
कः साक्षिवस्तुविहीनत्वात्साक्षित्वंनास्तिमेसदा केवलंब्रह्म
मात्रंत्वादहमात्मासनातनः अहमेवादिशेषोहमहंशेषोहमेव
हि नामरूपविमुक्तोहमहमानंदविग्रहः इंद्रियाभावरूपोहं ११

सर्वाभावस्वरूपकः बंधमुक्तविहीनोहंशाश्वतानंदविग्रहः आ
दिचैतन्यमात्रोहमखंडैकरसोस्म्यहं वाङ्मनोगोचरश्चाहंसर्वत्र
सुखवाहनं सर्वत्रपूर्णरूपोहंभूमानंदमयोस्म्यहं सर्वत्रतृप्ति
रूपोहंपरामृतरसोस्म्यहं एकमेवाद्वितीयंसत्ब्रह्मैवाहंनसं
शयः सर्वशून्यस्वरूपोहंसकलागमगोचरः मुक्तोहंमोक्षरू
पोहंनिर्वाणसुखरूपवान् सत्यविज्ञानमात्रोहंसन्मात्रानंद
वाहनं तुरीयातीतरूपोहंनिर्विकल्पस्वरूपवान् सर्वदात्यज
रूपोहंनीरागोस्मिनिरंजनः अहंशुद्धोस्मिमुक्तोस्मिनित्यो

481
1970

स्मि प्रभुरस्म्यहं ॐकारार्थस्वरूपोस्मि निष्कलंकमयोस्म्यहं चि
दाकारःस्वरूपोस्मि नाहमस्मि नसोस्म्यहं नहि किंचित्स्वरूपोस्मि
निर्व्यापारस्वरूपवान् निरंशोस्मि निराभासो न मनो नेंद्रियोस्म्य
हं नबुद्धिर्नविकल्पोहं नदेहादित्रयोस्म्यहं नजाग्रत्स्वप्नरूपोहं
नसुषुप्तिस्वरूपवान् नतापत्रयरूपोहं नेषणात्रयवानहं श्र
वणं नास्ति मे सिद्धेर्मननं च चिदात्मनि सजातीयं न मे किंचित् वि
जातीयं न मे क्वचित् स्वगतं च न मे किंचिन्न मे भेदत्रयं क्वचित् ३२
असत्यं च मनोरूपमसत्यं बुद्धिरूपकं अहंकारमसिद्धीनि नि

त्योहं शाश्वतो ह्यजः देहत्रयमसद्विद्धि कालत्रयमसत्सदा सर्व
सत्वमसद्विद्धि सर्वभूतमसत्सदा गुणत्रयमसद्विद्धि त्वहं सत्या
त्मकः श्रुतिः श्रुतं सर्वमसद्विद्धि वेदः सर्वमसत्सदा शास्त्रं सर्व
मसद्विद्धि त्वहं सत्यं चिदात्मकः मूर्तित्रयमसद्विद्धि सर्वभूतम
सत्सदा सर्वसत्वमसद्विद्धि ह्यहं भूमा सदाशिवः गुरुशिष्यम
सद्विद्धि गुरोर्मंत्रमसन्मनः यद्दृश्यं तदसद्विद्धि न मां विद्धि तथा
विधं सर्वान्प्राणीनसद्विद्धि सर्वान् भोगानसत्विति दृष्टं श्रुत
मसद्विद्धि ओतं प्रोतमसन्मयं कार्याकार्यमसद्विद्धि नष्टं प्रा

463/1970

स्तमसन्मयं लाभालाभमसद्धिद्धिजयाजयमसन्मयं शब्दंस
र्वमसद्धिद्धिस्पर्शंसर्वमसत्सदा रूपंसर्वमसद्धिद्धिरसंसर्वमस
न्मयं गंधंसर्वमसद्धिद्धिसर्वाज्ञानमसन्मयं असदेवसदास
र्वमसदेवभवोद्भवं असदेवगुणंसर्वसन्मात्रमहमेवहि स्वा
त्ममंत्रंसदापश्येत्स्वात्ममंत्रंसदाभ्यसेत् अहंब्रह्मास्मिमंत्रो
यंदृश्यपापंविनाशयेत् अहंब्रह्मास्मिमंत्रोयमन्यमंत्रंविना
शयेत् अहंब्रह्मास्मिमंत्रोयंदेहदोषंविनाशयेत् अहंब्रह्मा १२
स्मिमंत्रोयंजन्मपापंविनाशयेत् अहंब्रह्मास्मिमंत्रोयंमृत्यु

पाशंविनाशयेत् अहंब्रह्मास्मिमंत्रोयंद्वैतदुःखंविनाशये
त् अहंब्रह्मास्मिमंत्रोयंभेदबुद्धिविनाशयेत् अहंब्रह्मा
स्मिमंत्रोयंचिंतादुःखंविनाशयेत् अहंब्रह्मास्मिमंत्रोयंबु
द्धिंव्याधिंविनाशयेत् अहंब्रह्मास्मिमंत्रोयंचित्तबंधंविना
शयेत् अहंब्रह्मास्मिमंत्रोयंसर्वव्याधीन्विनाशयेत् अहं
ब्रह्मास्मिमंत्रोयंसर्वशोकंविनाशयेत् अहंब्रह्मास्मिमंत्रोयं
कामादीन्नाशयेत्क्षणात् अहंब्रह्मास्मिमंत्रोयंक्रोधशक्तिंवि
नाशयेत् अहंब्रह्मास्मिमंत्रोयंचित्तवृत्तिंविनाशयेत् अ

485/1970

हंब्रह्मास्मि मंत्रोयं संकल्पादि विनाशयेत् अहंब्रह्मास्मि मंत्रो
यं कोटिदोषं विनाशयेत् अहंब्रह्मास्मि मंत्रोयं सर्वतंत्रं विना
शयेत् अहंब्रह्मास्मि मंत्रोयं आत्मज्ञानं विनाशयेत् अहं
ब्रह्मास्मि मंत्रोयं आत्मलोकजयप्रदः अहंब्रह्मास्मि मंत्रोयं
अप्रतर्क्यसुखप्रदः अहंब्रह्मास्मि मंत्रोयं अजडत्वं प्रयच्छ
ति अहंब्रह्मास्मि मंत्रोयं अनात्मासुरमर्दनः अहंब्रह्मास्मि
वज्रोयं अनात्माख्यगिरीन्हरेत् अहंब्रह्मास्मि वज्रोयमनात्म
त्वासुरान्हरेत् अहंब्रह्मास्मि मंत्रोयं सर्वांस्तान्मोक्षयिष्यति १४
अहंब्रह्मास्मि मंत्रोयं ज्ञानानंदं प्रयच्छति सप्तकोटिमहामं

त्रं जन्मकोटिशतप्रदं सर्वमंत्रान्समुत्सृज्य एवं मंत्रं समभ्यसे
त् सद्यो मोक्षमवाप्नोति नास्ति संदेहमण्वपीति तृतीयो
ध्यायः कुमारः परमेश्वरं पप्रच्छ जीवन्मुक्तिविदेहमुक्त्योः स्थि
तिमनुब्रूहीति स होवाच परशिवः चिदात्माहं परात्माहं निर्गु
णोहं परात्परः आत्ममंत्रेण यस्तिष्ठेत्स जीवन्मुक्त उच्यते ॥
देहत्रयातिरिक्तोहं शुद्धचैतन्यमस्म्यहं ब्रह्माहमिति यस्यांतः
स जीवन्मुक्त उच्यते आनंदघनरूपोस्मि परानंदघनोस्म्यहं ॥
यस्य देहादिकं नास्ति यस्य ब्रह्मेति निश्चयः परमानंदपूर्णो यः
स जीवन्मुक्त उच्यते यस्य किंचिदहं नास्ति चिन्मात्रेणावतिष्ठति

487
1970

चैतन्यमात्रो यस्यांतः चिन्मात्रैकस्वरूपवान् सर्वत्रपूर्णरूपात्मा
सर्वत्रात्मावशेषकः आनंदरतिरव्यक्तः परिपूर्णश्चिदात्मकः
शुद्धचैतन्यरूपात्मा सर्वसंगविवर्जितः नित्यानंदप्रसन्नात्मा
ह्यन्यचिंताविवर्जितः किंचिदस्तित्वहीनो यः स जीवन्मुक्त उ
च्यते नमे चित्तं नमे बुद्धिर्नाहंकारो नचेंद्रियं नमे देहः कदाचि
द्वा नमे प्राणादयः क्वचित् नमे माया नमे कामो नमे क्रोधः परो
स्म्यहं नमे किंचिदिदं वापि नमे किंचित्क्वचिज्जगत् नमे दोषा २५
नमे लिंगं नमे चक्षुर्नमे मनः नमे श्रोत्रं नमे नासा नमे जिह्वा नमे
करः नमे जाग्रं नमे स्वप्नं नमे कारणमण्वपि नमे तुरीयमिति

यः स जीवन्मुक्त उच्यते इदं सर्वं नमे किंचिदयं सर्वं नमे क्वचित् न
मे लोको नमे दोषा नमे वस्तु नमे मतिः नमे स्नानं नमे संध्या न 489/1990
मे दैवं नमे स्थलं नमे तीर्थं नमे सेवा नमे ज्ञानं नमे पदं नमे बंधं
नमे जन्म नमे वाक्यं नमे रविः नमे पुण्यं नमे पापं नमे कार्यं न
मे शुभं नमे जीव इति स्वात्मा नमे शुभं किंचिज्जगत्त्रयं नमे
मोक्षो नमे द्वैतं नमे वेदो नमे विधिः नमेंतिकं नमे दूरं नमे बो
धो नमे रहः नमे गुरुर्नमे शिष्यो नमे हीनो न चाधिकः नमे ब्र
ह्मा नमे विष्णु नमे विष्णुर्न चंद्रमाः नमे पृथ्वी नमे तोयं नमे वा
युर्नमे वियत् नमे वह्निर्नमे गोत्रं नमे लक्ष्यं नमे मनः नमे ध्या

तानमेध्येयोनमेध्यानंनमेमनुः नमेशीतंनमेचोष्णंनमेतृ
ष्णानमेक्षुधा नमेमित्रंनमेशत्रुर्नमेमोहोनमेजयः नमेपू
र्वंनमेपश्चान्नमेचोर्ध्वंनमेदिशः नमेवक्तव्यमल्पंवानमेः
श्रोतव्यमण्वपि नमेगंतव्यमीषद्वानमेध्यातव्यमण्वपि न
मेभोक्तव्यमीषद्वानमेस्मर्तव्यमण्वपि नमेभोगोनमेरागो
नमेयागोनमेलयः नमेमौर्ख्यंनमेशांतंनमेबंधनमेप्रियं न
मेमोदःप्रमोदोवानमेस्थूलंनमेकृशं नमेदीर्घंनमेह्रस्वंनमे
वृद्धिर्नमेक्षयं अध्यारोपोपवादोवानमेचैकंनमेबहु नमे
माध्यंनमेमान्द्यंनमेपद्विदमण्वपि नमेमांसंनमेरक्तंनमेमे १६

दोनमेत्वसृक् नमेमज्जानमेस्थिर्वानमेत्वकूधातुसप्तकं नमे
शुक्लंनमेरक्तंनमेनीलंनमेपृथक् नमेतापोनमेलाभोमुख्यं
गौणंनमेक्वचित् नमेभ्रांतिर्नमेस्थैर्यंनमेगुह्यंनमेकुलं न
मेत्याज्यंनमेग्राह्यंनमेहास्यंनमेनयः नमेव्रतंनमेग्लानिर्नमे
शोष्यंनमेसुखं नमेज्ञानंनमेज्ञेयंनमेज्ञातानमेस्वयं नमे
तुभ्यंनममत्वंनमेत्वंचनमेत्वहं नमेजरानमेबाल्यंनमेयौव
नमण्वपि अहंब्रह्मास्म्यहंब्रह्मास्म्यहंब्रह्मेतिनिश्चयः चिद
हंचिदहंचेतिसजीवन्मुक्तउच्यते ब्रह्मैवचिंतदेवाहंपरोवाहन

491
1970

तजोप संशयः स्वयमेवस्वयंहंसः स्वयमेवस्वयंस्थितः स्वयमेवस्वयंपश्ये
त्स्वात्मराज्येसुखंवसेत् स्वात्मानंदंस्वयंभोक्ष्येसजीवन्मुक्तउच्यते
स्वयमेवैकवीराग्रेस्वयमेवप्रभुस्मृतः स्वस्वरूपेस्वयंस्वस्येसजीव
न्मुक्तउच्यते ब्रह्मभूतः प्रशांतात्माब्रह्मानंदमयः सुखी स्वच्छरू
पोमहामौनीवैदेहीमुक्तएवसः सर्वात्मासमरूपात्माशुद्धात्मात्वह
मुत्थितः एकवर्जितएकात्मालँलिँतौसर्वात्मास्वात्ममात्रकः
अजात्माचामृतात्माहंस्वयमात्माहमव्ययः लक्ष्यात्माललितात्मा
हंतूष्णीमात्मस्वभाववान् आनंदात्माप्रियोह्यात्मामोक्षात्माबं ९७
धवर्जितः ब्रह्मैवाहंचिदेवाहमेवंवापिनचिंत्यते चिन्मात्रेणैवय

स्तिष्ठेद्वैदेहीमुक्तएवसः॥ सर्वमस्तीतिनास्तीतिनिश्चयंत्यज्यति
ष्ठति॥ अहंब्रह्मास्मिनास्मीतिसच्चिदानंदमात्रकः॥ किंचित्क्वचि
त्कदाचिच्च आत्मानंनस्पृशात्यसौ॥ तूष्णीमेवस्थितस्तूष्णींतूष्णीं
सत्यंनकिंचन॥ परमात्मागुणातीतः सर्वात्माभूतभावनः॥ का
लभेदंवस्तुभेदंदेशभेदंस्वभेदकं॥ किंचिद्भेदंननस्यास्तिकिंचि
द्वापिनविद्यते॥ अहंत्वंतदिदंसोयंकालात्माकालभिन्नकः॥
शून्यात्मानापिसूक्ष्मात्माविश्वात्माविश्वहीनकः॥ देवात्मादेवही
नात्मामेयात्मामेववर्जितः॥ सर्वत्रजडहीनात्मासर्वेषामंतरात्म

4193
1970

तेजो॰

कः॥सर्वसंकल्पहीनात्मा चिन्मात्रोस्मीति सर्वदा॥केवलः परमा
त्माहं केवलो ज्ञानविग्रहः॥सत्तामात्रस्वरूपात्मा नान्यत्किंचित्
जगद्भयं॥जीवेश्वरेति वाक्केति वेदशास्त्राद्यहं त्विति॥इदं चैत
न्यमेवेति जहं चैतन्यमित्यपि॥इति निश्चयशून्यो यो वैदेही
मुक्त एव सः॥चैतन्यमात्रसंसिद्धः स्वात्मारामः सुखासनः॥
अपरिछिन्नरूपात्मा अणुस्थूलादिवर्जितः॥तुर्यतुर्यपरानं
दो वैदेही मुक्त एव सः॥नामरूपविहीनात्मा परसंवित्सुखात्म ॥१८॥
कः॥तुरीयातीतरूपात्मा शुभाशुभविवर्जितः॥योगात्मा योग

युक्तात्मा बंधमुक्तिविवर्जितः॥गुणागुणविहीनात्मा देशकाला
दिवर्जितः॥साक्ष्यसाक्षित्वहीनात्मा किंचित्किंचिन्न किंचन॥य
स्य प्रपंचमानं न ब्रह्माकारमपीह न॥स्वस्वरूपे स्वयंज्योतिः स्वस्व
रूपे स्वयं रतिः॥वाचामगोचरानंदो वाङ्मनोगोचरः स्वयं अतीता
तीतभावो यो वैदेही मुक्त एव सः चित्तवृत्तेरतीतो यः चित्तवृत्त
वभासकः सर्ववृत्तिविहीनात्मा वैदेही मुक्त एव सः तस्मिन्का
ले विदेहीति देहस्मरणवर्जितः ईषन्मात्रं स्मृतं चेद्यः तदा स
र्वसमन्वितः परैरदृष्टभात्यात्मा परमानंदविद्घनः परैरदृ

4195/1970

ष्टचात्मात्मासर्ववेदांतगोचरः ब्रह्मामृतरसास्वादोब्रह्मामृतर
सानयाः ब्रह्मामृतरसासक्तोब्रह्मामृतरसस्स्वयं ब्रह्मामृतर
सेमग्नोब्रह्मानंदशिवार्चनः ब्रह्मामृतरसेतृप्तोब्रह्मानंदानुभा
वकः ब्रह्मानंदशिवानंदोब्रह्मानंदरसप्रभः ब्रह्मानंदपरंज्यो
तिब्रह्मानंदनिरंतरः ब्रह्मानंदरसान्नादोब्रह्मानंदकुटुंबकः ब्र
ह्मानंदरसारूढोब्रह्मानंदैकचिद्घनः ब्रह्मानंदरसोद्वाहोब्रह्मानंद
रसंभरः ब्रह्मानंदजनैर्युक्तोब्रह्मानंदात्मविस्थितिः आत्मरूपमि
दंसर्वआत्मनोन्यंनकिंचन सर्वमात्माहमात्मास्मिपरमात्मापरा १९
त्मकः नित्यानंदस्वरूपात्मावेदेही मुक्तएवसः पूर्णरूपोमहाना

त्माप्रीतात्माशाश्वतात्मकः सर्वांतर्यामिरूपात्मानिर्मलात्मानिरा
त्मकः निर्विकारःस्वरूपात्माशुद्धात्माशांतरूपकः शांताशांतस्व
रूपात्मानैकात्मत्वविवर्जितः जीवात्मपरमात्मेतिचिंतासर्वस्वव
र्जितः मुक्तामुक्तस्वरूपात्मामुक्तामुक्तविवर्जितः बंधमोक्षस्वरू
पात्माबंधमोक्षविवर्जितः द्वैताद्वैतस्वरूपात्माद्वैताद्वैतविवर्जि
तः सर्वासर्वस्वरूपात्मासर्वासर्वविवर्जितः मोदःप्रमोदरूपात्मा
मोदादिविनिवर्जितः सर्वसंकल्पहीनात्मावेदेही मुक्तएवसः
निष्कलात्मानिर्मलात्माबुद्धात्मापुरुषात्मकः आनंदादिविही

497/1970

नात्मा अमृतात्मा मृतात्मकः॥ कालत्रयस्वरूपात्मा कालत्रयविव
र्जितः॥ अखिलात्मा त्वमेयात्मा मानात्मा मानवर्जितः॥ नित्यप्रत्य
स्वरूपात्मा नित्यप्रत्यक्षनिर्णितः॥ अन्यहीनस्वभावात्मा अन्यहीन
स्वयंप्रभः विद्याविद्यादिमेयात्मा विद्याविद्यादिवर्जितः नित्यानि
त्यविहीनात्मा इहामुत्रविवर्जितः शमादिषट्कशून्यात्मा मुमुक्षु
त्वादिवर्जितः अन्नकोशविहीनात्मा विज्ञानादिविवर्जितः आनं
दकोशहीनात्मा पंचकोशविवर्जितः निर्विकल्पस्वरूपात्मा सवि
कल्पविवर्जितः दृश्यानुविद्धहीनात्मा शब्दविद्धविवर्जितः स
दासमाधिशून्यात्मा आदिमध्यांतवर्जितः प्रज्ञानवाक्यहीनात्मा

अहंब्रह्मास्मिवर्जितः तत्वमस्यादिहीनात्मा अयमात्मेत्यभाव
कः ओंकारवाक्यहीनात्मा सर्ववाक्यविवर्जितः अवस्थात्रयही
नात्मा अक्षरात्मा चिदात्मकः आत्मज्ञेयादिहीनात्मा यत्किंचि
दिदमात्मकः भानाभानविहीनात्मा वैदेही मुक्त एव सः आत्मान
मेव वीक्षस्व आत्मानं बोधयस्वयं स्वमात्मानं स्वयं भुंक्ष्व स्वस्थो भव
षडानन सदात्मनि स्वयं तृप्तः स्वमात्मानं स्वयं चर आत्मानमेव
मोदस्व वैदेही मुक्तिगो भवेदित्युपनिषत् चतुर्थोध्यायः
निदाघो नाम वै मुनिः पप्रच्छ ऋभुं भगवंतमात्मानात्मविवेकमनु
ब्रूहीति स होवाच ऋभुः सर्ववाचो विधिब्रह्म सर्वचिंतावधिर्गु

499/1970

तेजो॰

कः सर्वकारणकार्यात्मा कार्यकारणवर्जितः सर्वसंकल्परहि
तः सर्वनादमयः शिवः सर्ववर्जितचिन्मात्रः सर्वानंदमयः प
रः सर्वतेजःप्रकाशात्मा नादानंदमयात्मकः सर्वानुभवनि
र्मुक्तः सर्वध्यानविवर्जितः सर्वानंदकलीनस्य एष आत्माहम
व्ययः आत्मानात्मविवेकादिभेदाभेदविवर्जितः शांताशां
तादिहीनात्मा नादांतज्योतिरूपकः महावाक्यार्थतो दूराब्र
ह्मास्मीत्यतिदूरतः तच्छब्दवर्ज्यस्त्वंशब्दहीनो वाक्यार्थवर्जि
तः क्षराक्षरविहीनो यो एषैवात्मा सनातनः न निर्देष्टुमशा
क्यो यो वेदवाक्यैरलभ्यतः यस्य किंचिद्बहिर्नास्ति किंचिदंत २१

कियंनच यस्य लिंगं प्रपंचं वा ब्रह्मैवात्मा न संशयः गुणं वा वि
गुणं वापि समआत्मा न संशयः यस्य वाच्यं वाचकं वा श्रावणं
मननं च वा गुरुशिष्यादिभेदं वा देवलोकाः सुरासुराः यत्र ध
र्ममधर्मं वा शुद्धं वाशुद्धमण्वपि यत्र कालमकालं वा निश्चयं
संशयं न हि यत्र मंत्रममंत्रं वा विद्याविद्ये न विद्यते दृष्टदर्शम
दृश्यं वा ईषन्मात्रं कलात्मकं अनात्मेति प्रसंगो वाप्यनात्मेति
मनोपि वा अनात्मेति जगद्वापि नास्ति नास्तीति निश्चिनु स
र्वसंकल्पशून्यत्वात्सर्वकार्यविवर्जनात् केवलं ब्रह्ममात्रत्वा
नास्त्यनात्मेति निश्चिनु देहत्रयविहीनत्वात्कालत्रयविवर्ज

501/1970

तेजो॰ नात् जीवत्रयगुणाभावात्तापत्रयविवर्जनात् लोकत्रयविही
नत्वात्सूक्ष्ममात्मेतिशासनात् चिंताभावाच्चिंतनीयंदेहाभा
वाज्जरानच पादाभावाद्गतिर्नास्तिहस्ताभावात्क्रियानच मृ
त्युर्नास्तिजनाभावाद्बुध्यभावात्सुखादिकं धर्मोनास्तिशुचि
र्नास्तिसत्यंनास्तिभयंनच अक्षरोच्चारणंनास्तिगुरुशिष्या
दिनास्त्यपि एकाभावेद्वितीयंनन द्वितीयेननचैकता सत्यत
मस्तिचेत्किंचिदसत्वंनचसंभवेत् असत्यत्वंयदिभवेत्सत्य 22
त्वंनघटिष्यति शुभंयद्यशुभंसिद्धिःअशुभाच्छुभमिष्यते भ

यंयद्यभयंविद्धिअभयाद्भयमाप्यते बंधत्वमपिचेन्मोक्षोबंधा 503
भावेनमोक्षता मरणंयदिचेज्जन्मजन्माभावेमृतिर्नच त्वमि 1920
त्यपिभवेच्चाहंत्वंचोचेदहमेवन इदंयदितदेवास्तितदभावादिदं
नच अस्तीतिचेन्नास्तितदानास्तिचेदस्तिकिंचन कार्यंचेत्का
रणंकिंचित्कार्याभावेनकारणं द्वैतंयदितदाद्वैतंद्वैताभावेद्वयं
नच दृश्यंयदिदृगप्यस्तिदृश्याभावेदृगेवन अंतर्यदिबहिः
सत्यंअंताभावेबहिर्नच पूर्णत्वमस्तिचेत्किंचिदपूर्णत्वंप्रस
ज्यते तस्मादेतत्क्वचिन्नास्तित्वंचाहंवाइमेइदं नास्तिदृष्टां

त्तिकंसत्यंनास्तिदृश्यांत्तिकंत्यजे परंब्रह्माहमस्मीतिस्मरणास्य
मनोनहि ब्रह्ममात्रंजगदिदंब्रह्ममात्रंत्वमप्यहं चिन्मात्रंकेव
लंचाहंनास्त्यनात्मेतिनिश्चिनु इदंप्रपंचंनास्त्येवनोत्पन्नंनो
स्थितंक्वचित् चित्तंप्रपंचमित्याऊःनास्तिनास्त्येवसर्वदा न
प्रपंचंनचित्तादिनाहंकारोनजीवकः मायाकार्यादिकंनास्ति
मायानास्तिभयंनहि कर्त्तानास्तिक्रियानास्तिश्रवणंमननंन
हि समाधिद्वितयंनास्तिमातृमानादिनास्तिहि अज्ञानंचापि २२
नास्त्येवत्यविवेकंकदाचन अनुबंधचतुष्कंनसंबंधत्रयमेव

न नगंगानगयासेतुर्नव्रतंनान्यदस्तिहि नभूमिर्नजलंनाग्नि
र्नवायुर्नचखंक्वचित् नदेवानचदिक्पालानवेदानगुरुःक्वचि 505/1970
त् नदूरंनास्तिकंनालंनमध्यंनक्वचित्स्थितं नाद्वैतंद्वैतसत्यंवा
त्यसत्यंवाइदंनच बंधमोक्षादयोनास्तिसद्वासद्वासुखादिवा
जातिर्नास्तिगतिर्नास्तिवर्णोनास्तिनलौकिकं सर्वंब्रह्मेतिना
स्त्येवब्रह्मइत्येवनास्तिहि चिदित्येवेतिनास्त्येवचिदहंभाषणं
नहि अहंब्रह्मास्मिनास्त्येवनित्यशुद्धोस्मिनक्वचित् वाचा
यदुच्यतेकिंचित्मनसामनुतेक्वचित् बुध्यानिश्चिनुतेना

स्तिचित्तेनत्रायतेनहि योगियोगादिकंनास्तिसदासर्वसदान
च अहोरात्रादिकंनास्तिस्नानध्यानादिकंनहि भ्रांतिरभ्रां
तिनास्त्येवनास्त्यनात्मेतिनिश्चिनु वेदशास्त्रंपुराणंचकार्यं
कारणमीश्वरः लोकोभूतंजनंस्त्वेकंसर्वमिथ्यानसंशयः बं
धोमोक्षःसुखंदुःखंध्यानंचित्तंसुरासुराः गौणंमुख्यंपरंचान्य
त्सर्वमिथ्यानसंशयः वाचावदतियत्किंचित्संकल्पैःकल्प्यतेच
यत् मनसाचिंत्यतेयद्यत्सर्वमिथ्यानसंशयः बुध्यानिश्चीय २४
तेकिंचित्चित्तेनिश्चीयतेक्वचित् शास्त्रैःप्रपंच्यतेयद्यन्नेत्रेणेव

निरीक्ष्यते श्रोत्राभ्यांश्रूयतेयद्यदन्यत्सद्भावमेवच नेत्रंश्रोत्रंगा
त्रमेवमिथ्येतिचसुनिश्चितं इदमित्येवनिर्दिष्टमयमित्येवक
ल्प्यते त्वमहंतदिदंसोहंअन्यत्सद्भावमेवच यद्यत्संभाव्यतेलो
केसर्वसंकल्पसंभ्रमः सर्वाध्यासंसर्वगोप्यंसर्वभोगप्रभेदकं
सर्वदोषप्रभेदाश्चनास्त्यनात्मेतिनिश्चिनु मदीयंचत्वदीयंच
ममेतिचतवेतिच मह्यंतुभ्यंममेत्यादितत्सर्वंवितथंभवेत् र
क्षकोविष्णुरित्यादिब्रह्मासृष्टेस्तुकारणं संहारेरुद्रइत्येवंसर्वं
मिथ्येतिनिश्चिनु स्नानंजपस्तपोहोमस्वाध्यायोदेवपूजनं मं
त्रंतंत्रंचसत्संगोगुणदोषविजृंभणं अंतःकरणसद्भावअवि

507/1970

घायाश्च संभवः अनेककोटिब्रह्मांडं सर्वं मिथ्येति निश्चिनु स
र्वदेशिकवाक्योक्तिर्येनकेनापि निश्चितं दृश्यते जगती यद्यत्
यद्यज्जगति वीक्ष्यते वर्तते जगती यद्यत्सर्वं मिथ्येति निश्चिनु
येनकेनाक्षरेणोक्तं येनकेन विनिर्णितं येनकेनापि गदितं येन
केनापि मोदितं येनकेनापि यद्दत्तं येनकेनापि यत्कृतं यत्र यत्र
शुभं कर्म यत्र यत्र च दुष्कृतं यद्यत्करोषि सत्येन सर्वं मिथ्येति नि
श्चिनु १ त्वमेव परमात्मासि त्वमेव परमो गुरुः त्वमेवाकाशरू २५
पोसि साक्षिहीनोसि सर्वदा त्वमेव सर्वभावोसि त्वं ब्रह्मासि न सं

शयः कालहीनोसि कालोसि सदा ब्रह्मासि चिद्घनः सर्वतः
स्वस्वरूपोसि चैतन्यघनवानसि सत्योसि सिद्धोसि सनातनोसि
मुक्तोसि मोक्षोसि मुदामृतोसि देवोसि शांतोसि निरामयोसि
ब्रह्मासि पूर्णोसि परात्परोसि समोसि सच्चासि सनातनोसि
सत्यादिवाक्यैः प्रतिबोधितोसि सर्वांगहीनोसि सदा स्थितोसि
ब्रह्मेंद्ररुद्रादिविभावितोसि सर्वप्रपंचभ्रमवर्जितोसि सर्वेषु
भूतेषु च भासितोसि सर्वत्र संकल्पविवर्जितोसि सर्वागमांता
र्थविभावितोसि सर्वत्र संतोषसुखासनोसि सर्वत्र गत्यादिवि

509/1970

वर्जितोसि सर्वत्रलक्ष्यादिविवर्जितोसिध्यातोसिविष्ण्वादिसु
रैरजस्त्वं चिदाकारस्वरूपासि चिन्मात्रोसि निरंकुशः आत्म
न्येवस्थितोसित्वंसर्वशून्यासि निर्गुणः आनंदोसिपरोसित्वमे
क एवाद्वितीयकः नित्यघनानंदरूपोसिवाकूदेवोसिवैप्रभुः
अमृतोसि विभुश्चासित्वंचलोप्यचलोप्यसि सर्वोसिसर्व
हीनोसिशांताशांतविवर्जितः सत्तामात्रप्रकाशोसिसत्ताशा
मान्यकोप्यसि नित्यसिद्धस्वरूपोसिसर्वसिद्धिविवर्जितः ई २६
षन्मात्रविशून्योसि अणुमात्रविवर्जितः अस्तित्ववर्जितो

सित्वंनास्तित्वादिविवर्जितः लक्ष्यालक्षणहीनोसि निर्वि
कारो निरामयः सर्वनादांतरोसित्वंकलाकाष्ठाविवर्जितः 511/197
ब्रह्मविष्ण्वीशहीनोसिस्वस्वरूपंप्रपश्यसि स्वस्वरूपावशे
षासिस्वानंदाब्धौ निमज्जसि स्वात्मराज्ये स्वमेवासि स्वयंभा
वविवर्जितः सिष्टपूर्णस्वरूपोसिस्वस्मात्किंचित्रपश्यसि
स्वस्वरूपान्नचलसिस्वस्वरूपेणजृंभसि स्वस्वरूपादनन्यो
सित्यहमेवासि निश्चिनु २ इदंप्रपंचयत्किंचिद्यद्यज्जग
ति विद्यते दृश्यरूपंचदृक्रूपंसर्वंशशविषाणवत् भूमिरा

तेजो॰

पोनलोवायुःखंमनोबुद्धिरेवच अहंकारश्चतेजश्चलोकंभु
वनमंडलं नाशजन्मचसत्यंचपुण्यपापजयादिकं रागः
कामःक्रोधलोभौध्यानंध्येयंगुणंपरं गुरुशिष्योसिदेशा
दिरादिरंतंशमंशुभं भूतंभव्यंवर्त्तमानंलक्ष्यंलक्षणमद्व
यं शमोविचारःसंतोषोभोक्तृभोज्यादिरूपकं यमाद्यष्टां
गयोगंचगमनागमनात्मकं आदिमध्यांतरंगंचग्राहास
ज्यंहरिःशिवः इंद्रियाणिमनश्चैवअवस्थात्रितयंतथा । २०
चतुर्विंशतितत्त्वंचसाधनानांचतुष्टयं सजातीयंविजाती

यंलोकाभूरादयःक्रमात् सर्ववर्णाश्रमाचारंमंत्रतंत्रादिसं
ग्रहं विद्याविद्यादिरूपंचसर्ववेदंजडाजडं बंधमोक्षविभा
गंचज्ञानविज्ञानरूपकं बोधाबोधस्वरूपंवाद्वैताद्वैतादिभा
षणं सर्ववेदांतसिद्धांतंसर्वशास्त्रार्थनिर्णयं अनेकजीव
सद्भावमेकजीवादिनिर्णयं यद्यध्यायतिचित्तेनयद्यत्संक
ल्प्यतेक्वचित् बुध्यानिश्चीयतेयद्यत्गुरूणांसंश्रणोतिय
त् यद्यद्वाचाव्याकरोतियद्यदाचार्यभाषणं यद्यत्स्वरेंद्रि
येर्भाव्यंयद्यन्मीमांस्यतेपृथक् यद्यन्यायेननिर्णीतंमहद्भि

513/1970

वेदपारगैः शिवोरक्षतिलोकान्वैविष्णुपातिजगत्त्रयं ब्रह्मा
सृजतिलोकान्वैएवमादिक्रियादिकं यद्यदस्तिपुराणेषुय
द्यद्वेदेषुनिर्णयं सर्वोपनिषदांभावंसर्वंशशविषाणवत्
७ देहोहमितिसंकल्पःतदंतःकरणंस्मृतं देहोहमितिसं
कल्पोमहत्संसारउच्यते देहोहमितिसंकल्पंतद्बंधमिति
चोच्यते देहोहमितियज्ज्ञानंतदेवाद्वैतमुच्यते देहोहमि
तिसंकल्पःसत्यजीवःसएवसः देहोहमितियज्ज्ञानंपरि २८
च्छिन्नमितीरितं देहोहमितिसंकल्पोमहापापमितिस्फुटं

देहोहमितियाबुद्धिस्तृष्णादोषामयःकिल यत्किंचिदपिसं
कल्पंतापत्रयमितीरितं कामक्रोधंबंधनंसर्वदुःखंविश्वं
दोषंकालनानास्वरूपं यत्किंचेदंसर्वसंकल्पजालंयत्किंचे
दंमानसंसोम्यविद्धि मनएवजगत्सर्वंमनएवमहारिपुः म
नएवहिसंसारोमनएवजगत्त्रयं मनएवमहद्दुःखंमनएव
जरादिकं मनएवहिकालंचमनएवमलंतथा मनएवहि
संकल्पोमनएवहिजीवकः मनएवहिचित्तंचमनोहंकार
एवच मनएवमहद्बंधोमनोंतःकरणंचतत् मनएवहि

515/1970

भूमिश्च मनएवहितोधनं मनएवहितेजश्च मनएवमरुन्म
हान् मनएवहिचाकाशंमनएवहिशब्दकं स्पर्शंरूपंरसंगं
धंकोशाःपंचमनोभवाः जाग्रत्स्वप्नसुषुप्त्यादिमनोमयमि
तीरितं दिक्पालावसवोरुद्राआदित्याश्चमनोमयाः दृश्यं
जडंद्वंद्वजातंअज्ञानंमानसंस्मृतं संकल्पमेवयत्किंचित्
तन्नास्तीतिनिश्चिनु नास्तिनास्तिजगत्सर्वंगुरुशिष्यादि
कंनहीत्युपनिषत् पंचमोध्यायः ऋभुः सर्वसच्चिन्मयं
विद्धिसर्वंसच्चिन्मयंततं सच्चिदानंदमद्वैतंसच्चिदानंदम

व्ययं सच्चिदानंदमात्रंहिसच्चिदानंदमन्यकं सच्चिदानंदरूपो 517/1970
हंसच्चिदानंदमेवरं सच्चिदानंदमेवत्वंसच्चिदानंदकास्म्यहं
नमनोबुध्यहंकारचित्तसंघातकाअमी नत्वंनाहंनचान्यंसा
सर्वंब्रह्मैवकेवलं नवाक्यंनपदंवेदंनाक्षरंनजडंच्चचित् न
मध्यंनादिनांतंवानसत्यंननिबंधनं नदुःखंनसुखंभावंन
मायाप्रकृतिस्तथा नदेहंनमुखंघ्राणंनजिह्वानचतालु
नि नदंतोष्टौललाटंचनिश्वासोच्छ्वासएवच नस्वेदमस्थि
मांसंचनरक्तंनचमूत्रकं नदूरंनांतिकंनांगंनोदरंनकिरीट

कं नहस्तपादचलनंनशास्त्रंनचशासनं नवेत्तावेदनंवेद्यंस्व
जाग्रत्स्वप्नसुषुप्तयः तुर्यातीतंनमेकिंचित्सर्वंसच्चिन्मयं।।
तं नाध्यात्मिकंनाधिभूतंनाधिदैवंनमायिकं नविश्वस्तैज
सःप्राज्ञो विराट्सूत्रात्मकेश्वरः नगमागमचेष्टाचननष्टंन
प्रयोजनं त्याज्यंग्राह्यंनदुष्यंवाप्यमेध्यामेध्यकंतथा नगं
नंनरूशंक्लेदंनकालंदेशभाषणं नसर्वंनभयंद्वैतंनवृ
क्षणपर्वताः नध्यानंयोगसंसिद्धिर्नब्रह्मक्षत्रवैश्यकं नै ३०
पक्षीनमृगोनांगीनलोभोमोहएवच नमदोनचमात्सर्यं

कामक्रोधादयस्तथा नस्त्रीशूद्रबिडालादिभक्ष्यभोज्यादि
कंचयत् नप्रौढहीनोनास्तिक्यंनवार्तावसरोस्तिहि नलौ
किकोनलोकोवानव्यापारोनमूढता नभोक्ताभोजनंभोज्यं
नमातृमानमेयकं नशत्रुमित्रपुत्रादिर्नमातानपिताप्रि
यां नजन्मनिवृत्तिर्वृद्धीर्नदेहोहमितिभ्रमः नशून्यंना
पिचाशून्यंनांतःकरणसंसृतिः नरात्रिर्नदिवानक्तंनब्रह्म
त्मानहरिःशिवः नवारपक्षमासादिवत्सरंनचचंचलं न
ब्रह्मलोकोवैकुंठंनकैलासोनचान्यकः नस्वर्गंनचदेवेंद्रोना

519/1970

ग्निलोकोनचाग्निकः नयमोयमलोकोवानलोकालोकपाल
काः नभूर्भुवस्वस्त्रैलोक्यंनपातालंनभूतलं नाविद्यानच
विद्यात्वनमायाप्रकृतिर्जडा नस्थिरंक्षणिकंनाशंनगतिर्न
चधावनं नध्यातव्यंनमेस्नानंनमंत्रोनजपःक्वचित् नप
दार्थनपूजार्हंनाभिषेकंनचार्चनं नपुष्पंनफलंपत्रंगंधंपु
ष्पादिधूपकं नस्तोत्रंननमस्कारोनप्रदक्षिणमण्वपि न
प्रार्थनापृथग्भावोनहविर्नाग्निबंधनं नहोमोनचकर्माणि

नदुर्वाक्यंसुभाषणं नगायत्रिर्नवासंधिःनमनस्यनदुस्थि

तिः नदुराशानदुष्टात्मानचंडालोनपौल्कसः नदुःसहंदुरा
लापंनकिरातोनकैतवं नपक्षपातंपक्षंवानविभूषणतस्क
रो नचडंभोडांभिकोवानहीनोनाधिकोनरः नैकंद्वयंत्रयं
तुर्यंनमहत्त्वंनचाल्पता नपूर्णंनापरिच्छिन्नंनकाशीनव्रतं
तपः नगोत्रंनकुलंसूत्रंनविभुत्वंनशून्यता नस्त्रीनयो
षिन्नावृद्धानकन्यानवितंतुता नसूतंनचजातंवानांतर्मु
खसुविभ्रमः नमहावाक्यमैक्यंवानाणिमादिविभूतयः
सर्वचैतन्यमात्रत्वात्सर्वदोषःसदानहि सर्वसन्मात्ररूप

521/1970

तजो॰ त्वात्मचिदानंदमात्रकं ब्रह्मैवसर्वंनान्योस्तितदहंतदहंत
था तदेवाहंतदेवाहंब्रह्मैवाहंसनातनं ब्रह्मैवाहंनसंसा
री ब्रह्मैवाहंनमेमनः ब्रह्मैवाहंनमेबुद्धिः ब्रह्मैवाहंनचेंद्रि
यः ब्रह्मैवाहंनदेहोहं ब्रह्मैवाहंनगोचरः ब्रह्मैवाहंनजीवो
हंब्रह्मैवाहंनभेदभूः ब्रह्मैवाहंजडोनाहमहंब्रह्मनमेस्मृतिः
ब्रह्मैवाहंनचप्राणो ब्रह्मैवाहंपरात्परः इदंब्रह्मपरंब्रह्मस
त्यंब्रह्मप्रभुर्हिसः कालोब्रह्मकलाब्रह्मसुखंब्रह्मस्वयंप्र २२
रं एकंब्रह्मद्वयंब्रह्म मोहोब्रह्मशमादिकं दोषोब्रह्मगुणो

ब्रह्मदमःशांतंविभुःप्रभुः लोकोब्रह्मगुरुर्ब्रह्मशिष्योब्रह्मसं
दाशिवः पूर्वंब्रह्मपरंब्रह्मशुद्धंब्रह्मशुभाशुभं जीवएवसदा 523/1970
ब्रह्मसच्चिदानंदमस्म्यहं सर्वंब्रह्ममयंप्रोक्तं सर्वंब्रह्ममयंजगत्
स्वयंब्रह्मनसंदेहस्वस्मादन्यंनकिंचन सर्वमात्मैवशुद्धात्मासर्वं
चिन्मात्रमद्वयं नित्यनिर्मलरूपात्मात्यात्मनोन्यंनकिंचन अ
णुमात्रलसद्रूपमणुमात्रमिदंजगत् अणुमात्रशरीरंवात्य
णुमात्रमसत्यकं अणुमात्रमचिंत्यंवाचिंत्यंवात्यणुमात्रकं ।
ब्रह्मैवसर्वंचिन्मात्रंब्रह्ममात्रंजगत्त्रयं आनंदपरमानंदमन्य

किंचिन्नकिंचन चैतन्यमात्रमोंकारंब्रह्मैवसकलंस्वयं अहमे
वपरंब्रह्मअहमेवगुरोर्गुरुः अहमेवाखिलाधारमहमेवसु
खात्मकं आत्मनोन्यज्जगन्नास्ति आत्मनोन्यत्सुखंनच
आत्मनोन्यागतिर्नास्तिसर्वमात्ममयंजगत् आत्मनोन्यंन
हिक्वापिआत्मनोन्यत्तृणंनहि आत्मनोन्यंतुषंनास्तिसर्व
मात्ममयंजगत् ब्रह्ममात्रमिदंसर्वंब्रह्ममात्रमसंनहि ब्र
ह्ममात्रंश्रुतंसर्वंस्वयंब्रह्मैवकेवलं ब्रह्ममात्रंव्रतंसर्वंब्रह्म २२
मात्रंरसंसुखं ब्रह्ममात्रंचिदाकाशंसच्चिदानंदमद्वयं ब्रह्म

णोन्यपरंनास्तिब्रह्मणोन्यज्जगन्नच ब्रह्मणोन्यदहंनास्ति
ब्रह्मणोन्यत्फलंनहि ब्रह्मणः तृणंनास्तिब्रह्मणोन्यपदंनहि
ब्रह्मणोन्यद्गुरुर्नास्तिब्रह्मणोन्यमसद्वपुः ब्रह्मणोन्यंनचाहंता
त्वत्तेदंतनहिक्वचित् स्वयंब्रह्मात्मकंविद्धिस्वस्मादन्यंनकिंचन
यत्किंचिद्दृश्यतेलोकेयत्किंचिद्भाषतेजनैः यत्किंचिद्भुज्यतेक्वापि
तत्सर्वमसदेवहि कर्तृभेदंक्रियाभेदंगुणभेदंरसादिकं लिंगभे
दमिदंसर्वमसदेवसदासुखं कालभेदंदेशभेदंवस्तुभेदंजया
जयं यद्यद्भेदंचतत्सर्वमसदेवहिकेवलं अंतःकरणकमस

525
1970

देवेंद्रियादिकं असत् प्राणादिकं सर्वसंघातमसदात्मकं असत्
त्वंपंचकोशाख्यमसत्यंपंचदेवतं असत्यंषड्विकारादिअसत्यप
रिवर्गकं असत्यंषट्क्रतुश्चैव असत्यंद्रुसःसदा सच्चिदानंदमा
त्रोहमनुत्पन्नमिदंजगत् आत्मैवाहंपरंसत्यंनान्यासंसारदृष्ट
यः सत्यमानंदरूपोहंचित्परानंदविग्रहः अहमेवपरानंदमह
मेवपरात्परं ज्ञानाकारमिदंसर्वज्ञानानंदोहमद्वयः सर्वप्रकाश
रूपोहंसर्वभावस्वरूपकं अहमेवसदाभामीत्येवंरूपंकुतोप्यसत् ३४
त्वमित्येवंपरंब्रह्मचिन्मयानंदरूपवान् चिदाकारंचिदाकाशंचि

देवपरमंस्वरूपं अत्रैवाहमसंनाहंकूटस्थोहंगुरुःपरः सच्चिदानं
दमात्रोहमनुत्पन्नमिदंजगत् कालेनास्तिजगंन्नास्तिमायाप्र
कृतिरेवन अहमेवहरिःसाक्षादहमेवसदाशिवः शुद्धचैतन्य
भावोहंशुद्धंसत्वानुभावनः अद्वयानंदमात्रोहंचित्घनैकर
सोस्म्यहं सर्वंब्रह्मैवसततंसर्वंब्रह्मैवकेवलं सर्वंब्रह्मैवसत
तंसर्वंब्रह्मैवचेतनं सर्वांतर्यामिरूपोहंसर्वसाक्षित्वलक्षणं
परमात्मापरंज्योतिःपरंधामपरागतिः सर्ववेदांतसारोहंस
र्वशास्त्रसुनिश्चितं योगानंदस्वरूपोहंमुख्यानंदमहोदयः

52 / 1970

तेजो॰

सर्वज्ञानप्रकाशोस्मि मुख्यविज्ञानविग्रहः तुरीयतुरीयप्र
काशोस्मि तुर्यातुर्यादिवर्जितः चिदक्षरोहं सत्योहं वासुदेवा
जरोमरः अहं ब्रह्म चिदाकाशं नित्यं ब्रह्म निरंजनं शुद्धं बुद्धं
सदामुक्तं अनामकमरूपकं सच्चिदानंदरूपोहं मनुत्पन्नमि
दंजगत् सत्यसत्यंजगभ्रास्ति संकल्पकलनादिकं नित्यानं
दमयं ब्रह्मकेवलं सर्वदास्वयं आनंतमव्ययं शांतमेकरूपम
नामयं मत्तोन्यदस्ति चेन्मिथ्या यथा मरुमरीचिका वंध्याकुमा ३५
रवचने भीतिश्चेदस्ति किंचन शशशृंगेण नागेंद्रो मृतश्चेज्ज

गदस्ति तत् मृगतृष्णाजलं पीत्वा तृप्तश्चेदस्त्विदं जगत् नरशृंगे
ण नष्टश्चेत्कश्चिदस्त्विदमेव हि गंधर्वनगरे सत्ये तस्माद्भवति
सर्वदा गगने निलिमा सत्ये जगत्सत्यं भविष्यति शुक्तिकारजतं
सत्यं भूषणं चेज्जगद्भवेत् रज्जुसर्पेण दष्टश्चेन्नरो भवतु संसृतिः
जातरूपेण बाणेन ज्वालाग्नौ नाशिते जगत् विंध्याटव्यां पाय
साऽन्नमस्ति चेज्जगदुद्भवः रंभास्तंभेण काष्ठेन पाकसिद्धिर्जग
द्भवेत् सद्यः कुमारिकारूपैः पाके सिद्धे जगद्भवेत् चित्रस्थदी
पैस्तमसो नाशश्चेदस्त्विदं जगत् मासात्पूर्वं मृतो मर्त्यो ह्यागत

529/1970

तेजो॰ नश्चेज्जगद्भवेत् तक्रंक्षीरस्वरूपंचेत्क्वचिन्निस्यंजगद्भवेत्
गोस्तनादुद्भवंक्षीरंपुनरारोपणेजगत् भूरजोभौसमुत्पन्नो
जगद्भवतुसर्वदा कूर्मरोम्णागजेबद्धेजगदस्तुकतोत्कटे ना
लस्यतंतुनामेरुःचालितश्चेज्जगद्भवेत् तरंगमालयासिंधुर्
दग्धश्चेदस्त्विदंजगत् अग्नेरधस्ताज्ज्वलनंजगद्भवतुसर्वदा ज्वा
लावह्निःशीतलश्चेदस्तिरूपमिदंजगत् ज्वालाग्निमंडलेप
द्मरुद्धिश्चेज्जगदस्त्विदं महश्चैलेंद्रनीलंवासंभवश्चेदिदंजग ३६
त् मेरुरागत्यपद्माक्षेस्थितश्चेदस्त्विदंजगत् निगिरिश्चेद्भ्रम

सूनुर्मेरुश्चलवदस्त्विदं मशकेनहतेसिंहेजगत्सत्यंतदास्तु
ते अनुकोटरविस्तीर्णेत्रैलोक्यंचेज्जगद्भवेत् तृणानलश्च
नित्यश्चेत्क्षणिकंयत्जगद्भवेत् स्वप्रदृष्टंचयद्वस्तुजागरेचेत्
जगद्भवः नदीवेगोनिश्चलश्चेत्केनापीदंभवेज्जगत् क्षुधि
तस्यंनिभोजश्चेन्निमिषंकल्पितंभवेत् जात्यंधेरूपविष
यमस्तातश्चेज्जगत्सदा नपुंसककुमारस्यस्त्रीसुखंचेद्भवे
ज्जगत् निर्मितःशशशृंगेणरथश्चेज्जगदस्तितत् सद्योजा
तातुयाकन्याभोगयोग्याभवेज्जगत् वंध्यागर्भात्तसौख्यंज्ञा

531/1970

नान्वेदस्त्विदंजगत् काकोवाहंसवरुखेज्जगद्भवतुनिश्चलं ॥
महाखरावासिंहेनयुध्यतेचेज्जगस्थितिः महाखरोगजगतिं
गतश्चेज्जगदस्तुतत् संपूर्णचंद्रसूर्यश्चेज्जगद्भवतुस्वयंज
गत् चंद्रसूर्यादिकौत्सुक्याराहुश्चेद्दश्यतेजगत् अष्टबीज॥
समुत्पन्नादद्भिश्चेज्जगदस्तुतत् दरिद्रोधनिकानांचस्वखे॥
ज्ञातेतदाजगत् श्वनांवीर्येणसिंहस्यजितोयद्विजगत्तदा॥
ज्ञानिनोहृदयंमूढैर्ज्ञातंचेत्कल्पनंतथा मनोनसागरेपीते॥
निमेषोरामनोभवेत् शुद्धाकाशोमनुष्येषुपतितश्चेत्तदाज २०

गत् भूमौवापतितंव्योमव्योमपुष्पंसुगंधकं शुद्धाकाशेवनेज्ञा
तेचलितेतुतदाजगत् केवलेदर्पणेनास्तिप्रतिबिंबतदाज
गत् अजकुक्षौजगन्नास्तित्यात्मकुक्षौजगन्नहि सर्वदाभेद॥
कलनद्वैताद्वैतंनविद्यते मायाकार्यमिदंभेदमस्तिचेद्ब्रह्मभा
वनं देहोहमितिदुःखंचेत्ब्रह्माहमितिनिश्चयः हृदयग्रंथि
रस्तित्वेछेदतेब्रह्मचक्रकं संशयेसमनुप्राप्तेब्रह्मनिश्चयमा॥
श्रयेत् अनात्मरूपचोरश्चेदात्मरत्नस्यरक्षणं नित्यानंदमयं
ब्रह्मकेवलंसर्वदास्वयं एवमादिसुदृष्टांतैःसाधितंब्रह्मनाश्रकं

533/1970

ब्रह्मैवसर्वंभवनंभुवनंनामसंत्यज अहंब्रह्मेतिनिश्चित्यअहं
भावंपरित्यज सर्वमेवलयंयातिसुप्तहस्तस्थपुष्पवत् नदेहं
नचकर्माणिसर्वंब्रह्मैवकेवलं नभूतंनचकार्यंचनचावस्थाच
तुष्टयं लक्षणात्रयविज्ञानंसर्वंब्रह्मैवकेवलं सर्वव्यापारमुत्सृ
ज्यत्यहंब्रह्मेतिभावय अहंब्रह्मनसंदेहोह्यहंब्रह्मचिदात्मकं
सच्चिदानंदमात्रोयंइतिनिश्चित्यतंत्यज शांकरीयंमहाशास्त्र
नदेयंयस्यकस्यचित् नास्तिकायकृतघ्नायदुर्वृत्तायदुरात्मने गु ३९
रुभक्तिविशुद्धांतःकरणायमहात्मने सम्यक्परीक्ष्यदातव्यं
मासंषाण्मासवत्सरं सर्वोपनिषदभ्यासंदूरतस्त्यज्यसादरं

तेजोबिंदूपनिषदमभ्यसेत्सर्वदामुदा॥सकृदभ्यासमात्रेण
ब्रह्मैवभवतिस्वयमित्युपनिषत्॥ ॥श्रीमद्विभाधिष्ठानपर
महंससद्गुरुश्रीरामचंद्रार्पणमस्तु॥ इतितेजोबिंदूपनिषत्स
माप्तः॥ श्रीमद्रमारमणगोपालकृष्णार्पणमस्तु॥ छ॥

535
1970

॥इतितेजोपनिषत्संपूर्णमस्तु॥

॥२९॥

537
1970

॥अथसुंदरीतापयोपनिषत्॥

ता॰उ॰ श्रीगुरुगणाधिपतित्रिपुराभ्योनमः अथत्रिपुरातापनीयोपनिष
१ वसो त् अथैतस्मिन्नंतरे भगवान्प्राजापत्यंवैष्णवंविलयकारणारूप
माश्रित्यपराभिधाभगवतीत्येवमादिश्रुत्याभूर्भुवः स्वरोमितित्री
णिपुराणिस्वर्गभूपातालानित्रिपुराणिहरोमायात्मकेनह्रींकारे
णात्हृल्लेखापराभिधाभगवतीत्रिपुरावसानेत्रनिळयेविलयेधा
म्निमहसांघोरेणव्याप्नोति सैवेयंभगवतीत्रिपुरेतिव्यापद्यते तत्स १
वितुर्वरेण्यंभर्गोदेवस्यधीमहि धियोयोनःप्रचोदयात् परोरज

सेसावदों ३२ जातवेदसेसुनवामसोममरातीयतोनिदहातिवे
दः सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः ४३ त्र्यं
बकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिवबंधनान्मृत्योर्मुक्षी
यमामृतात् ३३ तत्सवितुः २४ जातवे ४३ त्र्यंबकं ३२ १००१ इ
तिशताक्षरीपरमाविद्यात्रयीमयीसाष्टार्णात्रिपुरापरमेश्वरीआद्या
निचत्वारिपदानिपरब्रह्मविकासीतिद्वितीयानित्रीणिशाब्दानितृतीया
निशैवानितत्रवेदाःलोकाःशास्त्राणिपुराणानिधर्माणिवैचिकित्सि

539/1970

ता॰उ॰
२

कानिज्योतींषिचाशिवशक्तियोगादित्येवंघटनाव्यापद्यते अथैत
स्यापरंत्रयीमयीसाष्टार्णात्रिपुराद्यापरमेश्वरीगह्वरंव्याख्यास्या
मोमहामनुसमुद्भवंतदितिब्रह्मशाश्वतंपरोभवान्निर्लक्षणोनि
रंजनोनिरुपाधिरादिरहितोदेवउन्मीलितेपश्यतिविकासितेचैत
न्यभावंकामयन्विजंभतिस एवदेवःशिवरूपीदृश्यत्वेनविका
सेतयतिषुयज्ञेषुयोगिषुकामंकामयतेकामयत इतिजायतेसए २
वनिरंजनोकामत्वेनोज्जृंभतेकामोजायते तस्मादीश्वरःकामो
कामय

भिधीयतेकामेनतस्मात्कामोजायतेअकचटतपयशान्सृज
तेतत्परिभाषयाकामः ककारंव्याप्नोतिकामदेवंतदितिककारो
गृत्यतेतस्मात्तत्सदार्थइत्येवंवेद १ सवितुर्वरेण्यमितिषुङ्प्रा
णिप्रसवेसविताप्राणिनः सूतेप्राणिनःशक्तिःसूतेत्रिपुराश
क्तिराद्येवंत्रिपुरापरमेश्वरीमहाकुंडलिनीदेवीजातवेदसमंडले
योधीतेससर्वव्याप्नोतित्रिकोणशक्तिरेकोरणमहाभगेनप्रसू
तेतस्मादेकारएवगृत्यतेवरेण्यंश्रेष्ठंभजनीयमक्षरंनमस्कार्यं

541/1970

सुं·ता·उ· तस्माद्वरेण्यमेकारं गृह्यत इत्येवं वेद २ भर्गो देवस्य धीमहीत्ये
२ वं व्याख्यास्या मोधकारोधारणं धीत्येवं धार्यते भगवान् परमेश्व
रो भर्गो देवो मध्यवर्ती तुरीयमक्षरं साक्षात्तुरीयस्वरं सर्वांतर्भूतं
तुरीयाक्षरमीकारं पदानां मध्यवर्तित्वेन व्याख्यातं भर्गो देवभू
तं रूपं व्याचक्षते तस्माद्भर्गो देवस्य धीत्येवमीकारः महीत्यस्य व्या
ख्यातं महत्वं जडत्वं काठिण्यं विद्यते यस्मिन्नक्षरे तन्महील का ३
करुणादयं रः परधाम चौ रुँष्मीणा ससागरं सपर्वतं सद्वीपं सकाननं समुज्व

ल भूमंडलमेवोक्तं लकारेण पृथ्वीदेवी महीत्येवं व्याचक्षत इत्ये
वं वेद ३ धियो यो नः प्रचोदयादित्यनेन परमात्मा सदाशिव आ 543/1970
दिभूतपरस्थाणुरूपेण लकारेण ज्योतिर्लिंगमात्मानं धियो बु
द्धयः परवस्तु निध्याने छारहिते निर्विकल्पे प्रचोदयात्प्रेरयेदित्यु
च्चाररहितं चेतसैवं चिंतयित्वा भावयेदिति परो रजसे सावदोमिति
तदवसाने परं ज्योतिरोममलं यामत्र्दिदैवतं चैतन्यं चिल्लिंगं त्र
दयागारं त्र्हल्लेखेत्यादिना स्पष्टं वाग्भवं कूटं पंचाक्षरं पंचभूतज

नतंपंचकलालयंव्याचक्षत इत्येवंवेद ४ अथातोपरंकामराजंभ

र्गोदेवस्येवंकामराजकूटमाहुः तत्सवितुर्वरेण्यमितिद्वात्रिंशदक्ष
रीपठित्वा तदिति परमात्मासदाशिवोक्षरविमलंनिरुपाधिकेनादा
त्म्यप्रतिपादनहकाराक्षरंशिवरूपंसंहाररूपंनिरक्षरमक्षरंव्याखि
ख्यतइनितत्पदव्याप्तिमादायशक्तिंदर्शयतेतत्सवितुरितिपूर्वेणा
ध्वनासूर्यश्चंद्रिकाव्याखिख्यतेमूलादिक्रोधरंभगंधीताक्षरंद्विती ४
यमाचष्टेत्याहभगवान्तदेवशिवशक्त्यात्मकमावेदितंशिवोयंपरमं

देवंशक्तिरेषातुजीवजासूर्यचंद्रमसोर्योगाद्धंसस्तत्पदमुच्यतेतस्मादु
ज्जृंभतेकामःकामीकामःशिवोपरः कीर्णोयंश्रीकामदेवोयंवरेण्यं 545/1970
भर्गउच्यते तत्सवितुर्वरेण्यंभर्गोक्षरंसेवनीयमक्षरंसमुद्यक्षरंप
रमात्माजीवात्मनोर्योगादितिषष्ठमक्षरंतृतीयंहसकांतंदेवस्यस
दाशिवस्यएवनिःकल्मषंदेवस्येत्यक्षरंव्याक्रियतेपरमंपदंपरंधी
तिधारणंविद्यतेजडत्वंधारणंमहीतिलकारःशिवाधस्थाल्लकाराल्ल
एवस्पष्टमंत्याक्षरंपंचमंचैतन्यंधियोयोनःप्रचोदयात् परोरजसे

सुं·ता·उ· सावदोमि ‾ वंकूटंकामकलालयंषडध्वपरिवर्तकंवैष्णवंपरंधामे
५ तिभगवानुच्यतेतस्माद्यएवंवेद ५ अथैतस्मादपरंतृतीयंशक्ति
कूटंप्रतिपद्यतेद्वात्रिंशदक्षर्या: गायत्र्यातत्सवितुर्वरेण्यंतस्मादात्म
नआकाश: आकाशाद्वायु: स्फुरतेवायोरग्निरग्नेस्तदधीतंवरेण्यं
समद्युद्यमानंसवितुर्वायोर्योजीवात्मापरमात्मसमुद्भवंतंप्रकाशश
क्तिरूपंसुधारूपंजीवाक्षरमित्यादिस्पष्टमापद्यतेभर्गोदेवस्यधीमही ५
त्यनेनाधाररूपीशिवआत्माक्षरोभण्यतेतदपरंमहीत्यादिनाशेषंवैर

ण्यंकामरमणीयंदृश्यंतृतीयंशक्तिकूटंव्याख्यास्पष्टीकृतमित्येवं
पंचदशाक्षरंमंत्रंत्रैपुरंयोधीतेससर्वान्कामानवाप्नोतिससर्वान्
भोगानाप्नोतिससर्वाल्लोकाञ्जयतिससर्वान्वाचोविजृंभयतिसरुद्
त्वंप्राप्नोतिवैष्णवंधामभित्वापरब्रह्मव्याप्नोतियएवंवेद ६ इत्या
द्याविद्यामभिधायैतस्या: शक्तिकूटंलोपामुद्रेयंद्वितीयेधामनिपूर्वे
णैवमनुनाबिंदुहीनाशक्तिभूतत्वहल्लेखाक्रोधमुनिनाधिष्ठितात्तृती
येधामनिपूर्वस्याएवविद्यायायद्वाग्भवंसैवमानवीचांद्रीकौबेरींवि

517

महाद्यमेकं तदेवाधः

सुं.ता.उ. द्यामाचक्षते मदनाधः शिववाग्भवं तदूर्ध्वं कामकलालयं शक्त्यूर्ध्वं
६ शाक्तमिति मानवीविद्यां चतुर्थेधामनि शिवशक्त्याद्यं वाग्भवं तदेवा
धः शिवमादतद्द्वितीयं शिवशक्त्याद्यं तृतीयं चांद्रीयं विद्याषष्ठेधा
मनिव्याचक्षत इत्येवं वेद ७ ह्लिवेकारं तुरीयस्वरं सर्वादौ सूर्या
चंद्रमसेन मनुना कामेश्वर्यै वागाक्तिसंज्ञिता सप्तमेधामनि तृतीयमे
तस्या एव पूर्वोक्ताया का माद्यं शक्तिबीजं वाग्भवद्विदितद्वाग्भवाद्य ६
मादनं तत्कामकलालयोर्ध्वं वाशिरस्कं कुलानंदविधेयमष्टमेधा

मन्निवाग्भवमागस्त्यं वागर्थकुलालयं कामकलाभिधं सहकलए
इलमितीयं शाक्तप्रभावकरीविद्यानवमेधाम्नि पुनरागस्त्यवाग्भ
वं शिवशक्तिमन्मथोर्विमायं कामकलालये चंद्रसूर्यानंगधूर्जटी
मायं तृतीयं षण्मुखीयं विद्यादशमेधाम्नि विद्याः प्रकाशितायाः भू
य एवागस्त्यविद्यां पठित्वा भूय एवागस्त्यमायां परमशैवाविद्याए
कादशेधामनि भूय एवागस्त्यविद्यां पठित्वा भूय एतस्या एवं वाग्भवं
यद्वत्सहजं कामकलालयं च तत्सहजं कुलालोपामुद्रायाः शक्ति

549
1970

सुं·ना·उ कूटंकूटराजंपठित्वावैष्णवींविद्यांद्वादशधाभिन्नोख्याताः इतितान्
७ सहोवाचभगवान्सर्वेयूयंश्रुत्वापूर्वोकामाख्यांविद्यांतुरीयरूपांतुरी
यातीतांसर्वोत्कटांसर्वमंत्रासनगतांपीठोपपीठदेवतापरिवृतांसक
लव्यापिनीदेवतांसायुधांसपरिवारांगांसत्त्वस्थांसामृतांसकलांसें
द्रियांसदोदितांपरापरांविद्यांस्पष्टीकृतांहृदयेनिधायविज्ञायध्यानल
यंगमयित्वात्रिकूटांत्रिपुरांपरमांमायांश्रेष्ठांपरांवैष्णवींसन्निधायहृ ७
दयकमलकर्णिकायांपरांभगवतींलक्ष्मीमायांसदोदितांमहावश्यक

रींमदनोन्मादनकारिणींधनुर्बाणधारिणींवाग्विजृंभिणींचंद्रमंड
लमध्यवर्तिनींचंद्रकलांसप्तदशींमहानित्योपस्थितांपाशांकुशम
नोज्ञपाणिपल्लवांसमुद्यदर्कनिभांत्रिनेत्रांविचिंतयेत् देवींमहाल 551/1970
क्ष्मींमायांसदोदितांमहावश्यकरींमदनोन्मादनकारिणींधनुर्बा
पाधारिणींवाग्विजृंभिणींचंद्रमंडलमध्यवर्तिनींचंद्रकलांसप्तद
शींमहानित्योपस्थितांपाशांकुशमनोज्ञपाणिपल्लवांसमुद्यदर्कनि
भांत्रिनेत्रांविचिंतयेत् देवीमहालक्ष्मीसर्वलक्ष्मीमयीसर्वलक्षण

 सपन्नांतद्दयचैतन्यरूपिणींजनरंजनींत्रिकूटाख्यांस्मितमुखींमहामा
८ यांदेवींसुंदरींसर्वसुभगांमहाकुंडलिनीं श्रीपीठमध्यवर्तिनीमकथा
दित्रिपीठेशींपरांभैरवींचित्कलांमहात्रिपुरांदेवींध्यायेन्महाध्यानयो
गेनेत्येवंवेदेतिमहोपनिषत् ८ इत्यथर्वणीयेप्रथमोपनिषत् १
अथातोजातवेदसेसुनवाममित्यादिपठित्वात्रैपुरींव्यक्तिंव्याचक्षते
जातवेदसइत्येकर्चसूक्तस्याद्यमध्यमावसानेषुतत्रस्थानेषुविलीनं ८
बीजसागररूपंव्याचक्षेतितदेषयऊर्त्तुस्तान्होवाचभगवान्जातवेदसे

सुनवामतदंत्यंमहार्णवविलोमेनपठित्वाप्रथमस्याद्यंतदेवंद्विती
यस्याद्यसुनवासोमामित्यनेनकौलंवामंश्रेष्ठंमहासौभाग्यमाच 553/1970
क्षतेसर्वसंपत्तिप्रदंतंप्रथमंनिवृत्तिकारणंद्वितीयंस्थितिकारणंतृ
तृतीयंसर्गकारणमित्यनेनकरशुद्धिंकृत्वात्रिपुरांविद्यांस्पष्टीकृत्वा
जातवेदसेसुनवामसोमामित्यादिपठित्वामहाविद्येश्वरीविद्यामा
चक्षतेत्रिपुरेश्वरींजातवेदसमितिजातिआद्याक्षरेमातृकायाःशिर
सिबिंदवममृतरूपिणीकुंडलिनींत्रिकोणरूपिणींवेत्तिवाक्यार्थः

सुं॰ता॰उ॰ एवं प्रथमस्याद्यं वाग्भवमेकारं द्वितीयं कामकालालयं जात इत्यनेन
१ परमात्मनो जन्मपं जात इत्यादिना परमात्मा शिव उच्यते जात मोत्र
३ पाकामं कामयते कामयित्वादिना पूर्णं व्याचक्षते तदेव सुनवाम सगो
त्रारूढं मध्यवर्तिनामृत मध्ये नार्णमहार्णस्पष्टीकृ गोत्रेति नाम्निगो
त्राथामित्यादिना स्पष्टं कामकलालयं शेषं चात्मसोममित्यादिना पू
र्वेणाधनाविधेयं सर्वरक्षाकरी व्याचक्षते एवमेतेन विद्यां त्रिपुरेशी १
स्पष्टीकृत्वा जातवेदस इत्यादिना जातो देव एक ईश्वर परमो ज्योति

र्मोत्रांतो येति तुरीय स्वरं दत्वा बिंदु पूर्णज्योतिः स्थानं कृत्वा प्रथमस्या
द्य स्वरूपं द्वितीयं तृतीयं च सर्वरक्षाकरी संबंधं कृत्वा विद्यामनसा
रूपिणीं स्पष्टीकृत्वा जातवेदसे सुनवेत्यादि पठित्वा बात्या रक्षाकरी
विद्यां स्मृत्वा द्यंतयोर्धर्म्मोः। शक्तिशिवरूपिणीं विनियोज्य इति शक्त्या
त्मकं वर्णसोममिति शैवात्मकं धाम जानीयान् यो जानीते सः स्क
भगोभवति एवमेतां चक्रासनगतां त्रिपुरवासिनी विद्यां स्पष्टीकृ
त्वा जातवेदसे सुनवाममिति पठित्वा पूर्वा त्रिपुरेश्वरी विद्यां सदोदितां

555
1970

सुं.ता.उ. शिवशक्त्यामावेदितांजातवेदसेतिशिवइतिशक्त्यात्मकाक्षरमिति
१० शिवादिशक्त्यंतांदोलीभूतांत्रिकूटादिचारिणींसूर्याचंद्रमस्कांमंत्रास
नगतांत्रिपुरांमहालक्ष्मींसदोदितांस्पष्टीकृत्वाजातवेदसेसुनवाम
सोममित्यादिपठित्वापूर्वांसदात्मांसजगतांरूपांविद्यांस्मृत्वापठि
त्वावेदइत्यादिनाविश्वामेहतदोदयाबैदंवसुपरिविन्यस्यासिद्धासन
स्थांत्रिपुरांबिंदुमालिनींविद्यांस्पष्टीकृत्वाजातवेदसेसुनवामसोम १०
मित्यादिपठित्वात्रिपुरांलक्ष्मींस्मृत्वाग्निनानदहातिसेवेयमग्न्या

सनोज्वलंतींविचिंत्यमूर्तिभूतांमूर्तिरूपिणींसर्वसर्वेश्वरींत्रिपुरां 557/1970
विद्यांस्पष्टीकृतजातवेदसइत्यादिपठित्वाएवमेतामेवपर्षदतिदुर्गा
णिविश्वेत्यादिपरप्रकाशिनींप्रत्येकभूतांकार्यविधेयमादानक
र्मणिसर्वतोधिकेवतिव्याचक्षतेएवमेतद्विद्याष्टकंमहामायादेव्यं
गभूतंव्याचक्षतेदेवाहवैभगवंतमब्रुवन्चक्रंनाममहाचक्रंनाम
चक्रनायकंनोब्रूहिसर्वकामिकंसर्वाराध्यंसर्वरूपंविश्वतोमुखं
मोक्षद्वारंस–योगिनमुपदिश्यपरब्रह्मभित्वानिर्वाणमुपदिशेति

॥सुं·ता·उ·॥ नानन्दहोवाचभगवान्श्रीचक्रंव्याख्यास्यामः ॥ इतित्रिकोणंत्र्यस
॥११॥ रंकृत्वातदंतरमध्यवर्तिनीमानयष्टीरेखामाकृष्यविशालांनीला
ग्रतोयोनिंकृत्वापूर्वयोन्यग्ररूपिणींमानयष्टींकृत्वातांसर्वोर्द्धंनी
त्वाद्यत्रिकोणचक्रंभवतिद्वितीयमंतरालंभवतितृतीयमष्टयोन्यं
कितंभवतिअष्टारचक्राद्यनववह्निकोणाग्रतोरेखानीत्वासंध्याद्यद्वा
कर्षणाबद्धरेखांनीत्वाइत्येवमधोर्द्धंसंपुटंयोन्यांकितंकृत्वाकक्ष्या ॥११॥
भ्वऊर्ध्वरेखाचतुष्टयंकृत्वायथाक्रमेणमानयष्टीद्वयेनदशयोन्यं

कितंचक्रंभवतिमध्येत्रिकोणाग्रचतुष्टयाद्रेखाचतुष्टयमाकृष्योर्ध्व
विस्तार्ययोनीसंपुटंकृत्वामध्यचतुष्टयकक्षाभ्योरेखाचतुष्टयंदशा
राद्यकोणेषुसंयोज्यतद्दशारांशतोनीत्वारेखांयोजयित्वाचतुर्दशार
चक्रंभवतिततोष्टपत्रंसंवृत्तंचक्रंभवतिषोडशारंषोडशपत्रंसवृत्तंभ
वतिपार्थिवंचक्रंचतुर्द्वारंभवतिएवंसृष्टियोगेनचक्रंव्याख्यातंएतं
नवात्मकंचक्रंप्रतिलोमेनवावच्मिप्रथमंचक्रंत्रैलोक्यमोहनंभव
तिसाणिमाष्टकंभवतिसमात्राष्टकंभवतिसदशमुद्राधिष्ठितंभव 559/1970

सुं·ता·उ ति सप्रकटंभवतित्रिपुराधिष्ठितंभवतिसर्वसंक्षोभिणीमुद्रयाजुष्टंभव
१२ तिद्वितीयंसर्वाशापरिपूरकंचक्रंभवतिसकामाकर्षिण्यादिषोडशकं
भवतिसगुप्तंभवतित्रिपुरेश्वर्याधिष्ठितंभवतिसर्वविद्राविणीमुद्रया
जुष्टंभवतितृतीयंसर्वसंक्षोभणाचक्रंभवतिसानंगकुसुमाष्टकंभवति
सगुप्ततरंभवतित्रिपुरसुंदर्याधिष्ठितंभवतिसर्वाकर्षिणीमुद्रयाजुष्टं
भवतितूर्यंसर्वसौभाग्यदायकंचक्रंभवतिसर्वसंक्षोभिणीद्विसप्त १२
कंभवतिसंप्रदायकंभवतित्रिपुरवासिन्याधिष्ठितंभवतिसर्ववशं

करीमुद्रयाजुष्टंभवतितुरीयांतंसर्वार्थसाधकंचक्रंभवतिससर्वसि
द्धिप्रदादेवीदशाकंभवतिसकुलालयंभवतिमहालक्ष्म्याधिष्ठितंभ 561/1970
वतिमहोन्मादनमुद्रयाजुष्टंभवतिषष्ठंसर्वरक्षाकरचक्रंभवतिसस
र्वज्ञादशाकंभवतिसनिगर्भसंज्ञंभवतित्रिपुरमालिन्याधिष्ठितंभवति
समहांकुशामुद्रयाजुष्टंभवतिसप्तमंसर्वरोगहरंचक्रंभवतिसरह
स्यसंज्ञंभवतिससर्ववशिन्यष्टकंभवतिससिद्धांबाव्याप्तंभवतिसखे
चरीमुद्रयाजुष्टंभवतिअष्टमंसर्वसिद्धिप्रदचक्रंभवतिसायुधचतु

ष्टयंभवतिसकामेश्वरी त्रिकंभवति सात्तिरहस्यंभवनिसोबायुक्तंभ

वतिसवीजमुद्रयाजुष्टंभवतिनवमंचक्रनायकंचक्रंभवतिसपरापरा
तिरहस्यंभवतिसमहात्रिपुरसुंदर्याधिष्ठितंभवतिसर्वानंदमयसंज्ञं
भवतिमहायोनिमुद्रयाजुष्टंभवतिसंक्रामंतिसर्वाणिछंदांसिवेचक्र
पात्राणिचेक्रं तेदेवं श्रीचक्रं तस्यानाभ्याग्निमंडलेसूर्याचंद्रमसोतत्रों
कारपीठंपूजयित्वातत्राक्षरंबिंदुरूपंतदंतर्गतचिद्व्योमरूपिणींविद्यां
परमांस्मृत्वात्रिपुरसुंदरीमावाह्य क्षीरेणस्नापितेदेवीचंदनेनविलिप्ते

ते बिल्वपत्रार्चितेदेवि दुर्गेहंशरणंगतः इत्येकर्चाप्रार्थयित्वा मा 563
यालक्ष्मीमंत्रेण ह्रींश्रीं यावैशिवाभगवत्ती अणिमासिद्धिदशाक 1970
स्तस्यैवेनमोनमः ह्रींश्रींया० लघिमासिद्धिस्तस्यैवैन०२ या०
महिमासिद्धिस्त०२ या० ईशित्वसिद्धिस्त०२ या० वशित्वसि
द्धिस्त०२ या० प्राकाम्यसिद्धिस्त०२ या० प्राकाम्यसिद्धिस्त०२
भुक्तिसिद्धिस्त०२ या० इच्छासिद्धिस्त०२ या० प्राप्तिसिद्धिस्त०२
या० सर्वकामसिद्धिस्त०२ या० ब्राह्म्यष्टकंतस्यै०२ या० आंब्रह्मा

मं·ता·उ· णीशक्तिस्त०२ या० ईं माहेश्वरीशक्तिस्त०२ या० ऊं कौमारीशक्तिस्त
१४ ०२ ॠं वैष्णवी शक्तिस्त०२ या० लृं वाराहीश०२ या० ऐं इंद्राणीश०
२ या० औं चामुंडाश०२ या० अः महालक्ष्मीश०२ या० मुद्रादशकंत
०२ या० द्रां सर्वसंक्षोभिणीमुद्रात०२ या० द्रीं सर्वविद्राविणीमुद्रात
०२ या क्लीं सर्वाकर्षिणीमुद्रात० ब्लूं सर्ववशंकरीमु०२ या० सः स
र्वोन्मादिनीमु०२ या० ह्स्ख्फ्रें खेचरीमु०२ या० ह्सौं बीजमु०२ या० १४
ऐं सर्वयोनिमुद्रात०२ या० ह्सैं ह्स्क्लीं ह्सौः सर्वत्रिखंडामु०२ या० अं

आं सौः प्रथमचक्रेश्वरीत्रिपुरात०२ या० अणिमासिद्धिस्त०२ या० द्रां
सर्वसंक्षोभणीमु०२ या० कामाकर्षिण्यादिषट्दशकंत०२ या० का
माकर्षिणी०२ या० बुध्याकर्षिणी०२ या० शब्दाकर्षिणी०२ या० स्प
र्शाकर्षिणी०२ या०२ रूपाकर्षिणी०२ या० रसाकर्षिणी०२ या० गं
धाकर्षिणी०२ या० चित्ताकर्षिणी०२ या० धैर्याकर्षिणी० या० स्मृत्या
कर्षिणी०२ या० नामाकर्षिणी०२ या० बीजाकर्षिणी०२ या० अमृ
ताकर्षिणी०२ या० शरीराकर्षिणी०२ या० ऐं क्लीं सौः त्रिपुरेश्वरी०२

565/1970

सुं.ना.ऊ. या० लघिमासिद्धि० २ या० द्रींसर्वविद्राविणीमु० २ या० अनंगकुसु
१५ माष्टकंत० २ या० कंखंगंघंङं अनंगकुसुमात० २ या० चं ५ अनंग
मेखलात० २ या० टं ५ अनंगमदनात० २ या० तं० ५ अनंगमदनातु
रात० २ या० पं ५ अनंगरेखात० २ या० यं ४ अनंगवेगिनीत० २ या०
रं ४ अनंगांकुशात० २ या० लंक्षं अनंगमालिनीत० २ या० ह्रीक्लींं
त्रिपुर सौः सुंदरीचक्रेश्वरीत० २ या० महिमासिद्धिस्त० २ या० सर्वाकर्षि क्ली १५
णीमुद्रात० २ या० सर्वसंक्षोभिण्यादिद्विसप्तकंत० २ या० सर्वसंक्षोभि

णीशास्त० २ या० सर्वविद्राविणीश० २ या० सर्वाकर्षिणीश० २ या०
सर्वाह्लादिनीश० २ या० सर्वसंमोहिनीश० २ या० सर्वस्तंभिनीश० २
या० सर्वजृंभिणीश० २ या० सर्ववशंकरीश० २ या० सर्वरंजनीश० २
या० सर्वोन्मादिनीश० २ या० सर्वार्थसाधिनीश० २ या० सर्वसंपत्तिपू
रिणी० २ या० सर्वमंत्रमयीश० २ या० सर्वद्वंद्वक्षयंकरीश० २ या० त्रि
पुरवासिनीचक्रेश्वरीश० २ या० ईशित्वसिद्धिस्त० २ या० ठ्लूं सर्ववशं
करीमुद्रात० २ या० सर्वसिद्धिप्रदादिदशकंत० २ या० सर्वसिद्धिप्रदादे 567/1970

सुं॰ता॰उ॰ षीत॰ २ या॰ सर्वसंपत्प्रदादे॰ २ या॰ सर्वप्रियंकरीदे॰ या॰ सर्वमंगलका
१८ रिणीदे॰ २ या॰ सर्वदुःखविमोचिनीदे॰ २ या॰ सर्वमृत्युप्रशमनीदे॰
२ या॰ सर्वविघ्ननिवारिणीदे॰ २ या॰ सर्वांगसुंदरीदे॰ २ या॰ सर्वसौ
भाग्यदायिनीदे॰ २ या॰ ह्सैं ह्स्क्लीं ह्सौः त्रिपुराश्रीस्त॰ २ या॰ वशिलासि
द्धिस्त॰ २ या॰ सः सर्वोन्मादिनी मुद्रात॰ २ या॰ सर्वशादशाकंत॰ २ या॰
सर्वशाशक्तित॰ २ या॰ सर्वशक्ति॰ २ या॰ सर्वैश्वर्यदायिनी॰ २ या॰ १८
सर्वज्ञानमयी॰ २ या॰ सर्वव्याधिविनाशिनी॰ २ या॰ सार्वधारस्वरू

पिणी॰ २ या॰ सर्वपापहरा॰ २ या॰ सर्वानंदमयी॰ २ या॰ सर्वरक्षास्व 569/1970
रूपिणी॰ २ या॰ सर्वेप्सितफलप्रदा॰ २ या॰ ह्रीं क्लीं ब्लें त्रिपुरमालि
नी चक्रेश्वरी॰ २ या॰ प्राकाम्यसिद्धिस्त॰ २ या॰ क्रों महांकुशामुद्रा॰
२ या॰ वशिन्याष्टकं॰ २ या॰ अं १६ र ब्लूं वशिनीवाग्देवता॰ २ या॰ कं
५ कल ह्रीं कल ह्रीं कामेश्वरीवा॰ २ या॰ च ५ न्ब्लीं मोदिनीवा॰ २ या॰
टं ५ य्लूं विमलावा॰ २ या॰ तं॰ ज्म्रीं अरुणावा॰ २ या॰ पं ५ हसलव्यूं ज
यिनीवा॰ २ या॰ यं ४ झमर्यूं सर्वेश्वरी॰ २ या॰ शं ६ क्ष्म्रीं कौलिनीवा॰

सुं.ता.उ. २ या० ह्रीं श्रीं सौः त्रिपुरसिध्या० २ या० भुक्तिसिद्धि० २ या० ह्स्रैं खेचरी
१२ मुद्रा० २ यां यां सां तंरालचतुष्टयायुधदेवतास्त० २ या० यांरांलांवांसां द्रां
द्रीं क्लीं ब्लूं सः जंभनबाणस्त० २ यां० धंथंसंमोहनकोदंडस्त० २ या० आं
ह्रीं वशीकरणपाशास्त० २ यां० क्रों क्रों स्तंभनांकुशास्त० २ यां० ह्सैं ह्स्क्लीं
ह्सौः त्रिपुरजननी० २ या० इच्छासिद्धिस्त० २ या० ह्सौं बीजमुद्रात० २
या० कामेश्वर्यादिदेवतात्रयंत० २ या० वाग्भवकूटे कामेश्वरीत० २ या० १२
कामराजकूटे वज्रेश्वरीत० २ या० या शक्तिकूटे पूर्णभगमालिनी० २ या०

हसकलरडैं हसकलरडीं हसकलरडौं० २ या० त्रिपुरभैरवी० २ या० प्रा
प्तिसिद्धि० २ या० ऐं योनिमुद्रा० २ या० ओंकारपीठदेवतात० २ या० स
र्वात्मकेन मनुना सर्वेश्वरीदेवतात० २ या० सर्वकामसिद्धिस्त० २ या०
त्रिपुरा त्रिपुरेश्वरी त्रिपुरसुंदरी त्रिपुरवासिनी त्रिपुराश्री त्रिपुरमालि
नी त्रिपुरासिद्धा त्रिपुरजननी त्रिपुरभैरवी देव्या स्ताभ्यात स्यैवेनमोनमः
२ या० सर्वकामसिद्धि० २ या० ह्स्रैं ह्स्क्लीं ह्सौः त्रिखंडामुद्रात० २ मा०
इति भगवान् ब्रवीत् ब्रह्मन् इत्येतैर्मंत्रैर्भगवतीं यजेति स ब्रह्म पश्यति

571/1970

सुं·ता·उ· ससर्वंपश्यति सोमृतत्वंगच्छत्येतैर्भगवतीयजेत् ततोदेवीस्वानंदर्शीय
१८ तीनितस्माद्य एतैर्मंत्रैरेवंवेदेति महोपनिषत् इत्यथर्वणीयद्वितीयोप
निषत् २ देवाहवैसुद्रास्सृजेयामितिभगवंतमब्रूवंस्तान्होवाचभ
गवाननीपदजानुमंडलविस्तारपद्मासनंकृत्वामुद्रास्सृजयामितिसर्वस
र्वानाकर्षयतियोनिमुद्राधीतेससर्वंवेत्तिससर्वफलमश्नुतेससर्वान्जं
भयतिसविद्वेषंस्तंभयतिमध्यमनामिकोपरिविन्यस्यकनिष्ठांगुष्ठां १८
गुष्ठरोधितयुक्ताधोतर्जन्योर्दंडबद्धत्वावेवंबद्धाप्रथमासंपद्यतेसैव

मिलितेमध्यमेद्वितीयात्ततीयांकुशाकृरितिप्रतिलोमेनपाणिनोसं
दर्शयित्वांगुष्टौसाग्निमौसमाधायतुरीयापरस्परेणकनीयस्तेमध्य
मांबद्ध्अनामिकदंडिन्यौतर्जन्याबद्धआलिम्यतिष्ठेतांमधमानख
मिलितांगुष्टोपंचमीसैवांकुशेत्यंकुशाकृतिसाषष्ठीदक्षिणोदशेक
रबाकुंकृत्वान्योन्यामिककनीयसेमध्यगतेतर्जन्याक्रांतेसरलांगु
ष्टोखेचरीसप्तमीसर्वोद्धोसर्वसंत्हदिरितिस्वमध्यमानामिकांतरक
नीयेत्येवामतःपार्श्वयोःतर्जन्यंकुशाद्यैर्युक्तासांगुष्टोयातेन्योन्यस

573/1970

मंजलीकृत्वाष्टमीसंपद्यतेइति परस्परमध्यमास्पष्टवर्तिन्यानामिकेत
र्जन्याक्रांतेसमे मध्यमेआदायांगुष्ठौमध्यवर्तिनो नवमीप्रतिपद्यतइ
तिसैवेयंकनीयेसमेंतरितेंगुष्ठौसमामध्यवर्तिनौनवमी वंतरितौकृत्वा
त्रिखंडेयमापद्यतइतिपंचैतेबाणाः पंचाद्यमुद्राः स्पष्टाः क्रोमंकुशोति
हसौः खेचरीझ्रौंबीजाष्टमीवाग्भवाद्यनवमीदशमी संपद्यतइत्येवंवेद
अथातः कामकलाकलालयंव्याख्यास्यामः ह्रीं क्लीं ऐं ब्लूं स्त्रीं एतेपंच १९
कामाः सर्वचक्रंव्याप्यवर्ततेमध्यमकामंसर्वावसानेसंपुटीकृत्वाऐंब्लूं

कारेणासंपुटषट्कंकृत्वादिनद्वयेमध्यवर्तिनीसाध्यंबध्वाभुंजतितच्च
क्रंयोवेत्तिससकलाल्लोकानाकर्षयतिससर्वविद्वेषंस्तंभयतिनीली
युक्तंचक्रंशत्रून्मारयतिपीतद्रव्यैर्गतिंस्तंभयतिलाक्षायुक्तंकृत्वास
सकलल्लोकंवशीकरोतिनवलक्षंकृत्वारुद्रत्वंप्राप्नोतिमातृकयावे
ष्टितंकृत्वाविजयीभवतिभगांकंकुंडंकृत्वाअग्निमाधाययोषितव
शीकरोतिपुरुषोकृत्वात्रिकोणेमेधावीभवतिवृत्ततरुलेकृत्वाश्रियम
तुलांप्राप्नोतिचतुरस्त्रंकृत्वावृष्टिर्भवतित्रिकोणेकृत्वाशत्रून्मारयति

575
1970

सुं.ता.उ. स्तंभयतिपुष्पाणिकृत्वाविजयीभवतिमहारसैर्कृत्वापरमानंदनिर्भ
२० रोभवतिमहारसाःषड्रसाः गणानांत्वागणपतिंहवामहेकविंकवी
नामुपमश्रवस्तमं ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वंनूति
भिःसीदसादनं इत्येवमाद्यमक्षरमंत्यबिंदुपूर्णमित्यनेनगंस्पष्टय
ति गंगणेशंनमस्कुर्यात् ॐनमोभस्मांगरागायरुद्रतेजसेहन २
दह २ पच २ मथ २ विध्वंसय २ हलभंजन २ शूल शूलितंजय २ २०
पूर्वसिद्धिंकुरु २ समुद्रंपूर्वप्रतिष्ठितंशोषय २ स्तंभय २ परयंत्रपच २

मंत्रपच २ भूतपच २ कंदप्रगटय २ छेदविंदरछिंधि २ ह्रीं फट्
स्वाहा अनेनक्षेत्राध्यक्षंजपेदितिकुलकुमारीविद्महेमंत्रकोटिसु 577/1970
धीमहि तन्नःकौलीप्रचोदयात् तिकुमायार्चनंकृत्वायोवैसाधकोभि
लषतिसोमृतत्वंगच्छतिसयशआप्नोतिपरमायुष्यमवाप्यप
भि रब्रह्मणिकृत्वातिष्ठतीत्येवंवेदतिमहोपनिषत् इत्यथर्वणोत्तरी
योपनिषत् ३ ॐदेवाहवैभगवंतमब्रुवन्देवगायत्रीत्हृदयंनो
ख्यातंत्रैपुरंसर्वोत्तमंजातवेदससूक्तेनख्यातंत्रैपुराष्टकंयद्दृष्ट्वामु

सुं.ता.उ. च्यतेजन्मसंसारबंधनादित्येवंब्रुवतांसर्वेषांदेवानांश्रुत्वेदंवाक्यं
२१ इत्यथात्तोत्र्यंबकेनानुष्टुभेनमृत्युंजयंदर्शयतेतस्मात्त्र्यंबकमिति
त्रयाणांपुराणांत्र्यंबकंस्वामिनंतस्मादुच्यतेत्र्यंबकमितिअथकस्मा
दुच्यतेयजामहइतियजामहेस्कमहिज्यतेरक्षरद्वयेनधृष्टत्वेनकूर
त्वेनाक्षरैरनेकेनमृत्युंजयेत्युच्यतेअथकस्मादुच्यतेसुगंधिमितिस
र्वतोयशआप्नोतिअथकस्मादुच्यतेपुष्टिवर्धनमितियःसर्वाल्लोका २१
न्सृजयतियःसर्वाल्लोकांस्तारयतियःसर्वाल्लोकान्व्याप्नोतिअथकस्मा

दुच्यतेउर्वारुकमिवबंधनात्संलग्नत्वात्उर्वारुकमिवमृत्योःसंसार 579/1970
बंधनान्मुक्तिर्भवतिविमुक्तोभवतिअथकस्मादुच्यतेमृत्योर्मुक्षीयमामृ
तादित्यमृतत्वंप्राप्नोतिअक्षयत्वंप्राप्नोतिनित्यत्वंप्राप्नोतिस्वयंरुद्रो
भवतिदेवाहवैभगवंतमूचुःसर्वंतेनाख्यातंअथकैर्मंत्रैर्देवीस्तुता
भगवतीतान्सर्वान्वैष्णवान्सौर्यान्गणेशान्नोब्रूहीतिसहोवाच
ॐत्र्यंबकत्वानुष्टुभेनमृत्युंजयमुपासयेत्पूर्वेणाधनाव्याप्तमका
राक्षरमितिस्मृतंॐनमोशिवायेतिएषमंत्रोपासकोरुद्रत्वंप्राप्नोतिशि

सुं.ता.उ. वत्वंप्राप्नोतिकल्याणंप्राप्नोतियएवंवेद तद्विष्णोःपरमंपदंसदापश्यंति
२२ सूरयः दिवीवचक्षुराततं तद्विप्रासोविपन्यवोजागृवांसः समिंधते।
विष्णोर्यत्परमंपदंविष्णोःसर्वतोमुखस्यस्नेहोयथासफलपिंडेनिमोत
प्रोतमनुव्याप्तंव्यतिरिक्तंव्याप्नुत इतिव्याप्नुतोविष्णोस्तत्परमंपदंपरमंव्यो
ममितिपरमंपदंपश्यतिईक्षंतेसूरयोब्रह्मादयोदेवासइतिसदात्मदयत्रा
धत्तेतितस्माद्विष्णोःस्वरूपंवसतितिष्ठतितोष्ठितिवासुदेवइतिॐनमइ २२
तित्रीण्यक्षराणिभगवतइतिचत्वारिवासुदेवायेतिपंचाक्षराण्येतद्वैवासु

देवस्यातिद्वादशार्णमभ्येतिसोवैष्ठवंवशतिससर्वमायुरेतिविंदतेप्राजा 581/1970
पत्यंरायस्पोषंगौपत्यंचसमश्नुते प्रत्यगानंदंब्रह्मपुरुषंप्रणवस्वरूपं
मकारोंकारइति ज्ञानवान्संभवनितदेतदोमिति हंसःशुचिषद्वसुरंत
रिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जागो
जाऋतजाअद्रिजाऋतंबृहत् हंसइत्येतन्मनोरक्षरद्वितीयेनप्रभायुं
जेतसौरेणाऋतजाअद्रिजाऋतंसत्याप्रभाउषाभिःसर्वसौरमधीतेयः
सर्वंफलमश्नुतेसव्योम्निपरमेधामानिसौरेणावसतेगणानांत्वेतित्रैष्टु

सुं॰ता॰उ॰ भेन पूर्वेणाध्वनामनुनैकाराक्षरेण गणाधिपमभ्यर्च्य गणेशत्वं प्राप्नोति
२३ अथ गायत्री सावित्री सरस्वती अजपा मातृका प्रोक्ता तया सर्वमिदं व्याप्तं ऐं
वागेश्वरी विद्महे क्लीं कामेश्वरी धीमहि सौः तन्नः क्लिन्ना प्रचोदयात् इति
गायत्री प्रातः सावित्री मध्यंदिने सरस्वती सायमिति निरंतरमजपायाहं
स इत्येवं मातृका पंचाशद्वर्णविग्रहेणाकारादिक्षकारांतेव्याप्तानि भुवना
निशास्त्राणि छंदांसीत्येवं भगवती सर्वं व्याप्नोति इत्येवं तस्मैवै नमोनमः
इति तान् ब्रवीदित्येतैर्मंत्रैर्नित्यं देवीं स्तौति स सर्वं पश्यति सोमृतत्वं गच्छ २३

ति य एवं वेदेति महोपनिषत् इत्यथर्वणे चतुर्थोपनिषत् ॥ ७ ३॥
देवा ह वै भगवंतमब्रुवन् स्वामिन्नेव कथितं स्फुटं क्रियाकांडं सविष 583/1970
यत्रिपुरमित्यथ परमनिर्विषयं कथयस्वेति तान्होवाच भगवान्
तुरीयं मायया मत्यायां निर्दिष्टं परमं ब्रह्मेति परमपुरुषं चिद्रूपं पर
मात्मेति श्रोता मंता द्रष्टा द्रष्टा ग्रष्टा अधेष्टा विज्ञाता प्रज्ञाता सर्वेषां
पुरुषाणां अंतरः पुरुषः स आत्मेति विज्ञेयः न तत्र लोकाः न तत्र देवाः न
तत्र पशवः पशवस्तापसो न तापसः पौल्कसो न पौल्कसौ विप्रा न विप्रा

मुं॰ता॰उ॰ सइत्येकमेवपरब्रह्मविभातिनिर्वाणंनतत्रदेवाः नऋषयः नपितरईशा
२७ नंतत्रप्रतिबुद्धंसर्वविंद्येति अतोनिर्विशयंनित्यंमनस्कार्यंमुमुक्षुणा
यतोनिर्विषयस्यास्यमनसोमुक्तिरिष्यते मनोहिद्विविधंप्रोक्तंशुध्यं
चाशुध्यमेवच अशुध्यंकामसंकल्पंशुध्यंकामविवर्जितं मनएवमनु
ष्याणांकारणंबंधमोक्षयोः बंधस्यविशयासक्तेस्युक्तोनिर्विषयंमनः
निरस्तविषयासंगंसन्निरुद्धंमनोत्हृदि यदायात्युन्मनीभावस्तदातत्प २८
रंमपदं तावदेवनिरोद्धव्यंयावद्हृद्धिगतंक्षयं एतत्ज्ञानंचध्यानंचशे

षोन्याग्रंथविस्तरं नैवचिंत्यनचाचिंत्याचिंत्यंचाचिंत्यमेवच पक्षपात
विनिर्मुक्तः ब्रह्मसंपद्यतेस्वयं स्वरेणसल्लुयेद्योगी स्वरसंभावयत्परं
अस्वरेणेकभावेनभावोभावइष्यते यदेवनिष्कलंब्रह्मनिर्विकल्पंनि
रंजनं तद्ब्रह्माहमितिज्ञात्वाब्रह्मसंपद्यतेक्रमात् निर्विकल्पमनस्तत्वं
हेतुदृष्टांतवर्जितं अप्रमेयमनाद्यंचतज्ज्ञात्वामुच्यतेबुधः ननिरोधो
नचोत्पत्तिर्नबंधोनचसाधकः नमुमुक्षुर्नैवमुक्तिरित्येषापरमार्थ
ता एकेवआत्मामंतव्योजाग्रत्स्वप्नसुषुप्तिषु स्थानत्रयाद्यतीतस्यपु

585
1970

सुं·ता·उ· नर्जन्मनविद्यते एकएवतुभूतात्माभूतेभूतेव्यवस्थितः एकधाबहु
२५ धाचैवदृश्यतेज्वलचंद्रवत् घटसंहृतमाकाशंभिद्यमानेयथाघटे घ
टोलीयेतनाकाशेतथोजीवोनभोपमः घटवद्विविधाकारंभिद्यमाने
यथाघटे तद्भेदेननजानातिसजानातिचनित्यशः सचमायावृतोया
वत्तावत्तिष्ठतिपुष्कले भिन्नेतमसिचैकत्वान्मेकमेवानुपश्यति शब्दा
र्णवंपरंब्रह्मतस्मिन्क्षीणेयदक्षरं तद्विद्वानाक्षरंध्यायेत्तदिच्छेच्छांति २५
मात्मनः द्वेतुब्रह्मणिमंतव्येशब्दब्रह्मपरंचयत् शब्दब्रह्मणिनिष्णा

तःपरब्रह्माधिगच्छति ग्रंथमभ्यस्यमेधावीज्ञानविज्ञानतत्परः पला
लमिवधान्यार्थीत्यजेद्ग्रंथमशेषतः गवामनेकवर्णानांक्षीरंस्याप्ये 587/1970
करूपता क्षीरंवपश्यतेज्ञानीलिंगनाशोयथागवां ज्ञाननेत्रंसमा
दायसमुद्धृत्यपरंपदं निष्कलंनिश्चलंशांतंतद्ब्रह्माहमितिस्मृतं
इत्येकंपरमंब्रह्मस्वरूपंसर्वदेहिषु सर्वभूतानिवासंतुतुरीयंयो
जनानिते सोक्षरेपरमेव्योमंन्यधिवसन्नेवमश्नुते यएतांविद्यांतु
रीयांब्रह्मयोनिस्वरूपांतामिमाह्यपुण्येशरणंग्रहांप्रपद्येकोशाद्य आ

मं.ता.उ. नुक्रमेण सर्वेषांवा एतद्भूतानामाकाशादेव पराणि सर्वाणिह वा इ
२६ मानिभूतानि आकाशवज्जायंते तस्मादेवजातानि जीवंति तस्मादा
काशंबीजंविद्यांतदेवाकाशपीठंशांतिततः पीठममृतपीठंजानी
यात् योजानीते सोमृतत्वंच गच्छति तस्मादेतांविद्यांतुरीयांकामरा
जाख्यामेकादधानन्निमित्तोन्नमितांजानीते सतुरीयंपदंप्राप्नोत्ये
वंवेदेति महोपनिषत् इत्यथर्वणेपंचमोपनिषत् ५ एवंजाना २६
तियत्तत्वंबीजोपनिषदंगणं पंचकंपरमेव्योम्निलीयतेमुनिपुंगवः

निवृत्तिश्चप्रतिष्ठाचविद्याशांतिस्तथैवच अतीताचकलाःपंचषडं
गादिसमावृताः तत्कथंनिवृत्तिकलाद्याः पृथिव्यादिगुणप्रकृत्यंतं 589/1970
चतुर्विंशत्यात्मतत्वैः पृथिव्यामष्टोत्तरशतंपयसितेजसिमरुतिगं
धाद्यहंकारांतेषुबुधागुणप्रकृतौचप्रत्येकाष्टमितिषष्ठ्याधिकांतं
संख्येभुवनैर्नक्षत्रवर्णनव्योमव्यापिमंत्रस्यांतिकपदादिमहादे
वपदाद्यष्टाविंशतिभिः पादेत्हृदयशौताभ्यांद्वाभ्यांमंत्राभ्यांबृह जाता
स्पतेर्ब्रह्मणोधितिष्ठतामूलादिनाभ्यंतंव्यापकंशिरसिरू

सं·ता·उ· ढंप्रज्वलितंदहनोज्वालोल्लसिन्यत्रिमात्रामेधाख्याकमलाकल्पतइतिप्रथ
२७ मस्याह्प्रतिष्ठाकलायाःपुरुषादिकलांतेनतत्वमित्युपनिषत् ॥ ६ ॥

२८

591/1970

अथदेवीउपनिषत्प्रारंभः श्रीः

श्रीगणेशायनमः ॐम् पूर्णमदःपूर्णमदंपूर्णात्पूर्णः
मदच्युतेपूर्णस्यपूर्णमादायपूर्णमेवावशिष्यते ॐगु
रुःशिवःसर्वकारणभूताशक्तिःतेननवरंध्ररूपोदेहः
नवशक्तिस्वरूपंश्रीचक्रंवाराहीक्रियाशक्तिःपीठंकुलकुं
डलिनीज्ञानशक्तिर्गृहंतत्सामरस्येच्छाशक्तिर्देवताश्रीम १
हांत्रिपुरसुंदरीब्रह्मस्वरूपिणीपितृरूपाकुरुकुल्लाबली

देवतामातापुरुषार्थसागराःदेहोनवरत्नद्वीपःत्वगादिसप्त 593/1970
धातुभिःअनियुक्ताःसंकल्पाःकल्पतरनतेजःकल्पतरको
द्यानंतरसनयाभाव्यमानःमधुराम्ललवणकटुकषायति
क्तरसाषड्रतवस्तानमग्निःज्ञेयंहविःज्ञानज्ञातृज्ञेयादीना।
मभेदभावनंश्रीचक्रपूजनंनियतःशृंगारादयोनवरसा।
अणिमादयःकामक्रोधलोभमोहमदमात्सर्यपुण्यपाप

देवी० मयाब्राह्म्याद्यष्टसिद्धयः मूलाधारस्वाधिष्ठानेमणिपूरा उप०
नाहतविशुध्याख्याललाटसीमंतबिलाद्याधारनवकमुद्रा
शक्तयः त्वक्चक्षुश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूप
स्थमनोविकाराः कामाकर्षिण्यादिषोडशशक्तयः अलंबु
षाकुहूविश्वोदरिवरुणाहस्तिनिजिह्वायशोदरीगांधारिभू २
षाशंखिनीसरस्वतीइडापिंगलासुषुम्नाख्याश्चतुर्दशनाड्याः

सर्वसंक्षोभिण्यादिदेवताः चतुर्दशोरगाः शीतोष्णसुखदुः 575/1970
खद्याः इच्छासत्वरजस्तमोगुणामनोविकाराः मनइक्षुधनुःरा
गः पाशः क्रोधोंकुशः अव्यक्तमहत्तत्वाहंकाराइतिकामेश्वरी
वज्रेश्वरीभगमालिन्यांतःस्त्रिकोणदेवताः पंचदशतिथिरू
पेणकालस्यपरिणामावलोकनंपंचदशनित्याः श्रद्धानित्य
रूपाधिकादेवतासाचकामेश्वरीसदानंदनाथापरिपूर्णस्वा
त्मैक्यपरादेवतासलिलमितिसोहित्यकरणंएतद्विमर्शना

नांचित्तत्वेनचसंसिद्धिंतस्यबाह्याभ्यंतःकरणनामेकरूप्यवि
तिरासनंरक्तशुक्लपदैकीकरणंपाद्यंउज्वलनादानुसंधानंम:
ध्यसस्यश्रुतिसिद्धमित्याचमनंचिच्चंद्रमसिसर्वांगप्लावनंस्ना
नंचिदाग्निरूपपरमानंदस्त्रीकरणंवस्त्रंप्रत्येकंसत्यविंशति:
।धाभिन्नस्वात्मज्ञानक्रियात्मकसद्योजातवामदेवात्मकब्र:
त्मग्रंथिविसर्जनंतुब्रह्मनाडिब्रह्मसूत्रंस्वव्यतिरिक्तवस्तुसंग २
रहितस्फुरणंविभूषणंचित्सुखपरिपूर्णानुस्मरणंगंध:सम

स्तविषयाणांमनसिस्थैर्यानुसंधानंकुसुमंतेषामेवसर्वदास्वी 547/1970
करिणीयार्थमितिधूप:वहनासावह्निमऊर्ध्वज्वलसच्चित्प्रका
शोदीप:द्वैताद्वैतविसर्जनंनैवेद्यंअवस्थात्रयमेकीकरणंतां:
बूलंदेहात्मशून्यपरमामृतनिमज्जनंबलिहरणंचित्तमस्तिक
र्तव्यमकर्तव्यमित्यात्मविलापनंहोम:स्वयंतत्पादुकांतनीतज
लंपरिपूर्णध्यानंमूलाधारादिब्रह्मरंध्रपर्यंतंब्रह्मरंध्रादिमूला
धारपर्यंतंगतागतरूपेणप्रादक्षिण्यंतुर्यावस्थानमस्कार:एवं

मुहूर्तत्रयमुहूर्तद्वयंमुहूर्तमात्रंभावनापरोजीवन्मुक्तोभवति
तस्यदेवतात्मैक्यसिद्धिःचिंतितकार्याण्ययत्नेनसिध्यंतिसएवं
शिवयोगीतिनिगद्यतेशाठिनमनोलोयंभावनोपनिषत् छ
इतिदेवीउपनिषत्समाप्तः शुभंभवतु छ छ

६

Paingal - Upanishad

511
1970

॥इतिपैंगलोपनिषत्समाप्ता॥

पैंगलो॰ श्रीगणेशायनमः हरिः ॐ अथहैनंपप्रच्छयाज्ञवल्क्यंज्ञानि
१ नः किंकर्मकाचस्थितिरितिसहोवाचयाज्ञवल्क्यः अमानि
त्वादिसाधनसंपन्नोमुमुक्षुरेकविंशतिकुलान्तारयति ब्रह्म
विद्धीमानेकोत्तरशतकुलान्तारयतिलोकइवचरेद्देहीति द
हाधिमुक्तश्चानिकेतनः आत्मानंरथिनंविद्धिशरीरंरथमेव
तु इंद्रियाणिहयानाहुर्मनःप्रग्रहमेवच जगोनित्वविमाना १
नित्हृदयानिमनीषिणां ततोनारायणःसाक्षीहृदयेसुप्रतिष्ठि

तः प्रारब्धकर्मपर्यंतमहिनिर्मोकवद्यथा तीर्थेश्वपचगृहे
वातनुंविहाययातिकैवल्यं प्राणान्विकीर्यपश्चाद्दिग्बलिंकु
र्यात् आवासवसनंचरेत् पुंसांप्रव्राजिनः प्रोक्तंनेतरायक
दाचन सनाशौचंनाग्निकार्यंनापिंडंनोदकक्रिया नकुर्यात्सा
र्वणादीनिब्रह्मभूतायभिक्षवे दग्धस्यदहनंनास्तिपक्वस्यप
चनंयथा ज्ञानाग्निनाचदग्धस्यनश्राद्धंनचतत्क्रिया याव
दुपाधिपर्यंतंतावच्छुश्रूषयेद्गुरुं गुरुवद्गुरुभार्यांचेतत्पुत्रेषुच

601/1970

पैंगलो॰उ॰ वर्तनं शुध्यमानसः शुद्धचिद्रूपः सहिविष्णुः सोहमस्मीति
२ सर्वशः शास्त्रानलाध्येस्क ब्रह्मज्ञानी मृतोयदि मुंडनंचोपवा
संचसन्यासोव्रतधारणं तीर्थयात्राभिगमनंज्ञानिनां पंचव
र्जयेत् ॥ सहनाववितिशांतिः ॥ ॥ इतिपैंगलोपनिषत्समाप्ता

२

603/1970

प्रारंभ

॥ इतिभिक्षुकोपनिषत्समाप्ता ॥

श्रीगणेशायनमः श्रीगुरुभ्योनमः अथभिक्षूणांमोक्षा
धिकारिणां कुटीचकबहूदकहंसपरमहंसाश्चेति तत्रचत्वा
रः कुटीचकाः गौतमभरद्वाजयाज्ञवल्क्यवसिष्ठप्रभृतयोऽष्टौ
ग्रासांश्चरंतोयोगमार्गेणमोक्षमेवप्रार्थयंति अथबहूदकास्त्रि
दंडकमंडलुशिखायज्ञोपवीतकाषायवस्त्रधारिणोब्रह्मर्षी
द्रियेषुदमः मधुमांसंवर्जयित्वागोमूत्रगोमयाहारिणोनित्यंचां
द्रायणपरामोक्षमेवप्रार्थयंते अथहंसाः वृक्षमूलशून्यागारदे

वगृहश्मशानवासिनोवासांबरावादिगंबरावाअष्टौग्रासान्
भैक्ष्यचरणंकृत्वामोक्षमेवप्रार्थयंते अथपरमहंसाः ग्रामेचै
करात्रंनगरेपंचरात्रंतीर्थेसप्तरात्रंतदुपरिनवसेत् नतेषांधर्मा
धर्मौलाभालाभौशुद्धाशुद्धौद्वैतवर्जिताः समलोष्टाश्मकांचनाः
सर्ववर्णेषुभैक्ष्यचरणंकृत्वासर्वत्रात्मानमेवपश्यंति ततःपरम
हंसाः संवर्तकारुणिश्वेतकेतुजडभरतदत्तात्रेयशुकवामदेवह
रीतकप्रभृतयोऽष्टौग्रासांश्चरंतोयोगमार्गेणमोक्षमेवप्रार्थये

605/1970

भि॰उ॰
२

तै जातरूपधरा निर्द्वंद्वा निःपरिग्रहाः शुक्लध्यानपरायणा आ
त्मनिष्ठाः प्राणसंधारणार्थे यथोक्तकाले भैक्ष्यमाचरंतः शून्या
गारदेवगृहतृणकूटवल्मीकवृक्षमूलकुलालशालाग्निहोत्र
नदीपुलिनगिरिगह्वरगुहाकंदरकोटरनिर्झरस्थलेषु तत्वेब्र
ह्ममार्गसंपन्नाः शुद्धमानसाः परमहंसाचरणेन सन्यासेन देह
त्यागं करोति स परमहंसनामेति ॐ सहनाविति शांतिः इति भि २
क्षुकोपनिषत्समाप्ता॥ ५ ॥ ५ ॥ ५ ॥ ५ ॥ ५

607
1970

अथ लांगूलोपनिषत्प्रारंभः श्रीः

श्रीगणेशायनमः श्रीसीतारामचंद्रायनमः श्रीहनुमद्दाय॰
ॐअस्यश्रीअनंतघोरंप्रलयज्वालाग्निरौद्रस्यवीरहनुमान्
असाध्यसाधनअघोरास्त्रयोमूलमंत्रस्य ईश्वरऋषिः श्री
रामलक्ष्मणोदेवता अनुष्टुपछंदासि सौंबीजं अंजनीसू
नुरितिशक्तिः वायुपुत्ररितिकीलकं श्रीहनुमान्प्रसादसि
ध्यर्थेभूर्भुवःस्वःस्वर्लोकममाधीननतंपरशोधनार्थेजपेवि १
नियोगः ॐभूः नमोभगवतेदावानलकालाग्निहनुमतेअं

गुष्ठाभ्यांनमः हृदयायनमः ॐभुवः न॰तेचंडप्रतापहनुमते
तर्जनीभ्यांनमः शिरसेस्वाहा ॐस्वः न॰तेचिंतामणिह॰मध्य
माभ्यांनमः शिखायैवषट् ॐमहः न॰तेपातालगरुडह॰अना
मिकाभ्यांनमः कवचायहुं ॐजनः न॰तेकालाग्निरुद्रह॰कनि
ष्ठिकाभ्यांनमः नेत्रत्रयायवौषट् ॐनपःसत्यंन॰तेभद्रजातिनिकट
रुद्रवीरह॰करतलकरपृष्ठाभ्यांनमः अस्त्रायफट् पाशुपतेन
दिक्बंधः अथध्यानं वज्रांगंपिंगनेत्रंकनकमयलसत्कुंडला

609/1910

लांगूलो क्रांतगंडस्भोळीस्तंभसारप्रहरणविवशीभूतरक्षोधिनाथंउ॰ पनिष-
द्धंलांगूलधर्षप्रबलजलनिधिंभीमरूपंकपींद्रं ध्यात्यंतंरामचं
द्रंभ्रमरपरिद्दंसत्वसारंप्रसन्नं १ मानसोपचारैःसंपूज्य ॥
ॐनमोभगवतेदावानलकालाग्निहनुमताययश्रियोजयो
वितानूधवलिकृतजगत्रयवज्रदेहवज्रपुछवज्रकायावज्रतुं
डवज्रमुखव॰नखव॰वाऊव॰रोमव॰नेत्रव॰दंतव॰शरीरमळमा २
त्मकरायभीमकरपिंगलाक्षउग्रप्रलयकालरौद्रवीरभद्रावतार

शारभशालवभैरवदोर्दंडलंकापुरीदाहनउदधिलंघनदशग्रा
ग्रीवकृतांतसीताविश्वासईश्वरपुत्रअंजनीगर्भसंभूतउद 611/1970
यभास्करबिंबानळग्रासकदेवदानवऋषिमुनिर्वंद्यपाशुप
तास्त्रब्रह्मास्त्रवैलवा॰नारायणा॰कालशक्तिका॰दंडका॰पा
शाअघोरास्त्रनिवारणायपाशुपतास्त्र॰ब्र॰वैल॰नारा॰मः
डायसर्वशक्तिग्रसनममात्मरक्षाकरपरविद्यानि॰यआ
त्मविद्यासंर॰यअग्निदीप्तायअथर्वणवेदसिद्धिःस्थिरः

लांगू० काळाग्नि निराहारकवायुवेग मनोवेगश्रीरामतारकपरब्र उप०
ह्म विश्वरूपदर्शन लक्ष्मण प्राण प्रतिष्ठानंदकर:स्थलज
लअग्नि मर्म भेदि २ सर्वशत्रून् छिंधि २ मम वैरिखादन २ म
मसंजीवन पर्वतोत्पाटन डाकिनी विध्वंसन सुग्निव सख्य क
रण निष्कळंक कुमार ब्रह्मचारी दिगंबर सर्वपाप सर्वग्रह कु
मारग्रह सर्व छेदय २ भेदय २ भिधि भिधि खादय २ टंकक कां २
ताडय २ मारय २ शोषय २ ज्वालय २ हरय २ देवतं नाशा० २ अ

निशोष० २ मम सर्वग्रह हनुमानू रक्ष २ ॐ ह्रां ह्रीं ह्रूं हूं फट् घे घे स्वा
हा ~ ॐ नमो भगवते चंडप्रताप ह० ते महावीराय सर्वदु:ख
विनाशनाय ग्रह मंडल भूतडल प्रेत पिशाच म० सर्वत्र उच्चाट
णाय २ अतिभ वादिक रज्वर माहेश्वरज्व० विष्णुज्व० ब्रह्म० वे
ताळ ब्रह्मराक्षसज्व० पित्त० श्लेष्मा सान्निपातकज्व० विषम०
सीतज्व० एकाहिक्य० द्वाहिक० त्रैहिक्य० चातुर्थिक० अर्धमा।
सिक० मासिक० षण्मासिक० सांवत्सरिक अस्थि० अंतर्गतम

लांगू॰ हाअपस्मारभ्रमिक॰भेदय२खादय२ॐह्रांह्रींह्रूंफट्घेघे उप॰
स्वाहा॥ॐन॰तेचिंतामणिह॰तेअंगशूलअक्षशूल॰शिरो॰गु
ल्म॰उदर॰कर्ण॰नेत्रशूल॰गुदशूल॰कटि॰जानु॰जंघ॰हस्त॰पाद॰
गुल्फ॰वात॰पित्त॰वायु॰स्तनशूल॰परिणाम॰परिधाम॰परिवा
ण॰दंत॰कुक्ष॰सुमन॰सर्व॰निर्मूलय२दैत्यदानवकामिनीवे
तालब्र॰कालाहलभागपाशअनंतवासुकीतक्षककर्कोटक ४
लिंगपद्मककुमुदज्वलस्तरोगपाशमहामारीन्कालपाशवि

षनिर्विषंकुरु२ॐह्रांह्रींह्रूंफट्घे२स्वाहा॥ॐह्रींश्रींक्लींग्लां 615/1770
ग्लींग्लूंॐन॰तेपातालगरुडहनुमतेभैरववनपदगजसिंह
इंद्राक्षीपाशबंधछेदय२प्रलयमारुतकालाग्निहनुमंतशृं
गलाबंधविमोक्षयसर्वग्रहछे॰२ममसर्वकार्याणिसाधय२
ममप्रसादंकुरु२ममप्रसन्नश्रीश्रीरामसेवकसिंहभैरवस्व
रूपममरक्ष२ॐह्रांह्रींह्रूंह्रांह्रींह्रौंह्रैंश्रांश्रींक्रांक्रींक्रांक्रीं।
ह्रांह्रींह्रूंह्रैंह्रौंह्रःहांहींहुंहुंखखजयजयंमारणमोहनघूर्णी२

लाङ्गू॰ दम २ मारय २ वानराय २ खे २ ह्रां ह्रीं ह्रूं ह्रुं फट् घे घे स्वाहा ॥ ॐ उप॰
नमो ते कालाग्निरौद्र ह॰ ते भ्राम २ लव २ कुरु २ जय २ हस २ मद २
प्रज्वलय २ मृउय २ त्रस्य २ सह २ वश्य २ सहस्रा मलाय अस्त्रो
भत्रिशूल उमरु खड्ग काल मृत्यु कपाल खट्वांग धारय अभ
य शाश्वताय २ हुं अवतारय २ हुं आद्यंतर भूषणाय परमं
त्र परयंत्र परतंत्र शत सहस्र कोटि तेजः पुंज भेदय २ अग्नि ५
बंध॰ २ वायुबं॰ सर्वग्रह बं॰ २ अनंतादि दुष्ट नागानां द्वादशा

कुले वृश्चिकानां येकादश लुतानां हन २ सर्वविष बं॰ २ वज्रतो 617/1970
तुंगांट उच्चाटण २ मारण मोहन वशीकरण स्तंभन जंभण आ
कर्षण उच्चाटण स्मिलन विद्वेषण युद्ध तर्क मर्म बंधय ॐ कुमा
रीपद त्रिहार बाणोग्र मूर्तये ग्राम वासिने अतिपूर्व शक्ताय स
र्वायुध धराय स्वाहा अक्षयाय घे ४ ॐ लं २ ध्रां ध्रौं स्वाहा ॐ ह्रां
ह्रीं ह्रूं फट् घे २ स्वाहा ॐ श्रां श्रीं श्रूं श्रैं श्रौं श्रः ॐ नमो ते भद्रजानि
कट रुद्र वीर हनुमते टं २ लं २ देवदत्त दिगंबर अष्ट महाशक्तिः

अष्टांगधारयअष्टमहाभैरवनवब्रह्मब्रह्मायंदशाविष्णुरूपा
यएकादशारुद्रावतारायद्वादशार्कतेजायत्रयोदशासोमंम
ममुखायवीरहनुमंतस्तंभिनिमोहिनीवशीकरणीतंत्रैक
सावयवायनगरराजमुखबंधनायबलमुखमकरमुखसं
भ्रमुखजिव्हामुखबंधय२स्तंभय२व्याघ्रमुखसर्वरक्षि
कअग्निज्वालाविषंनिर्गडणसर्वजनवैरीमुखबंधनवा
पवीरहनुमंतईश्वरावतारौवायुनंदनौअंजनीसुतौबंध२

619
1970

श्रीरामचंद्रसेवक ॐ ह्रां२आसय२ह्रीं ह्रांघ्रींक्रींयंभैंभ्रंभ्रः ह
ट्२खट्२सर्वजनविश्वजनशत्रुजनवश्यजनसर्वजनस्पद
शंलंलांश्रींह्रांह्रींमनस्तंभय२भंजय२अद्रि२हींवंहींहींमेस
र्वंहींहींसागरहींहींवंवंसर्वमंत्रार्थअथर्वणवेदसिद्धिकुरु२
स्वाहा श्रीरामचंद्रउवाच श्रीमहादेवउ॰ श्रीवीरभद्रस्तो
वाच त्रिसंध्यंयःपठेन्नरः श्रीअथर्वणरहस्येलांगूलो
पनिषत्समाप्तः श्रीसीतारामचंद्रार्पणमस्तु ६

इत्यथर्वणवेदेलांगूलोपनिषत्संपूर्ण

७

621/1970

॥राम॥अथ परंब्रह्मणोपनिषत्प्रारंभः॥

परब्रह्म श्रीगणेशायनमः॥ भद्रंकर्णेभिरितिशांतिः॥ अथहैनंमहा
१ शालाः शौनकोंगिरसंभगवंतंपिप्पलादंविधिवदुपसंनः
पप्रछदिव्येब्रह्मपुरेसंप्रतिष्ठिताभवंति॥ कथंसृजंनित्यात्म
नएषमहिमाविभज्यंएषमहिमाविभुः॥ कएषतस्मैसहो
वाच॥ एतत्सत्यंयत्ब्रवीमिब्रह्मविद्यांवरिष्ठां॥ देवेभ्यःप्रा
णेभ्यः परंब्रह्मपुरेविरजंनिष्कलंशुभ्रमक्षरंविरजंविभाति
॥सनियछति॥मधुकरराश्यानिर्मकः॥ अकर्मस्वरूपस्थि १
तः॥ कर्मकर्मज्ञात्रकर्मकरोति॥ कर्मकर्मज्ञात्वाकर्मकुर्यात्॥

कोजालंविक्षिपेदेकनैनमपकर्षत्यपकर्षति॥ प्राणदेवताश्च
त्वारः॥ तास्सर्वानाढ्यस्सुषुप्तश्येनाकाशवत्॥ यथाश्येनः
खमाश्रित्ययातिस्वमालयंकुलायं॥ एवंसुषुप्तभ्रूतायंचप
रंच॥ ससर्वत्रहिरण्मयेपरेकोशेअमृतात्धिषानाडित्रयं
संचरति॥ तस्यत्रिपादंब्रह्मएषात्रेष्यततोनुतिष्ठति॥ अन्य
त्रभ्रूतायंचपरंच॥ सर्वत्रहिरण्मयेपरेकोशेयथैवदेवदत्तो
यष्याचताड्यमानोनेनेत्येवमिष्टापूर्तकर्मशुभैर्नलिप्यते॥
यथाकुमारकोनिष्कामआनंदमभियाति॥ यथैषदेवस्व

623
M 20

मआनंदमभियाति॥ वेद एवं परंज्योतिः॥ ज्योतिषामाज्योति
रानंद इत्येवमेव॥ तत्परंयच्चित्तं परमात्मानमानंदयति॥ शुभ्र
वर्णमाजायतेस्वरात्॥ भूयस्तेनैवमार्गेणास्वमस्थानंनियच्छ
ति॥ जळूकाभाववद्यथाकाममाजायतेश्वरात्॥ तावतात्मा
नमानंदयति॥ परसंधयदरसंधयति॥ तत्परंनापरंनापरं
त्यजति॥ तथैवकपालाष्टकंसंधाय॥ य एषस्तनइवावलंब २
ते॥ सेंद्रयोनिः॥ स वेदयोनिरित्यत्रजाग्रति॥ शुभाशुभाति
रिक्तशुभाशुभैरपिकर्मभिर्नलिप्यते॥ य एषदेवान्यदेव

स्येः॥ संप्रसादांतयोस्यसंगच्चिद्रूपःपुरुषः॥ प्रणवहंसःपरं
ब्रह्म॥ न प्राणहंसः प्रणवोजीवः॥ अद्यदेवतानिवेदयंतिय
एवंवेद॥ तत्कथंनिवेदयते॥ जीवस्यब्रह्मत्वमापादयति।
सत्वमाधास्यपुरुषंतस्यांतश्शिखोपवीतत्वंब्राह्मणस्यमु
मुक्षोरंतश्शिखोपवीतधारणं॥ बहिर्लक्ष्यमाणशिखाय
ज्ञोपवीतधारणंकर्मिणोग्रहस्थस्यअंतरुपवीतलक्षणं
तुबहिस्तंतुवदव्यक्तमंतस्तत्वमेकत्वं॥ नसंनासंनसदस
त्भिन्नंनचोभयं॥ नसभागंननिर्भागंनचाप्युभयरूपकं॥

675
1970

परंब्रह्मउ॰ ब्रह्मात्मैकत्वविज्ञानेद्वयमिथ्यात्मकारणादिति॥ पंचपा
२ द्ब्रह्मणो नकिंचन॥ चतुष्पादंतजश्चब्रह्मणश्चत्वारिस्था
नानिनाभिहृदयकंठमूर्द्धसु॥ जाग्रत्स्वप्नसुषुप्तितुरी
यावस्थाआहवनीयगार्हपत्यदक्षिणासभ्याग्निषु॥ जा
गरितेब्रह्मस्वप्नेविष्णुसुषुप्तौरुद्रस्तुरीयमक्षरंचिन्मयं॥
तस्माच्चतुरवस्थासुचतुरंगुलवेष्टनमिवषण्णवतितत्वा
नितंतुवद्विभज्यतदाहितंत्रीगुणीकृत्यद्वात्रिंशत्तत्वनि २
ष्कर्षमापाद्यज्ञानपूतंत्रिगुणस्वरूपंत्रिमूर्तित्वंपृथग्वि
ज्ञायनवब्रह्माख्यनवगुणोपेतंज्ञात्वानवमानमितः त्रिःपु
नःस्त्रिगुणीकृत्यसूर्येद्वाग्निकलास्वरूपत्वेनैकीकृत्यअ
द्वंतरेकत्वमपिमध्येत्रिरावृत्यब्रह्मविष्णुमहेश्वरत्वमनुसं
धायंतमेकीकृत्याचित्ग्रंथावद्वैतग्रंथिंकृत्वानाभ्यादिब्रह्म
बिलप्रमाणंपृथक्पृथक्सप्तविंशतितत्वसंबंधंत्रिगुणो
पेतंत्रिमूर्तिलक्षणलक्षितमप्येकत्वमापाद्यवामांसाद्दि
क्षिणकट्यंतविभाव्याधंतग्रहसंमेकनेमेकंज्ञात्वामूल
मेकंसत्वंमृण्मयंविज्ञातंस्यात्॥ वाचारंभणंविकारोना

627/1970

मधेयं मृत्तिकेत्येवं सत्यं हंसेतिवर्णद्वयेनां तच्छिखोपवी
तित्वं निश्चित्य ब्राह्मणत्वं ब्रह्मध्यानाहत्वं निश्चित्य ब्राह्म
णत्वं यतित्वमलक्षितां तां शिखोपवीतित्वं एवं बहि
र्लक्षितकर्मा शिखायज्ञोपवीतं गृहस्थस्याभासब्राह्मण
त्वस्य केशसमूहशिखा प्रत्यक्षकार्पासतंतुकृतोपवीतित्वं
चतुर्गुणीकृत्य चतुर्विंशतितत्त्वापादनतंतुकृत्यं नवतत्त्वमे
कमेव परंब्रह्म। तत् प्रतिसरयोग्यत्वात् बकुमार्गप्रवृत्तिं
कल्पयंति॥ सर्वेषां ब्रह्मादीनां देवर्षीणां मनुष्याणां मुक्ति

रेका ब्रह्मैकमेव ब्राह्मणत्वमेकमेव॥ वर्णाश्रमाचारविशे 629/1970
षाः पृथक् पृथक्॥ शिखा वर्णाश्रमीणामेकमेव॥ अपव
र्गस्य यतेश्शिखायज्ञोपवीतमूलं प्रणवमेकमेव वदंति॥
हंसश्शिखा प्रणवमुपवीतं नादस्संधानं एष धर्मो नेतरो
धर्मः॥ तत्कथमिति प्रणव हंसो नादस्त्रिवृत सूत्रं स्वत्हृदि
चैतन्ये तिष्ठति। त्रिविधं ब्रह्म तद्विधि॥ प्रापंचीकशिखोप
वीतं त्यजेत्॥ सशिखं वपनं कृत्वा बहिस्सूत्रं त्यजेत् बुधः
॥ यदक्षरं परंब्रह्म तत्सूत्रमिति धारये॥ पुनर्जन्मनिवृ

त्यर्थं मोक्षस्याहर्निशं स्मरेत्॥ सूचनात् सूत्रमित्युक्तं सू
त्रं नाम परं पदं॥ तत्सूत्रं विदितं येन स मुमुक्षुः स भिक्षुकः॥
स वेदवित् सदाचारी स विप्रः पंक्तिपावनः॥ येन सर्वमिदं
प्रोतं सूत्रे मणिगणा इव॥ तत्सूत्रं धारयेत् योगी योगवित्
ब्राह्मणो यतिः॥ बहिस्सूत्रं त्यजेद् विप्रो योगवित् ज्ञानतत्प
रः॥ ब्रह्मभावमयं सूत्रं धारयेद्यस्स मुक्तिभात्॥ नाशुचि
त्वं नचोच्छिष्टं तस्य सूत्रस्य धारणात्॥ सूत्रमंतर्गतं येषां ज्ञा
नयज्ञोपवीतिनां॥ ये तु सूत्रविदो लोके ते च यज्ञोपवीतिनः॥

ज्ञानशिखिनो ज्ञाननिष्ठा ज्ञानयज्ञोपवीतिनः॥ ज्ञानमे
व परं तेषां पवित्रं ज्ञानमीरितं॥ अग्नेरिव शिखा नान्या
यस्य ज्ञानमयी शिखा॥ स शिखीत्युच्यते विद्वान् नेतरे 631/1970
केशधारिणः॥ कर्मण्यधिकृता ये तु वैदीके लौकिकेपि
वा॥ ब्राह्मणाभासमात्रेण जीवंते कुक्षिपूरकाः॥ व्रजं
ते निरयं ये तु जन्मजन्मनि जन्मनि॥ वामांसदक्षकट्यं तं
ब्रह्मसूत्रं तु सव्यतः॥ अंतर्बहिरिवात्यर्थं तत्वतंतु समन्वि
तं॥ नाभ्यादि ब्रह्मरंध्रांतं प्रमाणं धारयेत् सुधीः॥ नाभिर्यो

परंब्रह्मउ· यमिदंसूत्रंक्रियांगंतंतुनिर्मितं॥शिखाज्ञानमयीयस्य
६ उपवीतंचतन्मयं॥ब्राह्मण्यंसकलंतस्यनेतरेषांनकिं
चन॥इदंयज्ञोपवीतंतुपरमंयत्परायणं॥विद्वान्यज्ञो
पवीतीसधारयेद्यस्समुक्तिभाक्॥बहिरंतश्चोपवी
तिविप्रस्सन्यस्तुमर्हति॥तस्मात्सर्वप्रयत्नेनमोक्षापे
क्षीभवेद्यतिः॥बहिस्सूत्रंपरित्यज्यस्वांतस्सूत्रंतुधारये ६
त्॥बहिःप्रपंचशिखोपवीतित्वमनादृत्यप्रणवहंसशि
खोपवीतित्वमवलंब्यमोक्षसाधनंकार्यादित्याहभग

परंब्रह्मउ· वान्शौनकइत्युपनिषत्॥ ॥इतिपरंब्रह्मोपनिषत्
७ समाप्तः॥ ॥शके१७५५ विजयनामसंवत्सरेकार्ति
कमासेशुक्लपक्षेपंचम्यांतिथौस्थिरवासरेइदंपुस्तकं॥

७

॥इतिपरंब्रह्मणोपनिषत्समाप्तः॥

श्रीगणेशायनमः॥ ॥ॐ उपासनाश्रितोधर्मोजातेब्रह्मणिवर्तते॥
प्रागुत्पत्तेरजंसर्वंतेनासौकृपणः स्मृतः॥अतोवक्ष्याम्यकार्पण्यम
जातिसमतांगतिं॥यथानजायतेकिंचित्जायमानंसमंततः॥आत्मा
ह्याकाशवज्जीवैर्घटाकाशैरिवोदितः॥घटादिवच्चसंघातैर्जातावेत
न्निदर्शनं॥घटादिषुप्रलीनेषुघटाकाशादयोयथा॥आकाशेसंप्र
लीयंतेतद्वज्जीवाइहात्मनि॥यथैकस्मिन्घटाकाशेरजोधूमादि
भिर्युते॥नसर्वेसंप्रयुज्यंतेतद्वज्जीवासुखादिभिः॥ १ ॥रूपका
र्यसमाख्याश्चभिद्यंतेतत्रतत्रवै॥आकाशस्यनभेदोस्तितद्वज्जीवे
षुनिर्णयः॥नाकाशस्यघटाकाशोविकारावयवौतथा॥यथाभवति

633
1970

अद्वैताख्य १ बालानांगगनंमलिनंमलैः॥तथाभवत्यबुद्धानामात्मापिमलिनोम प्र.३.
लैः॥मरणेसंभवेचैवगत्यागमनयोरपि॥स्थितौसर्वशरीरेषुआका
शेनाविलक्षणः॥संघाताःस्वप्नवत्सर्वेआत्ममायाविसर्जिताः॥आ
धिक्येसर्वसाम्येवानोपपत्तिर्हिविद्यते॥ २ ॥रसादयोहियेकोशाव्या
ख्यातास्तैत्तरीयके॥तेषामात्मापरोजीवःखंयथासंप्रकीर्तितः॥
द्वयोर्द्वयोर्मधुज्ञानेपरंब्रह्मप्रकाशितं॥पृथिव्यामुदरेचैवयकाशः
प्रकाशितः॥जीवात्मनोरनन्यत्वमभेदेनप्रशस्यते॥नानात्वंनिंद्यते
यच्चतदेवंहिसमंजसं॥जीवात्मनोपृथक्त्वंयत्प्रागुत्पत्तेःप्रकीर्तितं। १
भविष्यद्वृत्त्यागौणंतन्मुख्यत्वंहिनयुज्यते॥मृल्लोहविस्फुलिंगाद्यैः

सृष्टिर्याचोदितान्यथा॥उपायःसोवताराय नास्तिभेदःकथंचन ३
अश्रमास्त्रिविधाहीनमध्यमोत्कृष्टदृष्टयः॥उपासनोपदिष्टेयंतदर्थंम
नुकंपया॥स्वसिद्धांतव्यवस्थासुद्वैतिनोनिश्चितादृढं॥परस्परंविरु
ध्यंतेतैरयंनविरुध्यते॥माययाभिद्यतेह्येतन्नान्यथाजंकथंचन॥
तत्वतोभिद्यमानेहिमर्त्यताममृतंव्रजेत्॥अजातस्यैवभावस्यजा
तिमिच्छंतिवादिनः॥अजातोह्यमृतोभावोमर्त्यतांकथमिष्यति॥
नभवत्यमृतंमर्त्यंनमर्त्यममृतंतथा॥प्रकृतेरन्यथाभावोनकथं
चिद्भविष्यति॥स्वभावेनामृतोयस्यभावोगच्छतिमर्त्यतां॥कृतकेना
मृतस्तस्यकथंस्थास्यतिनिश्चलः॥भूततोभूततोवापिसृज्यमा

635/1970

अद्वैताख्यं २ नेसमाद्युतिः॥निश्चितंयुक्तियुक्तंचयत्तद्भवतिनेतरत्॥नेहनानेतिचा प्र·३·
श्रीयादिंद्रो मायाभिरित्यपि॥अजायमानोबहुधामायायाजायतेतु
सः॥संभूतेरपवादाच्च संभवः प्रतिषिध्यते॥कस्त्वेनंजनयेदितिका
रणंप्रतिषिध्यते॥ ५ ॥सएषनेतिनेतीतिव्याख्यातंनिह्नुतेयतः॥
सर्वमग्राह्यभावेनहेतुनाजंप्रकाशते॥सतोहिमाययाजन्मयुज्यते
नतुतत्त्वतः॥तत्त्वतोजायतेयस्यजातंतस्यहिजायते॥असतोमाय
याजन्यतत्त्वतोनैवयुज्यते॥वंध्यासुतेनतत्त्वेनमाययावापिजायते॥
यथास्वप्नेद्वयाभासंस्पंदतेमाययात्मनः॥तथाजाग्रद्द्वयाभासंस्पंदते २
माययामनः॥ ६ ॥अद्वयंचद्वयाभासंमनःस्वप्नेनसंशयः॥अद्वयं

गौ° चद्वयाभासंमनःस्वप्नेनसंशयः॥अद्वयंचतथाभासंतथाजाग्रन्नसं 637/1970
शयः॥मनोदृश्यमिदंद्वैतंयत्किंचित्सचराचरं॥मनसोह्यमनीभावे
द्वैतंनैवोपलभ्यते॥आत्मासत्यानुबोधेननसंकल्पयतेतदा॥अम
नस्तांतदायातिग्राह्याभावेतदग्रहं॥अकल्पकमजंज्ञानंज्ञेयाभिन्नंप्र
चक्षते॥ब्रह्मज्ञेयमजंनित्यमजेनाजंविबुध्यते॥निगृहीतस्यमनसो
निर्विकल्पस्यधीमतः॥प्रचारःसतुविज्ञेयःसुषुप्तेन्योन्यतत्समः॥
७ ॥लीयतेहिसुषुप्तेननिगृहीतंनलीयते॥तदेवनिर्भयंब्रह्मज्ञा
नालोकंसमंततः॥अजमनिद्रमस्वप्नमनामकमरूपकं॥सकृद्वि
भायंसर्वज्ञंनोपचारःकथंचन॥सर्वाभिलापविगतःसर्वचिंतास

अद्वैताख्यं सुच्छितः स प्रशांतः सकृज्ज्योतिः समाधिरचलोभयः॥ ग्रहोनतत्र नो प्र.ठ.
२ त्सर्गश्चिंता यत्र न विद्यते॥ आत्मसंस्थं तदा ज्ञानमजातिसमतां गतं॥ अ
स्पर्शयोगो नामायं दुर्दर्शः सर्वयोगिभिः॥ योगिनो बिभ्यति यस्मादभ
ये भयदर्शिनः॥ ८ ॥ मनसो निग्रहोयत्तदभयं सर्वयोगिनां॥ दुःख
क्षयः प्रबोधश्चाप्यक्षया शांतिरेव च॥ उत्सेक उदधेर्यद्वत्कुशाग्रेणै
कबिंदुना॥ मनसो निग्रहस्तद्वद्भवेदपरिखेदतः॥ उपायेन निगृह्णी
याद्विक्षिप्तं कामभोगयोः॥ सुप्रसन्नं लये चैव यथा कामो लयस्त
था॥ दुःखं सर्वमनुस्मृत्य कामभोगान्निवर्तयेत्॥ अजं सर्वमनुस्मृ २
त्य जातं नैव तु पश्यति॥ लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः॥

सकषायं विजानीयाच्छमप्राप्तं न चालयेत्॥ ९ ॥ नास्वादयेत्सु 639/1970
खं तत्र निःसंगः प्रज्ञया भवेत्॥ निश्चलं निश्चरच्चित्तमेकीकुर्या
त्प्रयत्नतः॥ यदा न लीयते चित्तं न च विक्षिप्यते मनः॥ अनिंगितमना
भासं निष्पन्नं ब्रह्म तत्तदा॥ स्वस्थं शांतं सनिर्वाणमकथ्यं सुखमुत्त
मं॥ अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते॥ न कश्चिज्जायते जीवः सं
भवोस्य न विद्यते॥ एतत्तदुत्तमं सत्यं यत्र किंचिन्न जायते॥ यत्र किं
चिन्न जायत इति॥ १० ॥ इत्यथर्ववेदे अद्वैताख्यं प्रकरणं उपनि
षत्समाप्तं॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७७

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY.

॥इत्यथर्ववेदअद्वैताख्यंप्रकरणं०॥

641
1970

॥अथसर्वोपनिषद्प्रारंभः॥ छ ॥

श्रीगणेशायनमः॥ ॐशांतिःशांतिःशांतिः॥ ॐ कथंबद्धःकथंमोक्षः
काविद्याकाविद्याचेति॥कथंजाग्रत्स्वप्नंसुषुप्तितुरीयंचेति॥कथंअन्न
मयप्राणमयमनोमयआनंदमयः।कथंकर्ताजीवःक्षेत्रज्ञःसाक्षीकूट
स्थांतर्यामि।कथंप्रत्यगात्मापरमात्माआत्मामायेति॥कथमात्मेश्वरः
अनात्मनोदेहादीन्आत्मत्वेनअभिमन्यतेसोभिमानआत्मनोबंधः
स्तंनिवृत्तिर्मोक्षः॥तंअभिमानंकारयतिसाविद्या॥सोभिमानोयथाभि
निवर्ततेसाविद्या॥मनादिचतुर्दशकारणैःपुष्करैरादित्याद्यनुगृही
तैःशब्दादीन्विषयान्स्थूलान्यदोपलभ्यतेतदात्मनोजागरणं॥तद्वा
सनासहितैश्चतुर्भिःकरणैःशब्दाद्यभावेपिवासनामयान्शब्दादीन्सू

क्ष्मान्यदोपलभ्यतेतदात्मनःस्वप्नं।मनादिचतुर्दशकरणोपरमाद्वि
शेषाविज्ञानाभावात्यदाशब्दादीन्नोपलभ्यतेतदात्मनःसुषुप्तिः॥अव
स्थात्रयभावाभावसाक्षीस्वयंभावाभावरहितंनैरंतर्यंचैतन्यंयदातदा
तुरीयंतच्चैतन्यमित्युच्यते॥त्वक्रुधिरमांसमेदोमज्जास्थिषट्केनअन्न
कार्याणांकोशानांसमूहोन्नमयःकोशइत्युच्यते॥प्राणादिदशवायुभेदे
नअन्नमयकोशेयदावर्ततेतदाप्राणमयकोशइत्युच्यते।तत्कोशद्वय
संयुक्तंमनादिचतुर्दशभिःकरणैः।आत्माशब्दादिविषयसंकल्पादिध
र्मान्यदाकरोतितदामनोमयकोशइत्युच्यते।एतत्कोशत्रयसंयुक्तंत
द्गतविशेषाविशेषज्ञानंयदाभासतेतदाविज्ञानमयःकोशइत्युच्यते॥५

643/1970

सर्वोप- एतत्कोशचतुष्टयस्वकारणाज्ञानेवटकणिकायामिवगुप्तवटवृक्षोयदा
२ वर्त्ततेतदाअनंदमयकोशः कोशइत्युच्यते॥ सुखदुःखबुध्याश्रयोदेः
हांतर्वर्त्तः। यदेष्टेष्टविषयेसुखदुःखबुद्धिः॥ अनिष्टविषयेदुःखबुद्धिः॥ श
ब्दस्पर्शरूपरसगंधाःसुखदुःखहेतवः पुण्यापुण्यकर्मानुसारीभूत्वा
यदातदाकर्त्तेत्युच्यते। प्राप्तशरीरसंधिबंधविषयोगमप्राप्तशरीरसंयो
गमिवकुर्वाणोयदादृश्यतेतदोपहितत्वाज्जीवइत्युच्यते। मनादिश्चप्रा
णादिश्चसत्वादिश्चइच्छादिश्चपुण्यादिश्चएतेपंचवर्गाइत्येषांपंचवर्गा
णांधर्मीभूत्वाआत्मज्ञानादृश्यतेनविनश्यति। आत्मसंनिधौनित्यत्वेनप्र
तीयमानआत्मोपाधिर्यल्लिंगशरीरंयत्हृदयग्रंथिः इत्युच्यते। तत्रयत्प्र २

काशतेचैतन्यं। सक्षेत्रज्ञउच्यते। ज्ञातृज्ञानज्ञेयानामाविर्भावति। रोभाव
ज्ञातास्वयमेवमाविर्भवतिरोभावहीनः स्वयंज्योतिः साक्षीत्युच्यते। ब्रह्मा
दिपिपीलिकापर्यंतसर्वप्राणिबुद्धिष्वनिष्ठितयोपलभ्यमानः सर्वप्राणि
बुद्धिस्थोयदाभासतेतदाकूटस्थइत्युच्यते। कूटस्थोपहितभेदानांस्वरू
पलाभात्प्रभुर्भूत्वामणिगणसूत्रमिवसर्वक्षेत्रेष्वनुस्यूतत्वेनयदाप्रकाः
शतेतदाआत्माअंतर्यामिइत्युच्यते। सत्यंज्ञानमनंतमात्मेदंसर्वोपाधि
विनिर्मुक्तःकटकमुकुटाद्युपाधिरहितःसुवर्णवर्णघनवद्विज्ञानघनः
श्चिन्मात्रस्वरूपआत्मास्वतंत्रोयदाभासतेतदात्वंपदार्थः प्रत्यगात्माइत्यु
च्यते। सत्यंज्ञानमनंतंब्रह्म। विज्ञानमानंदंब्रह्म। सत्यमित्यविनाशिदिश

645
1970

कालत्रयेऽस्मिन्निमित्तेषु विनश्यत्स्वरूपत्रयं न विनश्यति अविनाशी तत्सत्य-
मित्युच्यते। ज्ञानमिति उत्पत्तिविनाशरहितं चैतन्यमित्यभिधीयते। अनं-
तनाम मृद्विकारेषु मृदिव स्वर्णविकारेषु स्वर्णमिव। तंतुकार्येषु तंतु-
रिव। अव्यक्तादिसृष्टिप्रपंचेषु पूर्वं व्यापकं चैतन्यमनंतमित्युच्यते। आ-
नंदो नाम सुखचैतन्यस्वरूपं अपरिमितानंदसमुद्रं अविशिष्टसुखस्वरू-
पं आनंद इत्युच्यते। एतद्वस्तुचतुष्टयं यस्य स्वरूपलक्षणं देशकालव-
स्तुनिमित्तेष्वव्यभिचारी स तत्पदार्थः। परमात्मा परं ब्रह्मेत्युच्यते।
त्वंपदार्थोद्दौपाधिकोतत्पदार्थोद्दौपाधिकाद्विलक्षण आर्गेकोवत्सर्व-
गतसूक्ष्मकेवलसत्तामात्रो आसिपादार्थः। स्वयंज्योतिरात्मेत्युच्यते। २

647/1970

अनादिरंतर्वर्तिप्रमाण्यप्रमाणासाधारणा न सती नासती न सदसति
अविचार्यमाणा सति विचार्यमाणा सति स्वयमविकाद्विकारहेतौ स्वयमा-
दि इति विकाररहितौ निरूप्य असति अनिरुप्यमाणे सति। लक्षमाण-
शून्या सा मायेत्युच्यते॥ ॥ इत्यथर्वणसर्वोपनिषद्॥ ॥
अथ ब्रह्मोपनिषद् लिख्यते॥ हरिः ॐ॥ शौनको ह वै महाशालोंगिरा
स भगवंतं पिप्पलादं पप्रच्छ दिव्ये ब्रह्मपुरे संप्रतिष्ठिता भवति कथं सृजति
कस्यैष महिमा बभूव यो ह्येष महिमा बभूव क एष तस्मै स होवाच ब्रह्म-
विद्या वरिष्ठा प्राणो ह्येष आत्मा आत्मनो महिमा बभूव देवानामायुः स दे-
वानां निधनमनिधनं दिव्ये ब्रह्मपुरे विरजं निष्कलं शुभ्रमक्षरं यद्ब्रह्म

ब्र॰ उ॰ विभातिसनियच्छतिमधुकरराजानंमाक्षिकवद्यथामाक्षिकेनतंतुनाजालं
४ विक्षिपतितेनापकर्षतियथैवैषप्राणोयदायातिष्टंसंसृष्टमाकृष्यमाणदेव
तास्ताःसर्वानाड्यःसुषुप्तेच्छयनाकाशवद्यथाखंश्येनमाश्रित्ययातिस्व
मालयमेवंसुषुप्तोब्रूते।यथैवैषदेवदत्तोयष्ट्यादिताड्यमानोनयत्येवमिष्टा
पूर्तैःशुभाशुभैर्नलिप्यतेयथाकुमारोनिष्काम आनंदमुपयातितथैवैष
देवदत्तःस्वप्नआनंदमभियातिवेदएवपरंज्योतिर्ज्योतिष्कामोज्योतिरानं
दयतेभूयस्तेनैवस्वप्नायगच्छतिजलोकावद्यथाजलोकाग्रमग्नेनयंसात्मा
ननयातिपरंसंधयत्यपरंनापरंत्यजतिसजाग्रदभिधीयतेतथैवैषकपा
लाष्टकंसंनयतितमेवस्तनइवलंबतएषदेवयोनिर्यत्रजायतिशुभाशुभा ४

निरुक्तमस्यदेवस्यसंप्रसारोंतर्यामिखगःकर्कटगःपुष्करःपुरुषःप्राणो 649/1970
हिंसापरापरंब्रह्मात्मादेवतादेवयतियएकवेदपरंब्रह्मधामक्षेत्रज्ञमु
पैति॥१॥इतिप्रथमखंडः॥ ॥ॐ अथास्यपुरुषस्यचत्वारिस्थाना
निभवंतिनाभिर्हृदयंकंठंमूर्द्धाचेतितत्रचतुष्पादंब्रह्मविभातिजागरि
तंस्वप्नंसुषुप्तंतुरीयमितिजागरितेब्रह्मास्वप्नेविष्णुःसुषुप्तेरुद्रस्तुरी
यंपरमाक्षरंसआदित्याश्चविष्णुश्चेश्वरश्चसपुरुषःसप्राणःसजीवः
सोग्निर्जाग्रतस्तेषांमध्येयत्परंब्रह्मविभातिस्वयममनस्कमश्रोत्रमया
निपादंज्योतिर्विवर्जितंनतत्रलोकानलोकादेवानदेवावेदानवेदायज्ञा
नयज्ञामातापितानपितास्नुषानस्नुषाचांडालोनचांडालःचोल्कसोनपो

ब्र॰ उ॰ क्लृप्तः श्रमणो न श्रमणः पशवो न पशवो। तापसो न तापस इत्येकमेव परं
५ ब्रह्म विभाति हृदाकाशे तद्विज्ञानमाकाशं तत्सुषिरमाकाशं तद्वेद्यं हृद्याका
शं यस्मिन्निदं सं चविचरति यस्मिन्निदं सर्वमोतं प्रोतं विभोः प्रजाः सत्यं परं
न तत्र देवा ऋषयः पितर ईशते एक एव प्रतिबुद्धः स सर्वविदिति। हृदिस्था दे
वताः सर्वा हृदि प्राणे प्रतिष्ठिताः। हृदि प्राणश्च ज्योतिश्च त्रिवृत्सूत्रं च यन्मह
त्। हृदि चैतन्ये तिष्ठति। तत्रैते श्लोका भवंति। यज्ञोपवीतं परमं पवित्रं प्र
जापतेर्यत्सहजं पुरस्तात्॥ आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बल
मस्तु तेजः॥ सशिखं वपनं कृत्वा बहिः सूत्रं त्यजेद्बुधः॥ यदक्षरं परं ब्रह्म त
त्सूत्रमिति धारयेत्॥ सूचनात्सूत्रमित्याहुः सूत्रं नाम परं पदं॥ तत्सूत्रं विदि ५
तं येन स विप्रो वेदपारगः॥ येन सर्वमिदं प्रोक्तं सूत्रे मणिगणा इव॥ तत्सू

त्रं धारयेद्योगी योगवित्तत्त्वदर्शिवान्॥ बहिः सूत्रं त्यजेद्विद्वान्योगमुत्तममा 651/1770
स्थितः। ब्रह्मभावमयं सूत्रं धारयेद्यः सनातनः॥ धारणात्तस्य सूत्रस्य नो
च्छिष्टो नाशुचिर्भवेत्॥ २॥ द्वितियखंडः॥ ॥ सूत्रमंतर्गतं येषां ज्ञानय
ज्ञोपवीतिनां। ते वै सूत्रविदो लोके ते च यज्ञोपवीतिनः॥ ज्ञानशिखिनो ज्ञा
ननिष्ठा ज्ञानयज्ञोपवीतिनः॥ ज्ञानमेव परं तेषां पवित्रं ज्ञानमुत्तमं॥ अग्नेरि
व शिखा नान्या यस्य ज्ञानमयी शिखा॥ स शिखीत्युच्यते विद्वानितरे केश
धारिणः॥ कर्मण्यधिकृता ये तु वैदिके ब्राह्मणादयः॥ तैः संधार्यमिदं सूत्रं
क्रियांगं तद्वि वै स्मृतं॥ शिखा ज्ञानमयी यस्य उपवीतं च तन्मयं॥ ब्राह्मण्यं
सकलं तस्य इति ब्रह्मविदो विदुः॥ इदं यज्ञोपवीतं तु परमं यत्परायणं॥ स
विद्वान्यज्ञोपवीती स्यात्स यज्ञः स च यज्ञवित्॥ एको देवः सर्वभूतेषु गूढः

ब्र·उ· सर्वव्यापीसर्वभूतांतरात्मा॥कर्माध्यक्षः सर्वभूताधिवासःसाक्षीचेता
केवलोनिर्गुणश्च॥एकोमनीषीनिःक्रियाणांबहूनामेकंसंतंबहुधायः
६ रोकेति॥तमात्मानंयेनुपश्यंतिधीरास्तेषांशांतिःशाश्वतीनेतरेषां॥
आत्मानमरणींकृत्वाप्रणवंचोत्तरारणीं॥ध्याननिर्मथनाभ्यासाद्दे
वपश्येन्निगूढवत्॥तिलेषुतैलंदधिनीवसर्पिरापश्चस्रोतस्वरणी
षुचाग्निः॥एवमात्मात्मनिगृह्यतेसौसत्येनैनंपतसायोनुपश्यति॥ऊ
र्णनाभिर्यथातंतुंन्सृजतेसंहरत्यपि॥जाग्रत्स्वप्नेतथाजीवोगच्छत्या
गच्छतेपुनः॥पद्माकोशप्रतीकाशंसुषिरंचाप्यधोमुखं॥हृदयंतद्वि
जानीयाद्विश्वस्यायतनंमहत्॥नेत्रस्थंजाग्रतंविद्यात्कंठेस्वप्नसमा ६

विशेत्॥सुषुप्तंहृदयस्थंचतुरीयंमूर्ध्निसंस्थितं॥यदात्माप्रज्ञयात्मानंसं 553/1970
धत्तेपरमात्मनि॥तेनसंध्याध्यानमेवतस्मात्संध्याभिवंदनं॥निरुदका
ध्यानसंध्याकायक्लेशविवर्जिता॥संधिनीसर्वभूतानांसासंध्याह्येक
दंडिनां॥यतोवाचोनिवर्ततेअप्राप्यमनसासह॥आनंदमेतज्जीवस्य
यज्ज्ञात्वामुच्यतेबुधः॥सर्वव्यापिनमात्मानंक्षीरेसर्पिरिवान्वितं॥आत्म
विद्यातपोमूलंतद्ब्रह्मोपनिषत्परं॥तद्ब्रह्मोपनिषत्परमिति॥तृतीयखंडः
॥३॥इतिकृष्णयजुर्वेदगतब्रह्मोपनिषत्संपूर्णं॥ ॥शांतिः॥शांतिः॥
शांतिः॥ ॥अथब्रह्मबिंदूपनिषत्॥ ॥ॐनमोहिद्विविधप्रोक्तंशुद्धं
चाशुद्धमेवच॥अशुद्धंकामसंकल्पाच्छुद्धंकामविवर्जितं॥१॥मनएवमु

बिंदू.उ. नुष्याणांकारणंबंधमोक्षयोः॥बंधायविषयासक्तंमुक्तिर्निर्विषयंस्मृतः॥
॥२॥यतोनिर्विषयस्यास्यमनसोमुक्तिरिष्यते॥अतोनिर्विषयंनित्यंमनः
७ कार्यंमुमुक्षुणा॥३॥निरस्तविषयासक्तंसन्निरुद्धंमनोहृदि॥यदायात्या
त्मनोभावंस्तदातत्परमंपदं॥४॥तावदेवनिरोधव्यंयावद्धृत्तिगतंक्षयं॥ए
तज्ज्ञानंचध्यानंचअतोन्योग्रंथविस्तरः॥५॥नैवचिंत्यंनवाचिंत्यमचिंत्यंचिं
त्यमेवतत्॥पक्षपातविनिर्मुक्तंब्रह्मसंपद्यतेतदा॥६॥स्वरेणसंधयोगंद्यो
मस्वरंभावयेत्परं॥अस्वरेणहिभावेनभावोनाभावइष्यते॥७॥तदेवनि
ष्कलंब्रह्मनिर्विकल्पंनिरंजनं॥तद्ब्रह्माहमितिज्ञात्वाब्रह्मसंपद्यतेध्रुवं॥
॥८॥निर्विकल्पमनाद्यंचयज्ज्ञात्वामुच्यतेबुधः॥ननिरोधोनचोत्पत्तिर्नबं ७

धोनचसाधनं॥९॥नमुमुक्षुर्नैवमुक्तइत्येषापरमार्थता॥एकएवात्म
मंतव्योजाग्रत्स्वप्नसुषुप्तिषु॥१०॥स्थानत्रयव्यतीतस्यपुनर्जन्मोनवि
द्यते॥एकएवहिभूतात्माभूतेभूतेव्यवस्थितः॥११॥घटसंवृत्तमाका
शंलीयमानेघटेयथा॥घटोविलीयतेनाशेतद्विज्जीवोनभोपमः॥१२॥
घटवद्विविधाकारंभिद्यमानंपुनःपुनः॥तद्भग्नंनचजानातिसजानाति
चनित्यशः॥१३॥शब्दमायावृतोयावत्तावत्तिष्ठतिपुष्करं॥भिन्नेतमसि
चैकत्वमेकएवानुपश्यति॥१४॥शब्दाक्षरंपरंब्रह्मयस्मिन्क्षीणेयद
क्षरं॥तद्विद्वानक्षरंध्यायेद्यदिच्छेच्छांतिमात्मनः॥१५॥द्वेविद्येवेदितु
शब्दब्रह्मपरंचयत्॥शब्दब्रह्मणिनिष्णातःपरंब्रह्माणिगच्छति॥१६॥

655
1970

ग्रंथमभ्यस्य मेधाविज्ञानविज्ञानतत्परः॥पलालमिवधान्यार्थीत्यजे
द्ग्रंथमशेषतः॥१७॥गवामनेकवर्णानांक्षीरस्याप्येकवर्णता॥क्षीर
वत्पश्यतेज्ञानंलिंगिनस्तुगवांयथा॥१८॥घृतमिवपयसिनिगूढं
भूतेभूतेवसतिविज्ञानं॥सततंमंथयितव्यंमनसामंथानभूतेन॥१९॥
ज्ञाननेत्रसमादायचाग्निवत्तेभवतःपरं॥निष्कलंनिश्चलंशांतंतद्ब्रह्मा
हमितिस्मृतं॥२०॥सर्वभूताधिवासंयद्भूतेषुचवसत्यपि॥सर्वानु
ग्राहकत्वेनतदस्म्यहंवासुदेव॥२१॥तदस्म्यहंवासुदेवइति॥
इतिब्रह्मचिद्रूपनिषत्समाप्ता॥ ॥अथनिरालंबउपनिषत्॥ ॥
ॐनमःशिवायगुरवेसच्चिदानंदमूर्तये॥निःप्रपंचायशांतायनिरा

लंबायतेजसे॥१॥निरालंबंसमाश्रित्यसालंबंविजहातियः॥ससंन्यासी
चयोगीचकैवल्यंपदमश्नुते॥२॥एषामज्ञानजीवानांसमस्तानिष्टशांत
ये॥यद्यद्बोद्धव्यमखिलंसमाशंक्यब्रवीम्यतः॥३॥किंब्रह्म।किंशबल
ब्रह्म।कईश्वरः।कोजीवः।काप्रकृतिः।कःपरमात्मा।केब्रह्माद्याः।का
जातिः।किंकर्म।किमकर्म।किंतपः।किमासुरं।किंज्ञानं।किमज्ञानं।
कःसंसारः।कोबद्धः।कोमोक्षः।किंसुखं।किंदुःखं।कःस्वर्गः।कोन
रकः।किंपरमपदं।कमुपास्यः।कोविद्वान्।कोमूढः।कःसंन्यासी।
किंग्राह्यं।कःसमाधिः॥इत्याएकोनत्रिंशत्प्रश्नाः॥२९॥ब्रह्मेतिच।
अखिलोपाधिविनिर्मुक्तमनाद्यंतशुद्धंशांतंनिर्गुणंनिरवयवंनित्या

657
1970

नि·लं· नंदमखंडैकरसमद्वैतंचैतन्यंब्रह्म॥ १॥ किंशबलंब्रह्मेति॥ अव्यक्तान्म
९ हदहंकारपृथिव्यापस्तेजवायव्याकाशात्मकेनबृहद्रूपेणांडकोशेन
कर्मज्ञानार्थरूपतयाभासमानसकलशक्त्युपबृंहितंशबलंब्रह्म॥ २॥
कईश्वरइति॥ एतल्लक्षणंब्रह्मैवस्वप्रकृतिशक्त्याभिलेशमाश्रित्यलो
कान्सृष्ट्वांतर्यामिशबलत्वेनप्रविश्यब्रह्मादीनांबुध्यादींद्रियनियंतृ
त्वादीश्वरः॥ ३॥ को जीवः ब्रह्माविष्णुविश्वेशेंद्रादीनांद्वाराहमित्याध्यासवशा
त्स्थूलोजीवः॥ सोयमेकोपिदेहाहंभेदवशाद्बहुधाजीवः॥ ४॥
काप्रकृतिरिति॥ ब्रह्मणःसकाशात्नानाविधजगद्विचित्रनिर्माण
सामर्थ्याद्बुद्धिरूपब्रह्मशक्तिरेवप्रकृतिः॥ ५॥ कःपरमात्मेति॥ देहादेः ९

परत्वाद्ब्रह्मैवपरमात्मा॥ ६॥ केब्रह्माद्याइति॥ सब्रह्मःसशिवःसो
क्षरःसेंद्रःसविष्णुःसरुद्रःसमनुःससूर्यःसचंद्रमाःससुराःसपि
शाचाःसजीवाःसस्त्रियःसब्राह्मणादयःसएवतत्सर्वमिदंब्रह्मने
हनानास्तिकिंचन॥ ७॥ काजातिरिति॥ चर्मरक्तवसामांसमज्जा
स्थीनित्युक्तानजातिरात्मनोजातिर्व्यवहारोपिकल्पितः॥ ८॥ किंक
र्मेति॥ इंद्रियैःक्रियमाणेनाहंकारोभित्याध्यात्मनिष्ठतयातत्कर्मैव
कर्म॥ ९॥ किमकर्मेति॥ कर्तृत्वभोक्तृत्वअहंकारतयाबंधस्वरूपं
जन्मादिकारणंनित्यनैमित्तिकयागादिव्रततपोदानेषुफलानु

659/1470

नि॰३ संधानंयत्तदकर्म॥१०॥किंतपइति॥ब्रह्मसत्यंजगन्मिथ्यापरोक्ष
ज्ञानात्क्षीणब्रह्माद्यैश्वर्याशात्संकल्पबीजंसन्यासःस्तपः॥११॥
किमासुरमिति॥अत्कग्ररागद्वेषाहंकारोपेतंहिंसादंभात्कक्तंतप।
स्फर॥१२॥किंज्ञानमिति॥एकादशेंद्रियनिग्रहेणसुद्गुरूपासन
याश्रवणमनननिदिध्यासदृकुदृश्यप्रकारंसर्वंनिरस्यसर्वांत
रस्थंघटादिविकारपदार्थेषुचैतन्यंविनानकिंचिदस्तितिसाक्षात्का
रानुभवज्ञानं॥१३॥किमज्ञानमिति॥रज्जुसर्पज्ञानमिवाद्वितीय
सर्वानुस्यूतेससर्वमयेब्रह्मणिदेवतिर्यङ्नरस्त्रीपुरुषवर्णाश्रम

बंधमोक्षादीनानात्वकल्पनाज्ञानमज्ञानं॥१४॥कःसंसारइति॥अ
नाद्यविद्यावासनयाजातोहमहेतोमित्यादिषड्भावविकारःसंसारः
॥१५॥कोबद्धइति॥पितृमातृसहोदरदारापत्यगृहारामादिक्षेत्रादि
संसारार्णवसंकल्पोबद्धः॥कामादिसंकल्पकर्तृत्वाद्यहंकारज्ञांकाल
ज्ञाभयगुणसंज्ञायादिसंकल्पादेवमनुष्यादिरूपनानाकर्मयज्ञव्रत
दाननानाकल्पसंकल्पयमाद्यष्टांगयोगाभ्याससंकल्पअणिमाद्य
ष्टैश्वर्यादिसंकल्पःसिद्धिकेवलमोक्षापेक्षासंकल्पःसंल्यकेमात्रबद्धः
॥१६॥कोमोक्षइति॥नित्यानित्यवस्तुविचारान्नित्यसंसारसमस्त
संकल्पक्षयामोक्षः॥१७॥किंस्फुरवमिति॥सच्चिदानंदरूपतयाज्ञात्वा

661/1970

नि· उ· आनंदावस्था मोक्षसुखं स सुखं॥१८॥ किं दुःखमिति॥ अनात्मरूपविष
११ यसंकल्प एव दुःखं॥१९॥ कः स्वर्ग इति॥ सत्संगः स्वर्गः॥२०॥ को नरक
इति॥ असत्संसारविषयीजनसंसर्ग एव नरकः॥२१॥ किं परमपदमि
ति॥ प्राणेंद्रियांतःकरणदेहादेः परतरं सच्चिदानंदमद्वितीयं सर्वसाक्षि
णं सर्वगतं नित्यमक्षुब्रह्मस्वरूपं परमपदं॥२२॥ क उपास्य इति॥ स
र्वशरीरस्थब्रह्मचैतन्यप्रापको गुरुरुपास्यः॥२३॥ को विद्वानिति॥ स
र्वांतरस्थं सच्चिद्रूपं परमात्मानं वेत्ति स विद्वान्॥२४॥ को मूढ इति॥ कर्तृ
त्वभोक्तृत्वाद्यहंकारभावनासंदो मूढः॥२५॥ कः सन्यासीति॥ स्वस्वरू
पावस्थायां सर्वकर्मफलत्यागी स सन्यासी॥२६॥ किं ग्राह्यमिति॥ दे ११

शकालवस्तुपरिच्छेदरहितं वस्तु ग्राह्यं॥२७॥ किमग्राह्यमिति॥ स्वस्वरूपं 663/1970
व्यतिरिक्तं मायामयं मनोबुद्धींद्रियगोचरं जगत्सत्यत्वचिंतनमग्राह्यं॥२८
॥ कः समाधिरिति॥ सर्वमन्यत्परित्यज्य निर्ममो निरहंकारो भूत्वा ब्रह्मनि
ष्ठं शरणमधिगम्य तत्वमस्यादिमहावाक्यार्थं निश्चित्य निर्विकल्पसमा
धिना स्वतंत्रः सन्यः श्चरति स मुक्तः स पूज्यः सः परमहंसः सोवधूतः स
ब्राह्मणः स सत्यसंधिः स सर्ववित् सर्व एव ब्रह्मणा इति॥२९॥ को ब्राह्मण
इति॥ ब्रह्मवित्सर्व एव ब्राह्मण इति॥ निरालंबोपनिषदोधीयंते॥ स ब्रह्म
भूत्वा न पुनरावर्तति॥ इत्युपनिषद्॥ यच्चैतन्यं मनुस्यूतं जाग्रत्स्वप्नसुषु
प्तिषु॥ तदेवत्वं परं तत्वमितो नास्त्याधिकः परं॥ ॥ॐ शांतीः॥ शांतिः॥ शां

नि·उ· तिः॥ ॥इनिरालंबोपनिषत्संपूर्णा॥ ॥श्री ॥ ॥श्र ॥
१२

॥इतिसर्वोपनिदब्रह्मोपनिषच्चिद्रूपनिषत्सनिरालंबोपनिषद॥

१२

श्रीगणेशायनमः अथस्वसंवद्योपनिषदलिख्यते ॐशांतिः
शांतिः शांतिः ३ हरिःॐ सर्वेषां प्राणि बुद्बुदानांनिरंजनाव्यक्ता
मृतनिधौविलयविलासःस्थितिर्विजृंभते॥तेषामेवपुनर्भवनंनो
इहास्ति सयथामृत्पिंड घटानांतंतौपटानातएवेति भवतिवस्तुतो
नोपादानमतएवनोपादेयमत एवननिमितमत एवनविद्यान
पुराणंनोवेदानेतिहासाइतिनजगदितिनब्रह्मा नोविष्णुर्नायरु
द्रोनेश्वरोनबिंदुर्नोकलेति अग्रमध्येवसाने सर्वंयथावस्थितंयथा
वस्थितज्ञानंतेषांनोभवत्यागमपुराणेतिहासधर्मशास्त्रप्रघ्नता
भिमानास्तेप्यनानितु मुग्धतरमुनिशब्दवाच्यजरैवबुद्बुदरचिता

665
1970

स्व० उ० नीतिभवंतितत्रप्रामाण्यंतादृशानामेवतेत्वज्ञानेनाहता:सय
१ त्वेनगर्मास्तदप्येषश्लोकोभवतितदत्रश्लोकोभवति॥ १ ॥
इहतेनाप्यज्ञानेननोकिंचित्॥अथयथावस्थितज्ञानेनकिंच
त्नेतियदस्तितदस्तियन्नास्तिनास्तितत्॥कालकर्मात्मिकमि
दंस्वभावात्मकंचेति॥नसुकृतंनोदुष्कृतं॥अतएवस्कमरुदाता
रोगोदातारोवागान्धेब्राह्मणान्धे:सुरापाने:पश्यतोहर:परोक्ष
हरेवागुरुपापनिष्ठ:सर्वपापनिष्ठश्चमानस्तएतेतेश्चनगा:।नब्र
ह्मण:नसुरानपश्यतोहर:नपरोक्षहर:नगुरुपापानिनलघुपा १
पानिमतएवतन्निष्ठा:मतएवननिर्वाणंनोनिरयइतितदप्येष

श्लोकोभवति॥ २ ॥तत्वज्ञानंगुहायांनिविष्टंमज्ञानिकृतमा
र्गंसुष्ठुवंदतिततत्रसाभिमानावर्तंते पुष्पितवचनेनमोहितास्ते
भवंतिसयथातुराभिषग्रहणकालबालोअपथ्याहितगुडादी
नाजनन्यावंचिताइतिनानादेवतागुरुकर्मतीर्थनिष्ठाश्चतेभवंति
॥केचिद्वयंवैदिकाइतिवदंतिनान्यस्मभ्य:केचिद्वयंसर्वशास्त्र
ज्ञाइतिकेचिद्वयंदेवानुग्रहवंत:केचिद्वयंस्वमउपास्यदेवताभा
षिण:॥केचिद्वयंदेवाइतिकेचिद्वयंश्रीमद्रमारमणनलिनभृंगा
इतिकेचित्तुन्तत्यंतुकेचित्तुसूरर्वावयंपरमभक्ताइतिवंदनोरुदंति
पतंतिचयेकेनेतेतेसर्वेप्यज्ञानिन:यत्तुज्ञानिनोभवंतियतत्वज्ञानि

667
1970

स्व०उ० नश्वतेस्तेषां कोविशेषः मतएनकेषांचित्केश्विद्भेदः मतएवयत्रवि
२ रंचिविष्णुरुद्रांईश्वरश्चगच्छंतितत्रैवश्वानोगर्दभामार्जाराक्रिमि
यश्चमतएवनश्वानगर्दभः नमार्जातनक्रिमिः नोत्तमाः नमध्य
माः नजघन्याः तदथ्यपश्लोकोभवति॥ ३ ॥नतच्छूद्रः नकिंत्रा
व्हः नसर्वेशाब्दाः। नमातानोपितानबंधुर्नभार्यानपुत्रोनामित्रंनोस्त
र्वेतथा। पिसाधकेरात्मस्वरूपंवेदितुमिच्छद्भिर्जीवन्मुमुक्षुभिः सं
तसेव्याः॥ भार्यापुत्रोगृहंधनंसर्वंतेष्योदेयंकर्माद्वैतंनकार्यंभावा
द्वैतंतुकार्यं॥ निश्चयेनसर्वाद्वैतंकर्तव्यंगुराद्वैतमवश्यंकार्यंयतोनत
स्मादन्यत्येनसर्वमिदंप्रकाशितंकोन्यतस्मात्परःपरः सजीवन्मु
क्तोभवतिसजीवन्मुक्तोभवतियएवंवेदयएवंवेद ४ ॥इतिस्वसंवे
द्योपनिषत्संपूर्णा॥ ५२ ॥ शके १७५८ नंदननामसंवत 2

560
1456

अथऐतरेयोपनिषत् आत्मषट्कं प्रारंभः॥

ऐत॰नि॰ श्रीगणेशायनमः॥ ॥अथऐतरेयोपनिषदात्मषट्कप्रारंभः॥
१ ॐआत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्॥सईक्ष
तलोकान्नुसृजाइतिसइमांल्लोकानसृजतअंभोमरीचीर्मरमापो
दोंभःपरेणदिवंद्यौःप्रतिष्ठांतरिक्षंमरीचयःपृथिवीमरोयाअ
धस्तात्ताआपःसईक्षतेमेनुलोकालोकपालान्नुसृजाइतिसोऽद्भ्यएव
पुरुषंसमुद्धृत्यामूर्छयत्तमभ्यतपत्तस्याभितप्तस्यमुखंनिरभिद्यत
यथांडंमुखाद्वाग्वाचोग्निर्नासिकेनिरभिद्येतांनासिकाभ्यांप्राणःप्रा १
णाद्वायुरक्षिणीनिरभिद्येतामक्षिभ्यांचक्षुश्चक्षुषआदित्यःकर्णौनिरभि
द्येतांकर्णाभ्यांश्रोत्रंश्रोत्राद्दिशस्त्वङ्निरभिद्यतत्वचोलोमानिलोम

भ्यओषधिवनस्पतयोहृदयंनिरभिद्यतहृदयान्मनोमनसश्चंद्रमा
नाभिर्निरभिद्यतनाभ्याअपानोऽपानान्मृत्युःशिश्नंनिरभिद्यतशिश्ना
द्रेतोरेतसआपः॥ १ ॥ताएतादेवताःसृष्टाअस्मिन्महत्यर्णवेप्राप
तंस्तमशनापिपासाभ्यामन्ववार्जत्ताएनमब्रुवन्नायतनंनःप्रजानीहि
यस्मिन्प्रतिष्ठिताअन्नमदामेतिताभ्योगामानयत्ताअब्रुवन्नवैनोय
मलमितिताभ्योऽश्वमानयत्ताअब्रुवन्नवैनोयमलमितिताभ्यःपुरु
षमानयत्ताअब्रुवन्नवैनोयमलमितिताभ्यःपुरुषमानयत्ताअब्रुव
न्सुकृतंबतेति॥पुरुषोवावसुकृतंताअब्रवीद्यथायतनंप्रविशतेत्य
ग्निर्वाग्भूत्वामुखंप्राविशद्वायुःप्राणोभूत्वानासिकेप्राविशदादित्य

671 / 1970

एतरे॰उ॰ श्चक्षुर्भूत्वाऽक्षिणीप्राविशद्दिशःश्रोत्रंभूत्वाकर्णौप्राविशन्नोषधिव
२ नस्पतयोलोमानिभूत्वाहृदयंप्राविशन्मृत्युरपानोभूत्वानाभिंप्रावि
शदापोरेतोभूत्वाशिश्नंप्राविशंस्तमशनापिपासेअब्रूतामावाभ्याम
भिप्रजानीहीतितेअब्रवीदेतास्वेववांदेवतास्वाभजाम्येतासुभागिन्यौ
करोमीतितस्माद्यस्यैकस्यैचदेवतायैहविर्गृह्यतेभागिन्यावेवास्या
मशनापिपासेभवतः॥ २ ॥सईक्षतेमेनुलोकाश्चलोकपालाश्चा
न्नमेभ्यःसृजाइतिसोपोभ्यतपत्ताभ्योऽभितप्ताभ्योमूर्तिरजायतया
वैसामूर्तिरजायतान्नंवैतत्तदेनत्सृष्टंपराङत्यजिघांसत्तद्वाचाजि
घृक्षत्तन्नाशक्नोद्वाचाग्रहीतुंसयद्धैनद्वाचाग्रहैष्यदभिव्याहृत्यहै २

वान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेनाग्रहैष्यदभि
प्राण्यहैवान्नमत्रप्स्यत्तच्चक्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषाग्रहीतुं
सयद्धैनच्चक्षुषाग्रहीतुंसयद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वाहैवान्नमत्रप्स्य
तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेणग्रहीतुंसयद्धैनच्छ्रोत्रेणाग्रहै
ष्यच्छ्रुत्वाहैवान्नमत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्नाशक्नोत्त्वचाग्रहीतुंसय
द्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वाहैवान्नमत्रप्स्यत्तन्मनसाजिघृक्षत्तन्नाश
क्नोन्मनसाग्रहीतुंसयद्धैनन्मनसाग्रहैष्यद्ध्यात्वाहैवान्नमत्रप्स्यत्त
च्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्नेनग्रहीतुंसयद्धैनच्छिश्नेनाग्र
हैष्यद्विसृज्यहैवान्नमत्रप्स्यत्तदपानेनाजिघृक्षत्तदावयत्सैषोन्न

673/1970

ऐतरेयो॰ स्य गृह्योयद्वायुरन्नायुर्वा एष यदन्नायुः सईक्षत कथान्विदं मदृते स्यादि
३ ति सईक्षत कतरेण प्रपद्या इति सईक्षत यदि वाचाऽभिव्याहृतं यदि
प्राणेनाभिप्राणितं यदि चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृ
ष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ
कोहमिति स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत सैषा विदृति
र्नाम द्वास्तदेतन्नांदनं तस्य त्रय आवसथास्त्रयः स्वप्ना अयमाव
सथोऽयमावसथोऽयमावस इति स जातो भूतान्यभिव्यैख्यत्किमि
हान्यं वावदिषदिति स एतमेव पुरुषं सब्रह्मततमपश्यदिदर्शामितीं३ ३
तस्मादिदंद्रो नामेदंद्रो ह वै नाम तमिदंद्रं संतमिंद्र इत्याचक्षते परोक्षे

णपरोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः॥ ३ ॥इति नवमो
ध्यायः॥ ॥पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतस्तदेतत्स
र्वेभ्योंऽगेभ्यस्तेजः संभूतमात्मन्येवात्मानं बिभर्ति तद्यदा स्त्रियां सिंच
त्यथैनज्जनयति तदस्य प्रथमं जन्म तत्स्त्रिया आत्मभूयं गच्छति यथा
स्वमंगं तथा तस्मादेनां न हिनस्ति सास्यैतमात्मानमत्र गतं भावयति
सा भावयित्री भावयितव्या भवति तं स्त्री गर्भं बिभर्ति सोऽग्र एव कुमा
रं जन्मनोऽग्रेऽधिभावयति स यत्कुमारं जन्मनोऽग्रेऽधिभावयत्यात्मा
नमेव तद्भावयत्येषां लोकानां संतत्या एवं संतता हीमे लोकास्तदस्य
द्वितीयं जन्म सोऽस्यायमात्मा पुण्येभ्यः प्रतिधीयते अथास्यायमि

575
1970

ऐतरे० नरआत्माकृतकृत्योवयोगतःप्रैतिसइतःप्रयन्नेवपुनर्जायतेतद
४ स्यतृतीयंजन्मतदुक्तमृषिणा गर्भेनुसन्नन्वेषामवेदमहंदेवानां
जनिमानिविश्वा शतंमापुरआयसीररक्षन्नधश्येनोजवसानिर
दीयमिति।गर्भएवैतच्छयानोवामदेवएवमुवाचस एवंविद्वान
स्माच्छरीरभेदादूर्ध्वउत्क्राम्या मुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वा
मृतःसंभवत्समभवत्॥ ४ ॥यथास्थानंतुगर्भिण्याः॥ ॥इति
द्वितीयोध्यायः॥ ॥कोयमात्मेतिवयमुपास्महेकतरःसआत्माये
नवापश्यतियेनवाशृणोतियेनवागंधानाजिघ्रतियेनवावाचंव्याक
रोतियेनवास्वादुचास्वादुचविजानातियदेतद्धृदयंमनश्चैतत्संज्ञा

नमाज्ञानंविज्ञानंप्रज्ञानंमेधादृष्टिर्धृतिर्मनीषाजूतिःस्मृतिःसंक
ल्पःक्रतुरसुःकामोवशःइतिसर्वाण्येवैतानिप्रज्ञानस्यनामधेया
निभवंत्येषब्रह्मैषइंद्रएषप्रजापतिरेतेसर्वेदेवाइमानिचपंचमहा
भूतानिपृथिवीवायुराकाशआपोज्योतींषीत्येतानीमानिचक्षुद्रमि
श्राणीवबीजानीतराणिचांडजानिचजारजानिचस्वेदजानिचोद्भि
ज्जानिचाश्वागावःपुरुषाहस्तिनोयत्किंचेदंप्राणिजंगमंचपतत्रिच
यच्चस्थावरंसर्वंतत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितंप्रज्ञानेत्रोलोकःप्रज्ञाप्र
तिष्ठा॥प्रज्ञानंब्रह्म॥सएतेनप्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मि
न्स्वर्गेलोकेसर्वान्कामानाप्त्वाऽमृतःसमभवत्समभवत्॥ ५ ॥

677/1970

ऐतरे॰उ॰ इत्येकादशोध्यायः॥ ॥वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्र
५ तिष्ठितमाविरावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरने
नाधीतेनाहोरात्रान्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवत्ववतु मामवतु वक्तारमवतु वक्तारं॥ॐ शांतिः शांतिः शांतिः।
॥३ ॥इति ऐतरेयोपनिषत्संपूर्णं॥ ॥छ॥ छ छ छ

५

679
1970

॥अथ आत्मषट्कप्रारंभोयम्॥

आत्मषट्क श्रीगणेशायनमः ॐ भद्रंनोअपिवातयमनः ॐ शांतिः शांतिः
१ शांतिः आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्स ई
क्षतलोकान्नुसृजाइति सइमाल्लोकानसृजतांभोमरीचीमरइमा
पोदोंभः परेणदिवंद्यौः प्रतिष्ठांतरिक्षंमरीचयः पृथिवीमरोयाअ
धस्तात्ताआपः सईक्षतेमेनुलोकालोकपालान्नुसृजाइति सो
द्भ्यएवपुरुषंसमुध्धृत्यामूर्छयत्तमभ्यतपत्तस्याभितप्तस्यमुखं १
निरभिद्यतयथांडंमुखाद्वाग्वाचोग्निर्नासिकेनिरभिद्येतांनासि

काभ्यांप्राणः प्राणाद्वायुरक्षिणीनिरभिद्येतामक्षीभ्यांचक्षुश्चक्षु
षआदित्यः कर्णौनिरभिद्येतांकर्णाभ्यांश्रोत्रंश्रोत्राद्दिशस्त्वङ्निर
भिद्यतत्वचोलोमानिलोमभ्यओषधिवनस्पतयोहृदयंनिरभि
द्यतहृदयान्मनोमनसश्चंद्रमानाभिर्निरभिद्यतनाभ्याअपानोऽ
पानान्मृत्युः शिश्नंनिरभिद्यतशिश्नाद्रेतोरेतसआपः॥१॥ताए
तादेवताः सृष्टाअस्मिन्महत्यर्णवेप्रापतंस्तमशनापिपासाभ्या
मन्ववार्जताएनमब्रुवन्नायतनंनः प्रजानीहियस्मिन्प्रतिष्ठिता

681/1970

आत्मषट्क अन्नमदामेतिताभ्योगामानयत्ताअब्रुवन्नवैनोयमलमितिता

२ भ्योश्वमानयत्ताअब्रुवन्नवैनोयमलमितिताभ्यःपुरुषमानयत्ता

अब्रुवन्सुदरतंबतेतिपुरुषोवावसुदरतंताअब्रवीद्यथायतनंप्र

विशतेत्यग्निर्वाग्भूत्वामुखंप्राविशद्वायुःप्राणोभूत्वानासिकेप्रा

विशदादित्यश्चक्षुर्भूत्वाक्षिणीप्राविशद्दिशंश्रोत्रंभूत्वाकर्णौप्रावि

शन्नोषधिवनस्पतयोलोमानिभूत्वात्वचंप्राविशंश्चंद्रमामनोभू २

त्वाहृदयंप्राविशन्मृत्युरपानोभूत्वानाभिंप्राविशदापोरेतोभूत्वा

शिश्नंप्राविशंस्तमशनापिपासेअब्रूतामावाभ्यामभिप्रजानीहि 683/1970

तितेअब्रवीदेतास्वेववांदेवतास्वाभजाम्येतासुभागिन्यौकरोमी

तितस्माद्यस्यैकस्यैचदेवतायैहविर्गृह्यतेभागिन्यावेवास्याम

शनापिपासेभवतः॥ २ ॥सईक्षतेमेनुलोकाश्चलोकपालाश्चा

न्नमेभ्यःसृजाइतिसोपोभ्यतपत्ताभ्योभितप्ताभ्योमूर्तिरजायत

यावैसामूर्तिरजायतान्नंवैतत्तदेनत्सृष्टंपराङत्यजिघांसत्तद्वा

चाजिघृक्षत्तन्नाशक्नोद्वाचाग्रहीतुंसयद्धैनद्वाचाग्रहैष्यदभि

आत्मषट्क व्याहृत्यहैवान्नमत्रप्स्यत्तत्प्राणेनाजिघृक्षत्तन्नाशक्नोत्प्राणेन
२ ग्रहीतुंसयद्धैनत्प्राणेनाग्रहैष्यदभिप्राण्यहैवान्नमत्रप्स्यत्तच्च
क्षुषाजिघृक्षत्तन्नाशक्नोच्चक्षुषाग्रहीतुंसयद्धैनच्चक्षुषाग्रहैष्य
दृष्ट्वाहैवान्नमत्रप्स्यत्तच्छ्रोत्रेणाजिघृक्षत्तन्नाशक्नोच्छ्रोत्रेणग्रहीतुं
सयद्धैनच्छ्रोत्रेणाग्रहैष्यच्छ्रुत्वाहैवान्नामत्रप्स्यत्तत्त्वचाजिघृक्षत्तन्ना
शक्नोत्त्वचाग्रहीतुंसयद्धैनत्त्वचाग्रहैष्यत्स्पृष्ट्वाहैवान्नामत्रप्स्यत्त २
न्मनसाजिघृक्षत्तन्नाशक्नोन्मनसाग्रहीतुंसयद्धैनन्मनसाग्रहै

ष्यध्यात्वाहैवान्नमत्रप्स्यत्तच्छिश्नेनाजिघृक्षत्तन्नाशक्नोच्छिश्ने 685/1970
नग्रहीतुंसयद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्यहैवान्नमत्रप्स्यत्तदपा
नेनाजिघृक्षत्तदावयत्सैषोन्नस्यग्रहोयद्वायुरन्नायुर्वाएषय
द्वायुःसईक्षतकथन्न्विदंमदृतेस्यादितिसईक्षतकतरेणप्रपद्या
इतिसईक्षतयदिवाचाभिव्याहृतंयदिप्राणेनाभिप्राणितंयदि
चक्षुषादृष्टंयदिश्रोत्रेणश्रुतंयदित्वचास्पृष्टंयदिमनसाध्यातंय
द्यपानेनाभ्यपानितंयदिशिश्नेनविसृष्टमथकोहमितिसए

आत्मषट्क तमेवसीमानंविदार्यैतयाद्वाराप्रापद्यतसैषाविदृतिर्नामद्वास्तदे
४ तंनांदनंतस्यत्रयआवसथास्त्रयःस्वप्राअयमावसथोयमाव
सथोयमावसथइतिसजातोभूतान्यभिव्यैरव्यत्किमिहान्यंवा
वदिषदिषदितिसएतमेवपुरुषंब्रह्मततममपश्यदिदमदर्शमि
तीतस्मादिदंद्रोनामेदंद्रोहवैनामतमिदंद्रंसंतमिंद्रइत्याचक्षते
परोक्षेणपरोक्षप्रियाइवहिदेवाः॥परोक्षप्रियाइवहिदेवाः॥३ ४
इतिद्वितीयाः ॐअपक्रामंतुगर्भिण्यः पुरुषेहवाअयमादि

तोगर्भोभवतियदेतद्रेतस्तदेतत्सर्वेभ्योंगेभ्यस्तेजरसंभूत 687/1970
मात्मन्येवात्मानंबिभर्तितद्यदास्त्रियांसिंचत्यथैनज्जनयति
तदस्यप्रथमंजन्मतास्त्रियाआत्मभूयंगछतियथास्वमंगं
तथातस्मादेनांनहिनस्तिसास्यैतमात्मानमत्रगतंभावय
तिसाभावयित्रीभावयितव्याभवतितंस्त्रीगर्भंबिभर्तिसो
ग्रएवकुमारंजन्मनोग्रेधिभावयतिसयत्कुमारंजन्मनो
ग्रेधिभावयत्यात्मानमेवतद्भावयत्येषांलोकानांसंतत्या

आत्मषट्क ५ एवंसंततान्हीमेलोकास्तदस्यद्वितीयंजन्मसोस्यायमात्मापुण्ये
भ्यःकर्मभ्यःप्रतिधीयतेऽथास्यायमितरआत्माकृतकृत्योवयो
गतःप्रैतिसइतःप्रयन्नेवपुनर्जायतेतदस्यतृतीयंजन्मतदुक्त
मृषिणागर्भेनुसन्नन्वेषामवेदमहंदेवानांजनिमानिविश्वा
शतंमापुरआयसीररक्षन्नधश्येनोजवसानिरदीयमितिगर्भ
एवैतच्छयानोवामदेवएवमुवाचसएवंविद्वानस्माच्छरीरभेदादू ५
र्ध्वउत्क्रम्यामुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसमभव

त्समभवत् ४ इतिपंचमः यथास्थानंगर्भिण्यः कोयमात्मेति
वयमुपास्महेकतरःसआत्मायेनवापश्यतियेनवाशृणोतियेन
वागंधानाजिघ्रतियेनवावाचंव्याकरोतियेनवास्वादुचास्वादुच
विजानातियदेतधृदयंमनश्चैतत्संज्ञानमाज्ञानंविज्ञानंमेधादृष्टि
र्धृतिर्मतिर्मनीषाजूतिःस्मृतिःसंकल्पःक्रतुरसुःकामोवशइति
सर्वाण्येवैतानिप्रज्ञानस्यनामधेयानिभवंत्येषब्रह्मैषइंद्रएषप्र
जापतिरेतेसर्वेदेवाइमानिपंचमहाभूतानिपृथिवीवायुराका

689
1970

आ॰उ॰ शआपोज्योतींषीत्येतानीमानिचक्षुद्रमिश्राणीवबीजानीतरा
६ णिचेतराणिचांडजानिचजारुजानिचस्वेदजानिचोद्भिदंजाता
निचाश्वागावःपुरुषाहस्तिनोयत्किंचेदंप्राणिजंगमंचपतत्रिच
यश्चस्थावरंसर्वंतत्प्रज्ञानेत्रंप्रज्ञानेप्रतिष्ठितंप्रज्ञानेत्रोलोकः प्र
ज्ञाप्रतिष्ठाप्रज्ञानंब्रह्मसएतेनप्रज्ञेनात्मनास्माल्लोकादुत्क्रम्या
मुष्मिन्स्वर्गेलोकेसर्वान्कामानाप्त्वामृतःसमभवत्समभवत् ६
५ इतिषष्ठः ॐ वाङ्मेमनसिप्रतिष्ठितामनोमेवाचिप्रतिष्ठित

आ॰उ॰ माविराविर्मएधिवेदस्यमआणीस्थश्रुतंमेमाप्रहासीरनेनाधीते 691/1970
७ नाहोरात्रान्संदधाम्यृतंवदिष्यामिसत्यंवदिष्यामितन्मामवतुतद्व
क्तारमवत्ववतुमामवतुवक्तारमवतुवक्तारं ॐ शांतिःशां
तिःशांतिः ३ इतिआत्मषट्कउपनिषत्समाप्तः यादृशंपुस्त
कंदृष्ट्वातादृशंलिखितंमया यदिशुद्धमशुद्धंवाममदोषोनवि
द्यते १ शाके१७५६जयनामसंवत्सरेश्रावणमासेइदंपुस्तकं ७
समाप्तं शुभंभवतु

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

इतिआत[illegible]पनिषत्समाप्त:

692
1970
[illegible]